कर्म्म विपाकः।

कर्म वि[illegible]

कर्मविपाक:

क॰वि॰ नोवुद्धिः शुद्धा प्रवर्त्तते। अपसरति पापसंघं चित्तं विमलयति सुकृतेमावहति कर्म्मविपाकः पुंसामा ग्रं
१ श्रुतं पठितं च। प्रकटयति विवेकं दीर्घमायुः करोति प्रदहति घनं पापकं तन्निमङ्गं तनोति। विशंदयति
च चेतो धर्म्मवृद्धिं ददाति श्रुतमथ पठितं वा शास्त्रमेतन्नराणाम्। हृत्तिसंनिविष्टमानो हृदये पापमा
धववन्। सारं ग्रहमभिधः कर्म्मविपाकस्त्रिविधं नृणाम्। यः शृणोति पठति प्रवासभ्रं श्रीघ्रमेति स
दनं सर्वधुमन्। आधितो प्यइह सोपि सौख्यभाग्जायते सुतयुतो जयान्वितः। अनंतपारं किलशब्दशा
स्त्रं स्वल्पं तथायुर्बहवश्च विघ्नदोषात्। यत्सारभूतं तदुपासनीयं हंसो यथा क्षीरमथांबुमध्यात्। दानं
वित्ताद्धृतं वाचः कीर्त्तिकर्म्मोन्नत्यायुषः। परोपकरणं कायात्सारात्सारं समुद्धरेत्। वदनं प्रसादसं
दनं हृदयं सदयं सुधा मुचो वाचः। करणं परोपकरणं केषां येषां न ते वंद्याः॥ इति श्रीसारग्रहो
नामकर्म्मविपाकग्रंथः समाप्तम्॥ शुभमस्तु
श्री॥ ॥श्री॥ ॥श्री

वि॰ तिदद्रुकंडःशोनयाकंडूरोगे। तैनेचोर्य्येण भवंतिनरः कंडूनिपीडिताः। सकुर्यात्सेच गवे स्योहृत्तैर्नस्त
१ यंम। उपोष्यचाथविज्ञायदद्यात्तैलद्रोणंस्वयम्। तथापयोव्रतस्तिष्ठेविष्णुस्मरणात्तत्पर वन्त्रशक्तितो
दद्याद्धेवकंडूर्विनश्यति। इतिकंडूरोगे। अथातः शिरोरोगेषु। बौधायनः। ब्रह्मचारीपूर्वजन्मनिभिन्न
कीस्थपात्रेभुक्ताभिकांक्षयाभुक्तांजन्मान्तरे। एकदेशशिरोरोगीभवसंवैद्यशास्त्रोक्तौषधदानंकुर्यात्।त
त्र्यंबकीभ्यामितिसूक्तमष्टोत्तरसहस्रंशतंजपेत्। तावच्चतुघृताभ्यांजुहुयात्। वैद्यशास्त्रोक्तौषधदा
नंकुर्यात्। विप्रभोजनंच। इत्यर्द्धशिरोर्त्तौ। तथाच। गुरुपरोधीशिरोरोगीभवति। संवैद्यशास्त्रोक्तौष
धानिदद्यात्तु। दशसाहस्रंगायत्रीजपेत्तु। दशांसहोमंचतुघृताभ्यांप्रजापतिप्रीत्यर्थंस्वर्णंदानंच। इतिशि
रोरोगे। तथाच। व्रतोपवासनैष्ठिकव्रतादित्यागीशिरोरोगीस्यात्। तत्रपंचाशद्ब्राह्मणान्भोजयेत्। रु
द्रमन्त्रंचैवजपेत्। कूष्मांडीहोमंचकुर्यात्। सूर्य्यहृदयमयुतंजपेच्च। इतिशिरोरोगे। तथाच। पाद्मेगौतमः॥
ब्राह्मणंहिदृष्ट्वाशिरोरोगीभवेद्धेवानसंशयः। तत्रवायुपुराणे। उपवीतंहिरण्येननिर्मितंतुपलार्द्धकः। तदर्द्धे
नमदर्द्धे। गा...थाविभवतोपिवा। उत्तरीयंराजतंचनवग्रंथिक्रियाकृतं। तावत्पासंख्यया कृतमितिपामान्तर
म। ब्राह्मणायब्रह्मविदेश्रोत्रियायोपपादयेत्। संपूज्यपरयाभक्त्याआत्माब्राह्मणमादरात्। मंत्रेणानेनविधिव
त्पूजितायथाविधिके। एवंदत्वातेषुर्वीतंद्विजायविकंश्वसत्तपयश्च...ानत्वादेवन्ब्राह्मणान्देवतेभ्यो...से

क[illegible]ध्यान[illegible]था। तथा विभ[illegible]त्यादि तान्दद्याद्विजो भिषक्। अष्टोत्तरायुतं चापि जुहुयाच्च[illegible]तमा
यमंत्रके नाविडेन्द्र सर्पिर्दद्या[illegible]धापि। अष्टोत्तरायुतं चाप्यथ[illegible]प्रास्यमेव च। हेमान्ते[illegible]हुपो
स्ततः [illegible] त्रिसंवाप्नुयात्। इति पित्तोद्रेके पटलेषु च। तथा च। पद्मपुराणे। पित्तोद्रेके। पूर्वकर्मविपाकेन
२१ यः पित्तोद्रेकसम्भवेत्। सवारणं चतुर्दन्तं हेमं दद्यात् स्वस्थवत्। नानोपहारैर्युक्तं संपूज्य द्विजपुंगवे
हेमादिरत्नैर्वा[illegible] यादिति रोगात्प्रमुच्यते। पूर्ववदितिजत्वणनाशनगजदानवदित्यर्थः समिति। इति पि
त्तोद्रेके पटलादिहरगजदानम्। तथा रक्तपित्ते च। यः पुरा वेदशास्त्रज्ञत्वमदात्पित्रोषधमन्यथा[illegible]त्वा
प्रयोजयति। स शोणितपित्तव्याधिमान्भवति। स चाग्निर्दूतमित्यादिना च तु घृताभ्यामष्टोत्तरायुतमग्नौ
जुहुयात्। अष्टोत्तरायुतं विद्वान् भिंदूनं समीरयेत। तथा ताभ्यां च जुहुयात्। रक्तपित्तापनुत्तये[illegible]ति
गारुडाभिधानात्। इति रक्तपित्ते। पुरा कर्मविपाकेन। योऽत्र वेदक्त [illegible] पित्तवान्। स तद्दोषविनाशाय
प्रा[illegible]म ध्वाज्यदो भवेत्। संपूज्य वरुणं सूर्य्यं ब्राह्मणान्तर्पयेत्॥ इति रक्तपित्ते। अथ च दद्रुमं
डल[illegible]णात्तत्पः। स्वामंगना[illegible] नाभिगमनाज्जायते दद्रुमंडलम्। नरस्तद्दुपशान्त्यर्थं प्रायश्चित्तं समाचरेत्। क
त्वा लोहमयीं धेनुं पलषष्टिप्रमाणतः। कर्पासभारयुक्तां गां सप्तधान्यसमन्वितां। दद्याद्विप्राय सत्क[illegible]
[illegible]दीयतामिति। यमस्य वा होमयेच्च मधुसा षान्त्यमेव ततः। अष्टोत्तरशतं चापि ब्राह्मणां [illegible] यत्[illegible]धीः इ

त्यं समाचरेत्। अश्वत्थ रोपणं कार्यं ब्राह्मणं स्तापि भोजयेत्॥ इति कृत्वा नरः सम्यग् मुच्यते चरव्रणात्
॥ इति चरणव्रणे। तथा सारसंग्रहे। मृते भर्त्तरि या नारी ब्रह्मचर्य्यविधायिनी। ऋतुसंपर्कदोषेण स्वयं या
स्वबहिः कृता सा च गर्भणदोषेण संभोक्तुं न क्षमा भवेत्। भर्त्तृसौख्यं न लभते व्रतं तत्कारयेत्
नारी तीव्रवेदना पुरुषस्पर्शे। उद्वाहयेत् तस्मात् छान्ते स्वयं नीलवृषं शुभम्। अश्वत्थं वा संयुक्तं
तुलसीं विष्णुना अथवा। कुर्यात् स्वशक्ति मुद्गीस्य माषसर्पिस्तिलान्ददेत्। एवं सौख्यसमायुक्ता या भवेदा
याहि मुच्यते। भवेद् ऊनव्रणा चापि त्वेवं कृत्वा विधानतः। इति भगव्रणे। तथा च। वहुव्रणेषु। कुदिनें
तः पुंसो जायन्ते वै वहुव्रणाः। तत्रायुर्वेदः। वटस्य सेचनं कुर्याद् दिनानामेकविंशतिम्। स्वशरीरे
समुन्तायं क्षिपेद्ब्राणस्य पिण्डकम्। द्विजेभ्यः शक्तवो देयाः सगुडाश्चेति निर्व्रणः। इत्यायुर्वेदवचन
र्वहु व्रणहरम्। तथा वा शातातपः। महिषीं घातने मर्त्यः कृष्णगुल्मी प्रजायते। तद्दोषशान्तये कु
र्याद् दिनमेकमुपोषितम्। सरक्तां महिषीं दद्याद् रक्तवस्त्रद्वयान्वितम्। एवं कृतेन विधिवन्नम्नवेत्
कृष्णगुल्मवान्॥ इति कृष्णगुल्मवान्। तथा पित्ते। सारसंग्रहे। गोतमः। यो भुंजानः स्वयं प्रीत्या चाण्डादिवच
स्तिया। गोनेत्रं पिशुनं नीहसपित्तो दृकवान् भवेत्। तथा तानपि संस्मृत्य भुज... विदेह... तद्
त्वस्य देही... वान... जायते... देहवान्... म... द्... दे...। स... कृच्छ्...

चतुर्घृतं ... कुर्यात् । ... कृच्छ्रा ... सेवसंकल्प ... दृष्ट्वा तैः सह । शृणु वायां ... वधी
त ... तया विप्रान्भोजयेत् । एव घोडासम यातिभासिक ... संभव ॥ इति ना ... व्रणे । अ... ना
दर्शि ... पादतिसैहाङ्ग ... दपि । योधर्म्मं निश्चयं जानन्नन्यथा कुरुते नरः । स पूय व्रणे तत्र हः प्राणि
वैतानुसेधिषु । तत्र कृच्छ्रत्रयं कृत्वा तिलप्रस्थप्रदो भवेत् । वह्न्याज्यं तिलैर्वा हुतिभिरष्टोत्तरसहस्रं
कुर्यात् । ब्राह्मणांश्च भोजयेत् । इति हस्तव्रणेषु । तथा च बोधायनः । शातातप ... । फलापहारी पुरु
षो भवति व्रणितांगुलिः । सहस्रकलशैः स्नानं अंवकस्य समाचरेत् । अंवकेनैव मंत्रेण ... स प्रयो ...
... पूजनम् । नानाफलानां — — युतं सन्नदद्याद्द्विजन्मने । एवं सुखमवाप्नोति यो भवेद्व्रणितांगुलिः
... तिव्रणितांगुलित्वं दरम् । तथा च । मातृष्वस्राभिगमनाद्दक्षिणांघ्रिव्रणी भवेत् । तेनापि निःकृ ...
कार्याश्वजादानविधानतः । ताम्रपात्रं प्रदद्याच्च तिलप्रस्थं द्व्या वित्तम् । ब्राह्मणान्भोजयेच्चापि म
... शक्तितो बुधैः । दक्षिणांघ्रिव्रणकृताद्देवं दोषात्प्रमुच्यते । इति दक्षिणांघ्रिव्रणे । तद्वच्च । ... स्वसा
भिगमनाद्वामांगे स व्रणी भवेत् । तेनापि निःकृतिः कार्या सम्यग्दासीप्रदानतः । अश्वत्थसेव ...
कार्य्यं दिनद्वादशकं यजेत् । पंचगव्येन संस्नातो भोजयित्वा ... वाडवान् । एवं दोषात्समुच्येत वामांघ्रि व्र
णी जांन्वरः । इति वामाङ्घ्रि व्रणे । हीनजं स्त्री ... गमात् ... नसभं ... चरण व्रणी । संपानक विस्त ... प्राज्ञ ...

॰ [illegible]वै देहिनाम्। सर्वकामार्थसंसिद्धो डीमो भवतु दानतः। चंदनादीनां [illegible]थाछेदाज्जायते नारी व्रणं
[illegible]यि। सर्वविनाशायच्छिं प्रदद्यात्प्रवरोह्यसि। इति दानमंत्रः। एवं दत्वा तु तन्द्रात्म सुखवान् [illegible] भवी।
भवेत्। अन्येभ्यो ब्राह्मणेभ्यश्च सह भुंजीत वाग्यतः। नाडी व्रणभाषानम् [illegible] मश्वत्थदानम्। तथा चोक्तं [illegible]
[illegible] गर्भनिज्ञायते मस्तक व्रणी। तद्दोषविनाशाय प्राजापत्यव्रतं चरेत्। दद्याच्च कपिलां धेनुं स
दीपक रणान्वितां। एवं पीडा प्रशमं याति मस्तक व्रणसंभवा। इति मस्तकव्रणे। तथा च। श्रोत्रियस्त्री [illegible] प
[illegible] नासिकायां व्रणं भवेत्। अस्य च रेतसि विशुद्ध्यर्थं प्राजापत्यचतुष्टयम्। उमामहेश्वरं दद्यात् परि[illegible]
[illegible]स्वर्णं च। एवं रोगाद्विमुच्येत नासिका व्रणसंज्ञितम्। इति नासिकाव्रणे। सजातिजायायां मनोजं [illegible]
[illegible]ये [illegible] व्रणी। स [illegible]द्दोषविनाशाय प्राजापत्यद्वयं चरेत्। मासमेकं गवां दद्याद् ग्रासं पानीयसंयुतम्। [illegible]
[illegible] विनिर्मुक्तः सुखमाप्नोति मानवः। इति हृदयव्रणे। सारसंग्रहे। तथा [illegible]। जलांबुहुंधनादि [illegible] भिन्निंमि
[illegible]यो म्रियते स [illegible] स दुष्टव्रणी भवेदिति गौतमः। यतः। निर्त्रिमिन्नयो म्रियेत जलांबुहूंधनादि
[illegible] व्रणी [illegible] दाहुःस्वार्नि संयुतः। दद्यात्सङ्गीयुगं युक्त्या [illegible] विप्रांश्च भोजयेत्। दद्या
[illegible] तेन एवं शाम्यति दर्णम्। इत्सुरोगव्रणे। तथा च मार्जार [illegible] कुक्कुट [illegible] मारमेषान् [illegible]
[illegible]। इत्यत [illegible] सर्व [illegible] काव्रणी। सदा [illegible] पश्चात् [illegible] पापतत्तश्चरेत् [illegible]

वाहेन [illegible] सर्वमभद्रविनाशय [illegible] ततः [illegible] तस्मात्तमाचार्य्यमुदाचितः ब्राह्मण

[illegible] भोजयित्वा चैवयेभुंजीत बान्धवैः। इति [illegible] हरंजदानम्। [illegible] विप्रो [illegible] वायः [illegible] महा

[illegible] चानदत्तेनउ [illegible] भवेन्नांडी [illegible] निर्मान्। वक्ष्यामि तत्प्रतीकारं सर्वलोकहितायतु। वृद्ध

गौतमः। [illegible] कारयेद्धद्दं मशवत्थस्कंधशोभितम्। पलाशेन तदर्द्धेन तदर्द्धेनाथवापुनः। कुर्यात्

[illegible] मयेत्सूत्रं तेन चापरिवेष्टयेत् अनुलेपयेत्तुतं वृक्षं कुंकुमारुणचंदनैः। अभावे चंदने नैववा

ससा परिवेष्टयेत्। तंडुलोपरि संस्थाप्य पूजयेदुपचारतः। अश्वत्थे वानियदनं [illegible] एन [illegible]

[illegible] तः। आचार्यो धर्मशास्त्रज्ञो वेदवेदांगपारगः। पुराणज्ञस्तथा शान्तो यज्ञविद्यासुनिष्ठितः

[illegible] नैवकारयेत्पूजामाह्वयस्वयमेव हि। होमं चापि प्रकुर्वीत समिदाज्यपति [illegible]

पनं कार्यं मंत्राध्यायोत्तमार्ज्जितः। यदर्हं वाजवनेचसमिद्धोमः प्रकीर्त्तितः। आज्येनाज्याधिका

[illegible] व्याहृतिभिस्तिलाहुतिः। कलशस्यादिशी [illegible] स्थापनं शास्त्रयुक्तितः। ततोभिषेकं कुर्वी

[illegible] पोदिद्धादिभिः क्रमात्। ग्रहशान्तिश्च कर्त्तव्या ब्राह्मणैर्वेदपारगैः। ततो नारी [illegible]

[illegible] मुक्तो वरघरस्तुचिः। उदङ्मुखः प्राङ्मुखाय आचार्याय निवेदयेत्। संक्षेपेणानेन [illegible]

[illegible] जितायस्य शक्तितः। वनस्पतीनां प्रवरो विष्णुरूपेण पूजितः। तस्य प्रदक्षिणाः सप्तानमस्याः

॥ ततश्च शुद्धधरो हस्ते यथा प्रोक्तं तु वायुना। दत्वा नत्वा विसृज्याथ सह भुंजीत बांधवैः॥ इति व्रणहरणा
र्थं दानम्। अथ नाडीव्रणे। तत्र प्रतिकरणम्। सौवर्णीं राजतीं वापि ताम्रं कांस्यमथापि वा। पलं [illegible] नैवेके
न तदर्द्धेन वा यथा पुनः। न्यग्रोधवृक्षं प्रकुर्वीत वृक्षशाखावलंबिनम्। वस्त्रयुग्मेन संवेष्ट्य स्कंधकं यष्टिक
पुष्पकं। ह[illegible]पुंजके स्याप्य ब्राह्मणाय निवेदयेत्। तत्र उत्तराशापते देव कुबेर वरवाहन। नाडीव्र
णनाशाय मुन्यग्रोधस्य प्रदानतः॥ दानमंत्रः॥ इति दत्वा सुविदुषे नीत्वा सुखमवाप्नुयात्॥ इति
नाडीव्रणहरं न्यग्रोधदानम्। अथ चर्मव्रणे। अन्तरमालोक्य परस्परापापवाद न[illegible]पत्तिः। तत्रोद्ध
रणं नमः। दत्वा स्वर्णमयः कार्यो रत्नैर्नानाविधैर्युतः। स्वर्णाभरणसंयुक्तं कलिङ्ग[illegible]पकारकम्। यत्त
त्सर्वं प्रदद्यात्तु तस्या पार्श्वे समाहितः। उपचारैः षोडशभिर्र्घ्य [illegible] गंधपुष्पकैः। ततो ब्राह्मणमाका
र्य सर्वशास्त्रार्थकोविदः। ऋत्विक्तोपसंपन्नमनुद्वेगकरं तु [illegible]। भक्त्या संपूज्य वस्त्राद्यैर्होमं तेन च
कारयेत्। मंत्रैः [illegible]कैः सम्यक् संहिताशास्त्रनोदितैः। चत्वारो दिग्गजाये च बहुत्वा तोषयेत्त्वतः
[illegible] हीमे गजस्य दानेन ये भवेत्। तस्मै इह नवने सम्यग्गिन्दु[illegible]र्थमाहृतः। मंत्रेणानेन वि
[illegible]द्याङ्गिः समन्वितः। [illegible]णी[illegible] वाहनः। [illegible] नाना
रूपधृक्। दिग्दन्तिनां [illegible] मे [illegible]सुः। ऐरावत[illegible] दिग्दन्ती गजो नमः [illegible]

दानतः। कर्मणा निष्ठुरेणेह वेसस्पर्शे [illegible] रजनः। पूर्वकर्म[illegible]नमः। प्राप्नोति कश्मलम्। दद्रूकंडु दि
[illegible]भवेन्मत्यस्त्वविक्रतेविपत्त। पश्चाद्दानेन तुष्टस्त्नाशयाशुरीरजम्। इति दान[illegible]। एवं दत्वा तु तेस
[illegible]रोगास्य सुच्यते [illegible]कण्ड्वादिवर्जितश्चापित्वग्दोषैश्च विवर्जितः। रोगैरन्यैश्च निर्मुक्तो भानुव
द्भ्राजते भुवि॥ इति दद्रूकण्ड्वादिभेदे। तथा च पामारोगे सारसंग्रहे। गौतमः। यः पूर्वजन्मनि पराङ्वि
ष्टा लिंगति। श्लेष्मणा पूयस्रावा लिङ्गः। तिज्जुगुप्सितं च करोति स पामारोगवान्भवति। शोणितं पू
यं च वहति। स प्रतिकृतिमिच्छन्नुपवासत्रयं कृत्वा दद्याद्ब्राह्मणभोजनमिति वचनात्। अत्र व्याधे
[illegible]रु लघुभावात्प्रायश्चित्तेपि गुरु [illegible] लघुभावो द्रष्टव्यः। इति पामारोगे। अथ व्रणेषु। आह बौधायनः
। धान्यचोरो व्रणी भवेदिति वचनात्। अथ वक्ष्ये प्रतीकारं व्रणघ्नं विधिना मुने। माणिक्यं दे[illegible] सहितं सव
[illegible]नितः शुभ[illegible]म। रक्तवस्त्रेण संवेष्ट्य पूर्वरक्तिकाष्टं च कोपरि। यद्वा विभवसारेण माणिक्यं धान्यपं
चके [illegible]निधाय गंधपुष्पाद्यैरर्च्चयेद्भक्तिपूर्वकम्। ब्राह्मणश्रुतसंपन्नं स्वाचारं संयतेंद्रियम्। विनीत
वेषमाचार्यं भक्त्या प्रयतमानसः। सौवर्ण[illegible]नो पवीतेन सम[illegible]स्वांगुलीयकैः। पूजयित्वा [illegible]
[illegible]कृतहोमाय पूर्वं दवत्। मंत्रेणानेन दद्यात्तु धाड्मुखोदङ्मुखाय तु। जगन्मंगलदेवेश प्रवृत्त[illegible]खिल
[illegible]रूपधृक्। दानेनानेन देवेश व्रणं नाशं प्रभास्कर। दानमंत्रः। व्रणाः शास्त्रेणयेपि सुर्विषघ[illegible]संसु

मपत्तिस्त्वं भक्त्याच विनियो ... जयेत्‌। मंत्रेणानेन विधिवत्‌ कुर्यात्‌। जि... भवान्‌। कैलासवासीन
...नुमयासहितः प्रभुः। भगनेन्दरोदद्रुरोगमाशुव्यपोहतु। दानमंत्रः। ततस्तं ब्राह्मणाय सम्प्र... प
त्य समापयेत्‌। ब्राह्मणान्भोजयित्वा तु स्वयं भुंजीत वाग्यतः। एवं दत्वा महादानं दद्रुरोगात्प्रमुच्यते
... दद्रुरोग ... हरो माहेश्वरदानम्‌। तथा च दद्रुकं डूभेदे। तथा च। वृद्धगौतमः। गव्यां घः पीडनं कुर्यान्न
रो... धन वंधनैः कुग्रासं च कुपानीयं दत्वा निष्ठुरं चेतसा। दद्रुरोगी सकंडूको मर्त्यो भवति सर्वदा। व
च्मि तत्प्रतीकारं प्रायश्चित्तं दानादिकर्मणा। व्यावहारिकनिष्केन पद्मं कुर्यात्तु कांचनम्‌। ...
... कुर्यात्तदर्द्धेनापि कंदकम्‌। मध्ये रत्नं प्रदातव्यं तदभावे पि मौक्तिकम्‌। श्रीखंडकुंकुमाभ्यां च ...
... नुलेपयेत्‌। तंदुलोपरि संस्थाप्य विप्रेण पूजयेच्च तत्‌। उपचारैः षोडशभिरर्चयेन्मूलमं
त्रतः होमं चापि प्रकुर्वीत हंस ——— दित्यपि। व्याहृत्या च तिलैर्होमं कुर्यादयुतसंख्यया समिदाज्ये
स्त्वष्टशत मष्टाविंशतिरेव च। हुत्वा हुत्वा च संपातान्पात्रे न्यस्मिन्विनिक्षिपेत्‌। ततो गात्राणि वस्तु
... दूर्वास्ता मेव सपच। ऋग्भ्यामनुवाक्येन मार्जयीत सुसंयुतः। संपूज्यानन्तरं भक्त्या नैवेद्यं पाप
... पेत्‌। दद्रुरोगी तु तत्पद्मं मंत्रेणानेन भक्तितः। देवदेव जगन्नाथ दिव्यरूप परायण। जगतां प
... दकारके शुभरोग प्रभो। प्रभाकर सर्वसख्य देवदेव ... गोष्टुदुर्वचनारोधकुत्सितजाहार

न्दिग्धहृये॥ इतिकृष्णमंडले। तथा गुरुतल्पगो दुश्चर्मा स्यात् ... धतारतम्येन गुरुतल्पगामित्वदोषप्राय
श्चित्तार्द्धं कुर्यात्। यद्वा गौतमोक्तम्। प्रायश्चित्तं चरेद्धीमान् दुश्चर्मा कृच्छ्रपंचकम्। ततश्च प्रायश्चित्तं कुर्या
न्मासमेकं पयोव्रतम्। उद्वाहयेत्तेनाव प्रमेवं दोषाद्विमुच्यते। इति दुश्चर्माणि। तथा च। दद्रुरोगे बो
धायनः। ब्राह्मणानां च यो हिंस्यात्प्रहारैरतिकर्कशैः। नरकान्ते विमुक्तस्तु दद्रुरोगी भवेन्नरः। तस्यो
पशमनं वक्ष्ये सुवर्णेन तु कारयेत्। पलेन वा तदर्द्धेन तदर्द्धार्द्धेन वा पुनः। उमामहेश्वरं रूप्यं वृषभा
धिष्ठितं शुभम्। चतुर्भुजं जन्तुर्द्विजा मसुमां कुर्याद्विचक्षणः। पंचवक्त्रो भवेच्छंभुस्त्रिनेत्रश्च महाबलः।
अक्षमाला त्रिशूलं च तस्य दक्षिणहस्तयोः। देव्याः पृष्ठगतश्चैव कोवरदश्चाकरः ...। वामोत्संगगता
देवी शिवपृष्ठैकपाणिका। वृषभो राजतः प्रोक्तः कार्योद्यं ... दिसंयुतः। स्वशक्त्या विप्राय तु कुर्वीत
न ... लं भवेत्। तत्रापि रौप्यं देवं सुमया सहितं प्रभुम्। ... तच्चित्तोपसे पञ्चशान्तं चैवाम्लतादिनम्।
वस्त्रागुल्मीयकैस्तस्य पूजां भक्त्या समाचरेत्। होमं च कारयेत्तेन समिदाज्यतिलैरपि। मंत्रश्च रुद्र
गायत्री सर्वत्रेति विनिश्चयः। रुद्रगायत्री तु लिङ्गपुराणे। ॐ सर्वेश्वराय विद्महे शूलहस्ताय धीम
हि तन्नो रुद्रः प्रचोदयात्। यद्वा त्र्यंबकेन मंत्रेण समिधो जुहुयात्सुधीः। कद्रुद्रायेति मंत्रेण जुहु
यादाज्यमाहुतिम्। तिलाष्टमूलमंत्रेण सर्वत्रैव क्रमो भवेत्। तथाश्वत्थो ... मिथुनं ब्राह्मणाय तु वृष

कुष्टे ॥ लवणचोर शीर्ण घ्राणांघ्रिपाणिर्भवति तेन तयज विकृति भ्रष्ट त्र्यनिः कृतिं कार्यायत उक्तं च हेमाद्रौ गौतमे ॥ हृत्वा तुलवणं मर्त्यो नकाले न जन्मनि । शीर्णघ्राणांघ्रिपाणिश्च स्विन्नगात्रः सदा भवेत् ॥ इति पुराणे गौतमवचनात् । लवणेन कृतां धेनुं ब्राह्मणाय निवेदयेत् । नाना पुष्पफलैश्छन्नां वस्त्रचंदनचर्चितां । सशुद्धेन हिरण्येन सहितां श्रद्धयान्वितः । इति कृत्वा नरः सम्यक् पापरोगात्प्रमुच्यते । इति शीर्णगलित घ्राणांघ्रिरोगे । संग्रहे तथा च आयुर्वेदः । रूप्य दाना च्छ्वित्र कुष्टं नत्सांम्यं वा प्रणश्यतीति वचनात् । चित्रकुष्टे रूप्यपलानि सप्त दद्यात् । स्ववित्तानुसारेण वा । इति चित्रकुष्टे । नत्वे वा परतांत्व ग्दोषी भवति । सर्वे धशास्त्रोक्तौषधदानपुरः सरं चांद्रायणत्रयं कुर्यात् । इति त्वग्दोषे । विश्वस्त भार्यागमनाद्गजचर्मा प्रजायते । तत्पापदोषनाशाय प्रायश्चित्तं स्मृतं बुधैः । कृत्वा रूप्यमयीं धेनुं निष्कविंशति संख्यया । सर्वोपस्कर संयुक्तां छत्रोपानद्युगान्वितम् । दद्याद्विप्राय विधिवदिमं मंत्रमुदीरयेत् । यज्ञ विप्राग्निदेवानां यावद्याजगतो गतिः । सुरभी विश्वमाता नाम मम पापं व्यपोहतु । इति नत्वा च दत्वा च विप्रान्संतर्प्य भक्तितः । नरः सुखमवाप्नोति पापरोगविनाशकृत् । इति गजचर्मत्वरोगे । तथा च हंसघाती भवेद्यस्तु तस्य पाप्छेन मंडलम् । रौप्यं पलत्रयमितं हंसं दद्याद्विशुद्धये ॥ इति श्वेतमंडले । मधुरघातने वै जायते कर्ममंडलम् । निष्कत्रयमितं दद्यान्न कुले

येत्। सुवर्णेन पुत्रिकां कृत्वा सुवर्णं दशकेन च। दद्या[illegible]यसंस्पृश्य निःपापस्यामिति ब्रुवन्। देवानमधियो देवो जिष्णुः कु
लिशकेतनः। शतयज्ञसहस्राद्यः पापं मम निकृन्ततु॥ दानमंत्रः। इमं मंत्रं समुच्चार्य आचार्याय यथाविधि। दद्याद्वै सहस्रान्त
स्वपापस्योपशान्तये। ततः स्नात्वा शुचिर्भूत्वा परिधाय सुवाससी। प्रणम्य देवदेवेशं ब्राह्मणांश्च रुस्तया। इष्टबं
धुजनैर्विप्रैः सह भोजनमाचरेत्। एवं कृत्वानुविधिना पापरोगात्प्रमुच्यते। इति रक्तपीतकुष्ठे। तथा
च। भ्रातृभार्याभिगमने गुल्मकुष्ठं प्रजायते। स्ववंधुगमने चापि कृष्णकुष्ठं भवेन्नृणाम्। तेन कार्यं
विशुद्ध्यर्थं प्रागुक्तस्यार्द्धमेव हि। दशांशहोमः कर्त्तव्यः सर्वत्राज्यतिलैः सह। प्रागुक्तस्येति रक्तपीत
दोषोक्तसुवर्णादेः प्रतिमासु। अर्द्धमिति। अन्यत्तु पूर्ववत्सर्वं कृत्वा दोषाद्विमुच्यते। इति गुल्म
कुष्ठे। तथा च। तांबूलहरणान्मर्त्यः श्वेतोष्ठः संप्रजायते। स तद्दोषविशुद्ध्यर्थं स्वयं कुर्यात्सुतिन्निय
म। सदक्षिणं संप्रदद्याद्विद्रुमस्य पलत्रयम्। तांबूलं च यथायोगं द्विजातिभ्यो निवेदयेत्। एवं दो
षाद्विमुच्येत श्रद्धाभक्तिसमन्वितः॥ इति श्वेतोष्ठहरणम्। तथा च। मातुलान्यभिगमने ष्ठेष्ठकुष्ठं
भवेन्नृणाम्। तद्दोषशान्तिकरणं प्रायश्चित्तं समाचरेत्। उपचारैः षोडशभिर्विष्णुं संपूज्य
भक्तितः। कृष्णाजिनं द्विजे दत्त्वा जायते रोगसंक्षयः॥ इति कृत्वा द्विजांश्चैव भोजयित्वा सुखी भवेत्
इति ष्ठेष्ठकुष्ठे। पितृव्यपत्नीगमनात्कटिकुष्ठं भवेन्नृणां॥ निष्कृतिरनेन कर्त्तव्या कन्यादानं प्रयत्नतः। कटि

कर्म वि० कर्म्मणा विक्रीतः पुरा। तत्कर्म्मसंभवं कुष्टं देवो जगत्पिता। कर्म्मणानेन दानेन रोगमम च तं तु सुखम्। विना
५ प्रायत्तु विश्वात्मा ददातु सुखसंततिम्। दानमंत्रप्रार्थने मंत्रः। इत्युदीर्य मुहुर्भक्त्यात्तमाचार्यं तमर्पयेत्।
ब्राह्मणांश्च ततः स्नात्वा भुंजीत जितवाक् सह। एवं विधाने विहिते श्वेतकुष्टी विशुद्ध्यति। इति श्वेतकुष्टहरं
प्रायश्चित्ते ब्रह्मदानं च। तत्रैव तथा। कुष्टी गोवध्यकारी स्यान्नरकान्ते स निःकृतिः। स्थापयेद्धृदमेकं तु पूर्वो।
क्तद्रव्यसंयुतम्। रक्तचंदनलिप्तांगं रक्तपुष्पांबरान्वितम्। रत्नगर्भं तु तं कृत्वा स्थापयेद्दक्षिणां दिशम्। ता
म्रपात्रं न्यसेत्तत्र तिलचूर्णेन पूरितम्। तस्योपरि न्यसेद्देवं हेमनिःकमयं यमम्। यजेत्पुरुषसूक्ते
न पापं मे शाम्यतामिति। सामपारायणं कुर्यात्कलशे तत्र सामवित्। दशांशं शार्षपं हुत्वा पावनाम्भ
भिषेचनं। विहितं धर्म्मराजानमाचार्याय निवेदयेत्। यमो महिषमारूढो दंडपाणिर्भयावहः। दक्षिणाधिप
तिर्द्वीनां मम पापं व्यपोहतु। दानमंत्रः। इत्युदीर्य विसृज्यैनं मासं गोभक्तिमान्भवेत्। शक्त्या दद्यात्तिलान्हेमगावो वि
प्रान्प्रभोजयेत्। स तु दोषशान्त्यर्थं प्रायश्चित्तं समाचरेत्। प्राजापत्यत्रयं कृत्वा दद्याद्पपलत्रयम्। मुच्यते चित्र
कुष्टात्स दद्याद्द्विजभोजनम्। इति चित्रकुष्टे। तथा च। स्वसुतागमने चैव रक्तकुष्टी प्रजायते। भगिनीगमने चा
पि पीतकुष्टी प्रजायते। तस्य प्रतिक्रियां कर्तुं पूर्ववत्तः कलशं न्यसेत्। पीतवस्त्रयुगच्छन्नं पीतमाल्यादिभूषणम्। तस्यो
परि न्यसेद्देवं पात्रोपरि सुरेश्वरम्। सुवर्णनिःकमातेन निर्म्मितं वज्रधारिणम्। वह्वृचस्तत्र कलशे ऋग्वेदं च समाप

कदली सर्व्वदेवानां मातृणां सर्व्वशर्म्मदा। लब्ध्वा प्रीत्या च पार्व्वत्या देवकन्याभिरेव च। सावित्र्या रंभया चैव
कार्य्यार्थं शक्रजित्ता पुरा। ददामि त्वां महारंभे सर्व्वार्त्तिहरणाय माम्। अंगप्रत्यंगजं देवि कुष्ठं मम विनाश
य। कदलीदानमंत्रः। ततः स्नात्वा तु भुंजीत ब्राह्मणैर्बंधुभिः सह। एवं कृत्वा भवेन्नारी रोगमुक्ता—
न्विताः॥ इति स्त्रीणां कुष्ठविशेषहरकदलीदानम्। अथ शातातपः। ब्रह्महा नरकस्यान्ते पांडुकुष्ठी प्रजा
यते। प्रायश्चित्तं स कुर्व्वीत तस्य दोषस्य शान्तये। चत्वारः कलशाः कार्याः पंचरत्नसमन्विताः। पंचपल्लव
संयुक्ताः सितवस्त्रेण वेष्टिताः। अश्वस्थानादिमृद्युक्ताः स्थाप्याः प्रतिदिशम्। रूप्यमष्टदलं पत्रं मध्य
कुंभोपरि न्यसेत्। तस्योपरि न्यसेद्देवं दशहस्तं चतुर्मुखम्। पलार्द्धार्द्धप्रमाणेन स्वर्णेन विनिर्म्मि न
तम्। यजेत्पुरुषसूक्तेन त्रिकालं प्रतिवत्सरम्। यजमानः शुभैर्गंधैः पुष्पधूपैर्यथाविधि। पूर्व्वा
दिकुंभेषु ततो ब्राह्मणान्ब्रह्मचारिणः। पारयेयुः स्वकान्वेदानृग्वेदप्रभृतीन् शनैः। दशांशेन तथा होमो ग्र
हशान्ति पुरःसरम्। मध्यकुंडे प्रदातव्यो घृताक्तैर्व्रीहिभिस्तिलैः। द्वादशाहमिदं कर्म्म समाप्य द्विजपु
ङ्गवैः। यजमानं भद्रपीठेऽभिषिंचेद्यथाविधिः। ततो दद्याद्यथाशक्त्या गोभूहेमतिलादिकम्। ब्रा
ह्मणेभ्यस्तथा देवमाचार्याय निवेदयेत्। इत्युदीर्य मनः शुद्धं दंभलोभादिवर्जितम्। आदित्या व
सवो रुद्रा विश्वेदेवा मरुद्गणाः। प्रीताः सर्व्वे व्यपोहन्तु मम तापं सुदारुणम्। ब्रह्मवध्यादि पापानां

अभ्यंजनं प्रकुर्वीत तथा लिङ्गशरीरके। शन्नोदेव्यनुवाकेन शान्तिं कुर्याद्विचक्षणः। तस्मै हुतवते रोगी
दद्यान्मंत्रपुरःसरम्। उदङ्मुखः प्राङ्मुखाय सूर्यं ध्यात्वा स्वचेतसि। आदित्य सूर्य द्युमणे सर्वरोगविनाश
न। सहस्रकिरणं ज्ञात्वा वंध्यो तिमिरनाशन। द्वादशात्मंस्त्वयी देव जगच्चक्षुः परात्परः। पूर्वकर्म्मविपा
कोत्थं कुष्टं मम विनाशय। दानेनानेन सुप्रीतो देहिनां रोगतो सदा। दानमंत्रः। एवं कृत्वा तु पुरुषः कु
ष्टरोगात्प्रमुच्यते। इति पुरुषस्य कुष्टविशेषहरसूर्यदानम्। अथ स्त्रीणां कुष्टभेदे। पलेनाथ तद
र्द्धेन तदर्थेनाथवा पुनः। कारयेत्कदलीं श्रेष्टं कुष्टार्त्ता स्त्री यदा भवेत्। ऋतुस्नानतटी वक्रस्थानेष्वेते
षु पोषिताम्। कुष्टरोगसमुत्पत्तिर्दोषैस्तत्र प्रकीर्त्तिता। तद्दोषशान्तये कुर्यात्कदलीं शक्त्यपेक्षया।
सुवर्णेन सुवर्णेन पत्रपुष्पैरलंकृताम्। पूजयेच्छुक्लपुष्पैस्तां श्वेतवस्त्रेण वेष्टयेत्। चंदनैः कुंकुमै
र्धूपै [illegible] र्चयेद्विधिवत्तथा। तंडुलद्रोणशिखरे नानाफलसमन्विताम्। वृत्ताध्ययनसंपन्नं गुणज्ये
ष्टमलोलुपम्। गृहमाकार्य विप्रं तं श्रद्धाभक्तिसमन्वितः। पूजयेद्विधिवत्तं तु गंधमाल्यविभूषणैः
। होमं च कारयेत्तेन दूर्वावत्साष्टकं शतम्। मूलमंत्रेण सावित्र्या गायत्र्या दुर्गया तथा। तथैवाब्राज्य
सपानैरदीभ्यामित्यनेन तु। अभ्यंजयेद्रोगिणीं तां यथा स्थानशरीरके। शन्नोदेव्यनुवाकेन शान्तिं कुर्या
द्विजोत्तमः। तस्मै हुतवते रोगी दद्याद्भक्तिपुरःसरम्। मंत्रेण विधिवत्तं तु प्राङ्मुखाय ह्युदङ्मुखः क

श्मा गुरुचंदनैः। पूजयेन्मूलमंत्रेण तिलैर्होमं तु कारयेत्। अष्टोत्तरशतं वाज्यमिश्रैः कुर्यात्समाहितः। वृ
षदानप्रयोगज्ञो हरो माभ्यां सुपूजितम्। वृषभं घंटयोपेतं ग्रैवेयं भूषितम्। उदङ्मुखे प्रविष्टाय प्राङ्मु
खो हरसन्निधौ। तन्मंत्रः। अष्टमूर्ते महेशान कृपया वृषभध्वज। औडुंबरं वा जिनं वा दद्रुमंडल
कं तथा। त्वग्दोषजनितं यच्च पूर्वकर्मविपाकतः। इह कर्मोद्भवं वापि मातृदोषेण वा पुनः। पितृदो
षेण वा सर्वरक्तदोषोद्भवं तथा। विनाशाय शरीरोत्थे पार्वतीप्रियशंकर। वृषभस्य प्रदानेन नउभ
याधिष्ठितस्य वै॥ दानमंत्रः। एवं दत्वा वृषं रूप्यं सर्वकुष्ठविनाशनम्। ब्राह्मणान्भोजयेच्चापि भक्त्या
परमया युतः। इति कृत्वा विधानेन कुष्ठी रोगात्प्रमुच्यते। इत्यौडुंबरादिकुष्ठहरवृषदानम्। अथ च
कुष्ठभेदे पुरुषस्य। पलेन चार्द्धदर्द्धेन तदर्द्धार्द्धेन वा पुनः। सूर्यप्रतिकृतिं कुर्यान्सुरेवारः कृदिकुष्ठके।
कुष्ठोपहतदेहानां पूर्वकर्मविपाकतः। सूर्यरक्तद्विभुजः कार्यो राजनेचरथेस्थितः। रक्तवस्त्रेण संछा वे
कुंकुमेनानुलेपयेत्। तंडुलोपरि संस्थाप्य सूर्यनामभिरर्चयेत्। तंडुलानां परीमाणं द्रोणं कुर्याद्यथा
विधिः। वृत्ताध्ययनसंपन्नं विप्रमाकार्य भक्तितः। पूजयेद्विधिवत्तं तु हेमवस्त्रादिभूषणैः। कारयेत्ते
न होमं च समिदाज्यतिलैर्द्विजैः। लाजाज्यमधुना मिश्रमष्टोत्तरशतं द्रुनेत। सूर्यमंत्रेण विधिवद्गृहा
णां च घृतं प्लुतम्। फट्कारं योजयेच्चान्ते समिदाज्यचतुष्टयम्। तथैवाच्युतसमापेतैरर्चनीयामित्यनेन नः॥

मया च कुर्व्वीत तमधिष्ठितम्।सौवर्णौ प्रतिमे हेतु पूर्व्वोक्तेन क्रमेण हि।यथाविभवसारेण वित्तशाठ्य
विवर्ज्जितम्।पलाष्टके कांस्यपात्रे स्थापयेत्तं विचक्षणः।श्वेतेन वस्त्रे रक्ते ते च श्वेतपुष्पैरलंकृत
म्।ब्राह्मणं श्रुतसंपन्नं साचारं विजितेंद्रियम्।सर्व्वप्राणस्व प्रवक्तारं प्रतिग्रह पराङ्मुखम्।वृ
त्तं कुलीनं धर्म्मज्ञमनुद्वेगकरं नृणाम्।क्रोधलोभविहीनं च सर्व्वशास्त्रार्थकोविदम्।गृहमानी
य भक्त्या तं यथाविधि समर्च्चयेत्।केयूरैः कटकैर्वस्त्रैर्माल्यैश्चैवांगुलीयकैः।होमं च सर्व्वं वा कु
र्यान्मंत्रैर्म्माहेश्वरैस्ततः।उदङ्मुखोपविष्टाय महादेवस्य सन्निधौ।प्राङ्मुखो व्याधितो दद्यान्मंत्रे
णानेन धर्म्मतः।अष्टमूर्त्ते महेशान कृपार्णव वृषध्वजः।श्वेतमौडुंवरं सर्व्वमथवा श्चित्रमेव च।
त्वग्दोषजनितं यच्च।मंडलान्यथवानघ।हर कर्म्मविपाकोत्थं पापं नाशय सर्व्वग।कुष्ठहा भव सर्व्व नी
शारदस्मां पार्व्वतीपते।दान मंत्रः।इति रूप्य वृषं दत्त्वा विधिना वृषभध्वजः।प्रीयेत सर्व्वकुष्ठेभ्यो दुष्टे
भ्यो मुच्यते नरः।इति कुष्ठ वृषभदानम्।तथा च।औडुंवरादि कुष्ठेषु।शुक्लपक्षस्य चाष्टम्यां द्वामे। भ्यः
कैनवाप्युनः।पलेन कुर्य्याद्वृषभं साङ्गलोमं सुराजतम्।हेमशृङ्गं सुवर्णाक्षं रक्तपुच्छं शुभाननम्
।महेश्वरेण मया च सौवर्णाभ्यां स्वधितिष्ठितम्।यष्ट्वा विभववत्तस्तत्र परीमाणं विधीयते।पलाष्ट
केताम्रपात्रे वस्त्रेणावेष्टय भक्तितः।देवस्यैकं वृषस्यैकं पार्व्वत्याश्चैकमेव हि।श्वेतपुष्पैरक्ते तेस्त्व कुं

शुभैः। केयूरैः कुंडलैश्चापि मुद्रिकां चंदनादिभिः। तस्मै प्रदद्यान्महिषीं शुभां मूर्द्धि तिनाशिनीं। मंत्रेणानेन
विधिवत्तं मंत्रं शृणुष्व सत्तम। धर्मराजस्य साहाय्ये यस्याः पुत्रः प्रतिष्ठितः। सा देवी महिषीरूपा पांडुरोगाद्
रक्षतु मे॥ दानमंत्रः। अयुतं त्र्यंबकं जप्त्वा दशांशेन घृतं हुनेत्। भोजयेद्ब्राह्मणाञ् शतं दद्याच्चापि यथे
प्सितम्। इति मुखशिरोवेदनाकर पांडुरोगे। तथा च शातातपः। उरस्येनिहते चैव पांडुरोगः प्रजाय
ते। कस्तूरिकापलं दद्याद्ब्राह्मणाय विशुद्धये। सहिरण्यं तु विधिना विप्रं संपूज्य भक्तितः। इति शाता
तपवचनात् पांडुरोगे। अथ कुष्ठरोगे। सारसंग्रहे गौतमः। जन्तुघातकः कुष्ठी वस्त्रहारी च श्वेतकुष्ठी
भवति। स तत्र सान्तपनं कुर्यात्। उक्तं पत्तः। यो नरो हन्ति वै जन्तून् कुष्ठरोगी भवेत्तु सः। कृच्छ्रं सान्त
पनं कुर्याद्भगवानाह शंकरः। इति वचनात्। शक्त्या विप्रांश्च भोजयेत्। इति कुष्ठे। तथा च सत्तसर्व
त्राहंकारी मुखे कृष्णो भवति। कृष्णकुष्ठः। अशोकच्छूति कृच्छ्रं कुर्यात्। क्षुद्रप्राणिविहिंसको वि
वर्णत्वा भवति। स चांद्रायणं कच्छूति कृच्छ्रं कुर्यात्। अथ चतुर्विधकुष्ठे। वायुपुराणे। वायाय
नः। कुष्ठी गोवधकारी स्यात् कुष्ठी स्तेनो नरो भवेत्। कुष्ठी स्याद्ब्राह्मणीं गत्वा यथाह्याह प्रजापतिः।
इत्यत्र गोवधकारी जात्मुत्तमानतुम्लेच्छादिः। स्तेयी साधारणः ब्राह्मणीगत्वे सुखकारणम्।
एतैस्त्रिभिस्तु कुर्वीत ह्यभ्यामेकेन वा पुनः। राजतं वृषभं शुभ्रं हेमशृंगं खुरं तथा। महेश्वरेणा

१० तं रुक्मचापि कुंभं वस्त्रेण वेष्टितम्। स्थापयेद्देवगणं शुभ्रमश्वस्थानादिमृत्तिका॥ प्रक्षिप्य तत्र ततः श्वे
वारिणा परिपूरितम्। पवमानादिभिर्मंत्रैरभिषेकं च कारयेत्। शन्नो देव्यनुवाकेन शान्तिं चापि प्रक
ल्पयेत्। अभिषिक्तस्य चाङ्गानि वस्त्रेण परिमार्ज्जयेत्। अक्षीभ्यामनुवाकेन यथालिङ्गं स[illegible]म
। आचार्याय च तां पृथ्वीं दद्याद्रोगी समाहितः। मंत्रेणानेन विधिवत्प्राङ्मुखो यद्युदङ्मुखः। धात्र
रि त्रिभूतानां वराहेणोद्धृतां पुरा। रत्नगर्भा समुद्रैकवसना सर्व्वशोभना। दानेनानेन सुप्रीता पाण्डु
रोगं व्यपोहतु। दानमंत्रः। अनेन विधिना दत्वा पृथ्वीदानं प्रयत्नतः। यच्चज्ञातं कृतं तेन मैस्त्वत्प्र
ज्ञागमनेन तु। तत्सर्व्वं नाशमायाति पांडुरोगादिकं महत्। शान्त्यर्थं ब्राह्मणैः सार्द्धं कुर्यात्पुण्याह
वाचनम्। ततः स्वबंधुभिः सार्द्धं स्नात्वा भोजनमाचरेत्॥ इति पांडुरोगहरपृथ्वीदानम्। तथा च
यः श्रुतिविहितानग्निष्टोमादियज्ञान्यथोक्तविधानेन गृहीत्वा न समापयति। पांडुरोगी भवति
। सुखं मूर्द्धनि पीडा च पृष्ठके चैव अतिदारुणम्॥ कार्य्यं तदुपशान्त्यर्थं महिषीदानमादरात्। यथो
क्तं शास्त्रमार्गेण पांडुरोगोपशान्तकम्। समिदाज्यतिलैरमावयुतं साष्टकं तु नेतृ। अयुतानां त्रयं
जस्वा दद्याच्च द्विजभोजनम्। तदुक्तं चादिवाराहपुराणे। यो गृहीत्वा महायज्ञान्न समापयति द्विजः। स पां
डुरोगी भवति सुखं मूर्द्धनि वेदनं। तत्र लिङ्गं समाकार्य गुणानंदत्र संयुतम्। कुटं विनं च संपूज्य रक्तमाल्यांबरैः

र। दानमंत्रः। कृतेनानेन दानेन ग्रहणीशान्तिमृच्छति। तस्माद्देवं प्रकर्त्तव्यमेतद्रोगप्रशान्तये। इति ग्र
हणीहरधेनुदानम्। तथा च। शातातपः। नानाविधद्रव्यचौरो जायते ग्रहणीयुतः। तेनोदकं च वस्त्रा
णि हेमरूपे पंच शक्तितः। इति ग्रहणीरोगे। अथ पांडुरोगे। देवब्राह्मणद्रव्यापहारी पांडुरोगी भवति।
तत्र शक्तितो ब्राह्मणभोजनदानम्। कृच्छ्रातिकृच्छ्रं चांद्रायणानि च कुर्यात्। कुष्मांडीमंत्रांश्च जपेत्। कू
ष्माण्डीमंत्रेण चाष्टोत्तरसहस्रं कूष्मांडहोमः। हिरण्यं च दद्यात्। ब्राह्मणेभ्यो रजतं वासांस्यन्नं च दद्यात्
। इति पांडुरोगी। तथा पाद्मे। अन्त्यजागमनेन स्त्रीः पांडुरोगी प्रजायते। वक्ष्यामि तत्प्रतीकारं दानहोमा
दिकर्म्मणा। पलत्रयेण कुर्वीत रजतेन वसुंधरां। तदर्द्धेनाथवा कुर्याद्वित्तशाठ्यं न कारयेत्। सपर्वतव द
नि. नां कृत्स्नां समुद्रपरिवेष्टिताम्। तत्र रत्नानि निक्षिप्य श्वेतवस्त्रेण वेष्टयेत्। कांस्यपात्रे समाधाय प
लाष्टकविनिर्मिते। देवीमावाहयेत्तत्र सर्वाधारां हरिप्रियाम्। एह्येहि देवि धात्रि त्वं रूपेस्मिन्सम्प
गाविश। सहिता पर्वतैर्द्वीपैः समुद्रैः काननैः सह। सर्वाधारे सर्वभूते लोकानां सम्मता भव।
आवाहनमंत्रः। एवमावाह्य तां देवीं गंधमाल्यैः समर्चयेत्। उपचारैः षोडशभिराचा... र्व
शास्त्रवित्। होमं चापि प्रकुर्वीत समिदाज्यतिलैः सह। भूमिर्भूम्नेति मंत्रेण समिद्धोमः प्रकीर्ति
तः। भूमिर्भूमिमीगान्मातान्मातरमित्ययं मंत्रः प्रकीर्तितः। अयोतिलान्व्याहृतिभि... श्चैव

मार्कं निर्मितं शुभम्। ब्रह्मवर्चस्विने विप्रे कर्मनिष्ठेऽग्निहोत्रिणे। अंगुलीयकवस्त्राद्यैर्भूषिते तां निवे
दयेत्। मंत्रेणानेन विधिवदग्निप्रीत्यर्थमाहृतः। प्रेतरूपोऽग्निरीशस्त्वमत्तश्वरसि वै नृणाम्। त्वं देहि मि पा
न्तकं पापमतीसारं प्रणाशय। दानमंत्रम्। एवं कृत्वा नरः सम्यगतीसारं व्यपोहति। निकुंज कवी
नित्यंदीर्घमायुश्चविंदति। इत्यतीसारहरवह्निमूर्त्तिदानम्। अथ ग्रहणीरोगे। यो भार्याम दुष्टां
भनन्यगतिकां कारणमंतरेण परित्यजति स जन्मांतरे संग्रहणीरोगवान्भवति। तत्र। शिवसं
कल्पसूक्तं संजपेद्दशोत्तरं शतमिति शिवगीतावचनात्। धेनुं सदक्षिणां दद्यात्सवत्सां भरणा
न्वितां। पयस्विनीं गुणोपेतां ब्राह्मणाय विशेषत इति ग्रहणीरोगमुपक्रम्याभिहितत्वाद्धेनुदा
नं कर्त्तव्यं। इति ग्रहणीरोगे। ग्रहणीवान पैत्यागी भवेत्। तत्र गौतमः। धेनुं पयस्विनीं दद्याद्वु एर
भरणभूषिताम्। स्वर्णशृंगी श — — वासोभिर्वेष्टितां नरः। नवधान्यैः समायुक्तामेकैकं द्रोण
पंचकैः। सहिरण्यां तु तां दद्याद्ब्राह्मणाय कुटुंबिने। अन्नोल्लपाय शान्ताय धर्म्मज्ञाय विशेषतः॥
होमश्च पूर्ववत्कार्यः समिदाज्यचरूत्कटः। पूर्ववदिति ग्रहशान्तिवत्। तस्मै हुतवते दद्यात्पूजिता
यांगुलीयकैः। गोकृष्णाय कृष्णरूपाय मंत्रेणानेन रोगवान्। कृष्णरूपायेति श्रीकृष्णस्वरूपायन
न्दकृष्णवर्णाय विप्राय। देवकीपुत्रचाणूरकंसारिष्टविनाशन। ग्रहणीहर मे कृष्ण गोपीजनमनोह

न्यजन्मनि रक्तार्बुदवान्भवति॥ उक्तं च विधवागमनेनापि नित्यं [illegible] नारदभिक्तुकः। भवेद्रक्तार्बुदी कु
र्यात्। प्रायश्चित्तं तच्छान्तये। सकृच्छ्रातिकृच्छ्रचान्द्रायणानि समस्तानि व्याधिनारतम्प्रभवल्लोककुर्याद
त्। पंक्तिं च भोजयेत् श्रीनारायणस्मरणसंस्तवं नम [illegible] नसा जपादिकमपि कुर्याद्देवतिरोगाद्वि
मुक्तिः। इति रक्तार्बुदरोगे। तथा च शातातपः। रक्तार्बुदी वैश्यहन्ता जायते च समाचरेत्। प्राजापत्या
नि चत्वारि सप्तधान्यानि चोत्सृजेत्॥ इति च रक्तार्बुदरोगे। अथ रक्तातीसाररोगे। तत्र शातातपः। दावा
ग्निदायकश्चैव रक्तातीसारवान्भवेत्। निपानं तेन कर्त्तव्यं रोपणीयस्तथा वटः॥ इति रक्तातीसारे। तथा
च। स्त्रीहन्ता चातिसारी स्यादश्वत्थान्रोपयेद्दश। दद्याच्च शर्करा धेनुं भोजयेच्च शतं द्विजान्। एवं कृत्वा
कर्म्मदुष्टादतीसारात्प्रमुच्यते। इत्यतीसारे। तथा सारग्रहे। अग्रुपशामी अतीसाररोगी भवति।
तत्र। अग्निरक्षी तिविधयय्यथाशक्त्या जपेत्। तद्दशांशेन तिलाज्याहुतीर्जुहुयात्। सितां दद्यात्सु
वर्णं च अतीसारग्रहाय वै। इत्यतीसारे। पापोऽतीसारी भवति यस्त्वेताग्निविनाशकः। बौधायनः
सुवर्णेनायताम्रेण कुर्यात्प्रतिकृतिं बुधः। वङ्गेर्विभवसारेण पलेनार्द्धेन वा पुनः। वह्निर्ल [illegible]
कपालप्रसङ्गेन ब्रह्माण्डदानेदर्शितम। तथाज्यांकुलं रक्तचंदनेनानुलेपितम्। रक्तवस्त्रसंवी
तं मेषस्योपरि संस्थितम्। रक्तमाल्येन संयुक्तं मुक्तादामपरिष्कृतम्। कनकाचनवर्णाभं द्वार

ब

भ ति कृतिः कार्या महिषीदानयत्नतः। इति भगंदरहरमहिषीदानम्। अथ प्रदररोगे। पित्रा मात्रा च गुरुणा
संततं स्पर्द्धते द्विषः। प्रदरं रोगमाप्नोति इत्याह भगवान् यम इति। तत्र। कृच्छ्रातिकृच्छ्रचांद्रायणानि कुर्या
त्। तद्विष्णोरिति अयुतत्रयं जपेत्। सहस्रमाज्याहुतिर्जुहुयात्। इति कृत्वा ततो रोगान्मुच्यते प्रदरा
न्नरः। इति प्रदररोगे। अथासृग्दरस्य। तत्र बौधायनः। असृग्दरी सम्भवति हृत्वा दारयते द्वेषिवचन
त्। तथा रूप्यखुरां रक्तवस्त्रेण समलंकृताम्।। ब्राह्मणायाग्निवर्णाय त्वा सल्कस्य मानवः। यत्नेन वा
वि तद्दद्दैर्न दद्दैर्नोवा पुनः। सुवर्णेन युतां शुभ्रां यथा सविभवेन तु। द्विजोत्तमाय श्रेष्ठाय सर्वशास्त्रार्थवेदिने। आ
धेनुं तामति संहृष्टो मंत्रेणानेन भक्तितः। यन्मूलं द्वियादेवी देवपित्रार्थमाहृता। सा त्वं पुण्या गवी मा
त्रं तः त्वत्पयासृग्दरं मम। दानमंत्रः। एवं कृत्वा विधिं श्रेष्ठं धेनुदानसमाश्रितम्। असृग्दरादिरोगेण त्वरि
तं मुच्यते नरः। इत्यसृग्दरनाशन धेनुदानम्। अथ स्रवद्गर्भशोणिते। पतिना रममाणा मासोप
वासिन्यन्यजन्मनि स्मरमंदिरे। हर्निशं प्रस्रवद्रक्ता भवति। तथा च। मासोपवासिनी नारी ऋतु
प्रस्राविनी सदा। कुरुते पतिसंपर्कं प्रभवत्यन्यजन्मनि। तत्रर्षयष्टिव्रतानि कृच्छ्रातिकृच्छ्रचांद्राय
णानि वा व्याधेर्गुरुलघुभावे समाचरेत्। उमामहेश्वरतंत्रवचनात्। सा मासोपवासेन मासं प
यो व्रतेन नश्यति। इति प्रस्रवद्गर्भशोणिते। अथ रक्तार्बुदे। पूर्वजन्मनि पतिं द्वियासार्द्धं रममाणाऽ

धव

तः॥ इत्यर्शोघ्नं हेमधेनुदानम्। अथ भगंदररोगे। यः पूर्वं जन्मनि राज्ञो निश्चयार्थं पुरोहितः। पत्नयाता
द्रव्यं गृहीत्वान्यथा धर्म्मं निश्चिनोति स भगंदरी भवति। तदुक्तमादिवाराहपुराणे। यो गृह्णीयाद्द्विजो
मोहाद्युक्तो चान्यायनिश्चये। भगंदरी भवेत्तस्य ह्यधर्म्मं वदतः सभाम्। सदघाद्रत्नं हिरण्यं च धान्यं
तो वासांसि भूतये। भूमिं च शक्त्या रोगी ब्राह्मणेभ्यश्च भोजनमिति। ततो रोगाद्विमुक्त एवं दुष्टग्रहेष्व
पि। इति भगंदरे। तथा च पाद्मे। आचार्यगमने भगंदरयुतो भवेत्। तत्र वृद्धगौतमः। वौधायनश्च।
माणिक्यं पद्मरागं वा वज्रं वैडूर्यमेव च गोमेदं मौक्तिकं पुष्परागं मरकतं तथा। हरितं चन्दनं चैतानि स्व- तं
र्णपात्रे परिन्यसेत्। अथ वा राजते पात्रे गंधाद्यैश्च प्रपूजयेत्। नवग्रहार्णाडीत्यर्थं ब्रह्मणा निर्मितं
पुरा। गंधपुष्पाद्यैर्धूपैर्नैवेद्यैस्तान्प्रपूजयेत्। स्वलिंगैरेव मंत्रैश्च होमः कार्यस्तु पूर्ववत्। पूर्ववद्
दितिग्रहयज्ञमार्गेणेत्यर्थः। ततो ब्राह्मणमाकार्य्य सर्व्वशास्त्रार्थकोविदम्। तापसं वृत्तसंपन्नं
पूजां तस्य प्रकल्पयेत्। मुद्रिकाकुंडलैर्वस्त्रैरुपानच्छत्रकैरपि। मंत्रेणानेन विधिवद्दद्याद्ब्राह्मण
पुंगवे। आदित्यादिग्रहाः सर्व्वे नवरत्नप्रदानतः। विनाशयन्तु मे ह्यष्टाः क्षिप्रमेव भगंदरम्। दानमं
त्रः॥ अनेन कर्मणा नूनं यथार्थविहितेन तु। नरो नरुजमाप्नोति क्षिप्रमेव भगंदरम्। इति भगं-
दरहरनवरत्नदानम्। तथा च शातातपः। गो[illegible]त्रिणः [illegible]प्रसंगेन जायंते सो भगंदरान्। तेनापि

मित्यादिस्वक्रमम्। व्याधिगुरुलघुभावापेक्षयाजपेत्। सघृतं हिरण्यंदद्यात्। श्रोत्रियायकुटुंबिने॥
कुटुंबभरणपर्याप्तंधनंदद्यात्। इत्येतन्महाधनविषयम्। यतः। श्रोत्रियायकुलीनाय [illegible]
अर्थिनेचविशेषतः। असाध्यव्याधिनाग्रस्तोधनंदद्याद्विशान्तये॥ इतिगीताब्रह्मवचनात्। इत्यर्शो
हरम्। तथाचपाद्मे। अर्शोस्वामोवधान्नमर्शइत्युपलक्षणम्। तत्रबौधायनः। सोवर्णीगांप्रकुर्वीत
पलेनार्द्धेनवापुनः। वित्तशाठ्येनकुर्वीतकुर्वन्नैवफलंलभेत्। रत्नशृंगीरूप्यखुरांनानावस्त्रैरलंकृ
ताम्। व्रीहिद्रोणाष्टकेनाथनवधान्यानिविन्यसेत्। श्रोत्रियायकुलीनायधेनुंदद्यात्स्वशक्तितः॥ होमं
पूर्ववत्सर्ववत्कार्योगोविंदप्रीतयेद्विजैः। इदंविष्णुः नतद्विष्णुर्विष्णोर्नुकमितिक्रमात्। समिदाज्यचरु
हुत्वापूर्णांहुत्यन्तमेवहि। ततःस्नातःशुचीरोगीतंविप्रंवेदपारगम्। श्रुतस्मृतोपसंपन्नंमन्त्रदे
मकरक्षणम्। स्वयंभक्त्यासमानीयपूजयेत्प्रीतिपूर्वकम्। अंगुलीयकवस्त्राद्यैःकुंडलैःकटके
रपि। मंत्रेणानेनगांदद्यात्सतुरोगीजितेंद्रियः। गोविंदंमनसाध्यायन्गवांमध्येस्थितंशिशुम्।
बर्हापीडकसंयुक्तंवेणुवादनतत्परम्। गोपीजनैःपरिवृतंपुष्पगुच्छावतंसकम्। गोविंदगो
पीजनवल्लभेशकंसासुरघ्नत्रिदशेशवंद्य। गोदाननत्रमःकुरु [illegible] मेदयालो अर्शोविनाशंत्वयिता
रिवर्गैः। दानमंत्रः। एवंदत्वापुनःस्नात्वासतद्रोगात्प्रमुच्यते। इष्टबंधुजनैःसार्द्धंततोभुंजीतवाग्य

सोम्याशाधिपतिः श्रीमान् मम पापं व्यपोहतु। इमं मंत्रं समुच्चार्य अर्घ्यं यथाविधि। दद्याद्देवलिङ्ग
हीनो लिङ्गनाशे च शुद्धये॥ इतीन्द्रियरोगे। अथ वृषणव्याधौ। अपराधमन्तरेण यो भृत्या दंतां ह
स्तचरणादिछेदं करोति कारयति वा। तस्य — तः शुको भवति। मुष्कद्वयमग्निना दग्धमिव सव्रणं
च जायते। पश्चाद्रक्तं श्रवति। तत्र पुमान् रुद्रसंहितामष्टोत्तरसहस्रं जपेत्। यतिचांद्रायणं कु
र्यात्। गां च दद्यात्। यतः। जायते वृषणे यस्य व्याधिः परमदारुणः। जपयित्वा दशसाहस्रं मुच्यते
रुद्रसंहितामिति विष्णुस्मरणात्॥ इति वृषणरोगे। मूत्रपुरीषोत्सर्गं जं शौचमकृत्वैव यो भुंक्ते स व
द्रुदोसो भवति। पीडा तत्रापि दारुणा चैव तस्मात्कृच्छ्रातिकृच्छ्रचांद्रायणानि कुर्यात्। अजी — मित्य
ष्टोत्तरसहस्रं क्षीरं सर्पिषा सह जुहुयात्। उद्यन्त्यं च जपेत्। विप्राणां तर्पयेद्द्यात्साज्यमत्स्पांदि
यायसम्॥ इति गुदपीडा—याम्। शातातपः। सुरालये जले तीर्थे शकृन्मूत्रं करोति यः। गुदरो य
गाभवस्तस्य पापरूपाः सुदारुणाः। मांसं सुरार्चनं नैव गोदानाद्धितये न च। प्राजापत्येन कृच्छ्रेण
शाम्यंति गुदजा रुजः। मासं सन्नशतीजाप्याद् पापं किं भवेन्नृणाम्। इति शातातपोक्त्या गुदरोगेषु
। अथार्शोहरम्। यो विप्रः सत्वे तनमादाय अध्यायपतिय जति जुहोति जपति च सोऽर्शोरोगवान्भ
वति। तत्र कृच्छ्रातिकृच्छ्रचांद्रायणानि कृत्वा पुरुषसूक्तम्। —धान्त्यं च म्। विष्णुहृदयं नाम अग्निवर्णं

॰वि॰ त्व।सतंतपिप्पलिकामध्यचांद्रायणंकुर्यात्।इदमायःप्रवहत्तऽद्वनमंत्रैर्जुहुयाज्जयात्।।इतिसद्धेप्र
५८ मेहे।नहन्ति ---- पशुगामीप्रमेहशूलीभवेत्।सप्तात्तप ना निकुर्यात्।व्याधिगुरुलगुभावेन
त्रयश्चित्तेगुरुलघुभावोद्रष्टव्यः।। इतिप्रमेहशूलेवायुपुराणे।ब्राह्मणःस्वर्णहारीचप्रमेहीजायतेन
रइतिवाक्यात्।। ब्राह्मणस्वर्णमित्यत्राभिप्रायमितिनारायणव्याख्या।अथाहवृद्धगौतमः।धेनुं
स्वर्णमयींकुर्यात्पूर्वेणविधिनाततः।सुवर्णशृंगींरत्नाढ्यांतथारूप्यखुरामपि।तथाचवर्णं
कंदद्याद्दृष्टभागेनपूर्ववत्।ब्राह्मणंश्रुतिसंपन्नंवेदसवं चकुटुंबिनम्।आचारवंतंधर्मिष्ठंद्विज
शुश्रूषणेरतम्।दानमंत्रः।दानंप्रमेहरोगघ्नमेतत्कार्य्यंमनीषिभिः।कृतेनानेनशाम्यंतिप्र
मेहादारुणाअपि।।इतिप्रमेहेवीर्यरोगेसुवर्णधेनुविधिः।लिङ्गरोगे।अथाहशातातपः।मातृ
गा मीभवेद्यस्तुलिङ्गंतस्यविनश्यति।चांडालीगमनेनैवहीनंलिङ्गःप्रजायते।तस्यप्रतिक्रि
याकर्त्तुंकुंभमुत्तरतोन्यसेत्।कृष्णवस्त्रसमाछन्नंकृष्णमाल्यादि भूषितं।तस्योपरिन्यसेद्दे
वंकांस्यपात्रेधनेश्वरम्।सुवर्णनिःकषट्केननिर्मितंनरवाहनम्।यजेत्पुरुषसूक्तेनधनदंवि
श्वरूपिणम्।अथर्ववेदविद्विप्रोअथर्वाणंसमापयेत्।स्वर्णंप्रतिकृतिंकृत्वानिःकविंशतिसंख्य
या।दद्याद्द्विजायसंपूज्यनिः।प यः स्यादितिब्रुवन्।तत्र।निधीनामधिपोदेवःशंकस्यप्रियःसखा।

तस्तरणिरसत्तम। दानमंत्रः। एतेन विधिना विप्रः पापात्प्रमुच्यते। मूत्रकृच्छ्रातुरस्तस्मादेतत्कु
र्यात्प्रयत्नतः॥ इति मूत्रकृच्छ्रहरपद्मदानम्। अथाश्मरीरोगे। तस्य सर्वरोगहरत्वात्। तथाचो
क्तं ब्रह्मांडपुराणे। सर्वपापप्रशमने सौवर्णं दानमुच्यत इति। अथाश्मर्य्याम्। तथा च शातातपः। मा
तुः सपत्नीगमने जायते चाश्मरीगदः। स तत्पापविशुद्ध्यर्थं प्रायश्चित्तं समाचरेत्। दद्याद्द्विजाय वि
दुषे मधुधेनुं यथोदिताम्। तिलद्रोणशतं चैव हिरण्येन समन्वितम्। ततः पापविशुद्धात्मा न ष्ट
कष्टं प्रजायते॥ इत्यश्मर्य्याम्॥ तथा चायुर्वेदे। महाश्मरीविनाशाय दानं लवणं स्मृतम्। इत्या
युर्वेदोक्तमश्मरीरोगे। अथ प्रमेहरोगे शातातपः। तापसीगमनात्पुंसः। प्रमेहो जायते गदः। त
त्र रुद्रजपेन्मोसंदद्याच्छक्त्या च कांचनम्। इति प्रमेहे। तथा चायुर्वेदे प्रमेहे स्वर्णदानं चेति वचना
त्। तथा सारसंग्रहे। कन्यागामी पर्वमैथुनी प्रमेही भवति। स चांद्रायणं कुर्य्यात्। प्रतिरूपदानं वा।
मातृगामी स्वसृगामी च मधुमेही भवेत्। पितृभार्य्यागामी जलमेही च भगिनीगामी इक्षुमेही
स्यादीनि श्वयवचनात्। अत्र तु पूर्वादधिकं प्रायश्चित्तं कल्प्यं। मात्रादीनामे निमित्तत्वाद
नित्यत्वाच्च। अथाप्यशक्तस्तत्र तप्तकृच्छ्रत्रयं कुर्य्यात्। प्रतिदिनं चत्वारिंशद्ब्राह्मणभोजनं दद्यात्। इ
ति नानाप्रमेहहरम्। तथा च चांडालीगामी सर्वप्रमेही व्याधिमांश्च भवति। स तत्तं कस्त्रिपणशातुरं

णभोजनं च कुर्यात्॥ इति बहुमूत्रे॥ अथ मूत्रकृच्छ्रे। शातातपः। गुरुजायाभिगमनान्मूत्रकृच्छ्रं प्रजा-
यते। तेनापि निष्कृतिः कार्या शास्त्रदृष्टेन वर्त्मना। स्थापयेत्कुंभमेकं तु पश्चिमायां शुभं दिशि। नीलव-
स्त्रसमाच्छन्नं नीलमाल्यादिभूषितम्। तस्योपरि न्यसेल्लोहपात्रे देवं प्रचेतसम्। सुवर्णनिःकषट्केन
निर्मितं यादसां पतिम्। जपेत्पुरुषसूक्तेन वरुणं विश्वरूपिणम्। सामविद्ब्राह्मणस्तत्र सामवेदं स-
मापयेत्। सुवर्णपुत्रिकां कृत्वा निःकविंशति संख्यया। दद्याद्द्विजाय संपूज्य निःकमात्रमिति ब्रुव-
न्। तत्र। यादसामधिपो देवो विश्वेषामपि पावनः। संसाराब्धौ कर्णधारो वरुणः पवनः सदा। इदं मं-
त्रं समुच्चार्याचार्याय यथाविधि। दद्यादेवमलंकृत्य मूत्रकृच्छ्रप्रशान्तये॥ इति मूत्रकृच्छ्रे। तथा च।
गुरुणा सार्द्धं संततं मत्सरी विधवागामी मूत्रकृच्छ्राख्यरोगवान्भवति। गुरुतल्पातिदेशप्रायश्चित्तं
कुर्यात्॥ इति च मूत्रकृच्छ्रे। अथ बौधायनः। सुरापो मूत्रकृच्छ्रवानिति। तत्र॥ सौवर्णं कारयेत्पद्मं प-
लेनार्द्धपलेन वा। यथाशक्त्या च मतिमान्पद्ममष्टदलं शुभम्। वित्तशाठ्यं न कुर्वीत भवेन्निःकुलम-
न्यथा। तिलद्रोणेऽधिके वापि ताम्रपात्रे जलान्वितम्। तस्य मध्ये तु तत्पद्मं निदध्यात्कुंकुमान्वितम्।
ब्राह्मणं श्रुतसंपन्नं दारिद्र्यं चाग्निहोत्रिणम्। आहूय गंधमाल्याद्यैर्विविधै [illegible] भ्यर्च्य शक्तितः। ततः
स्वर्णमयं पद्मं दद्यान्मंत्रमुदीरयन्। भगः पतंग द्युमणिर्द्वादशात्मा त्रयीपुनः। पद्येनानेन दत्तेन प्री-

समर्चयेत्तु उपचारैः षोडशभिरर्चाग्रैस्तैस्मवः शुचिः । सर्वशास्त्रार्थतत्त्वज्ञो ब्रह्मविद्यास्तुनिष्ठितः । होमं

तुकारयेत्तत्र ह्याग्नेय्यां दिशि शास्त्रतः । समिदाज्यतिलैश्चैव मूलमंत्रेण वै समित् । आज्येनैनारायणेति पण

लान्याहुतिभिर्हुवेत् । रोगी तथार्च्चयेद्देवं नारायणमनामयम् । मूलमंत्रेण विधिवन्नैवेद्यं च निवे

दयेत् । ततस्तां प्रतिमां दद्यात्प्राङ्मुखाय ह्युदङ्मुखः । मंत्रेणानेन विधिवद्भक्त्या परमया युतः । ना

रायण जगन्नाथ शंखचक्रगदाधर । पूर्वं जन्मनि यद्वादेर्विघाद्यैकृतं मम । तेनात्रवृद्धिपीडासे दाने

नानेन तोषितः । चक्रहस्त गदापाणे शमयास्तु जगत्पते । दानमंत्रः । एवं दत्वा तु तं देवं दत्तमाप्य ब्राह्मणे

ततः । विप्राणां भोजनं दद्यादष्टोत्तरशतं परम् । ततः स्वबंधुभिः सार्द्धं स्नात्वा भुंजीत वाग्यतः । एवं कृत्वा स

माप्नोति विरोगत्वं नरो भुवि । इत्यंत्रवृद्धिपीडाहरनारायणदानविधिः । तथा चात्र पीडायाम् । यैः पूर्व

जन्मनि वेश्मद्वनुरंत्रणाणि विछिन्नानि भवन्ति । पश्चाच्छीतज्वरः । अपानदाहश्च भवति । स तत्तदुपशा

न्तये कृच्छ्रातिकृच्छ्रं कुर्यात् । शतं विप्रांश्च भोजयेत् । उद्यन्त्वं च मयुतत्रयं जपेत् । पत्नीकारो रुद्रसूक्ते

न तु घृताभ्यां जुहुयात् । अश्वं वा महिषी प्रतिरूपं दद्यात् ॥ इति शेषमंत्रं द्वयामंत्रवृद्धिपीडायामथ

थ बहुमूत्रतारोगे ॥ शातातपः । दुग्धहारी च पुरुषो जायते बहुमूत्रकः । स दद्याद्दुग्धधेनुं च ब्राह्मणाय य

था विधि ॥ इति बहुमूत्रतायाम् । तथा च । सोदर्यांगामी बहुमूत्री भवति । स पराकद्वयं चत्वारिंशद्ब्राह्म

१६० ई सा

नलस्फोटवान्भवति। गोब्राह्मणेषु सत्येन समालभनमाचरन्। अथतुधावन्प्रहाराय हस्ताघ्रिस्फोटवान्भवेत्। इतिवचनात्। तत्र। कृच्छ्रातिकृच्छ्रव्रतपरो मासंगां परिचरेत्। गोग्रासजलशुश्रूषाकृत्कर्मा हि मुच्यते। पठंश्च गोमतीविद्यां शुश्रूषश्चापिवाडवान्। इतिहस्तपादनलस्फोटे। अथपार्श्वस्फोटे। काकखरादिमांसभक्षको भक्षयिता वा पार्श्वस्फोटवान्भवति। तत्र कृच्छ्रातिकृच्छ्रचांद्रायणानि व्यस्तानि समस्तानि वा व्याध्या गुरुलघुभावेन कर्तव्यानि। शिवसंकल्पसूक्तमष्टोत्तरशतं जपेत्। द्विजांश्च तर्प्पयेदिति॥ इति पार्श्वस्फोटरोगे। अथस्त्रीस्तनस्फोटे। याभर्त्तारमवमन्यमानावर्त्ततेजारमालिङ्गति तेन साई क्रीडति तमेवानुस्मरति तस्याः स्तनस्फोटाजायंते भागे चानवरतं शोणितं स्रवति। तया पंचगावो देयाः। एतेन रोगात्प्रमुच्यते। तिलात्त्रामग्निवर्णामिति सूक्तजपं कारयेत्। तत्रैव। शुकस्तनयुगलेनिःकद्वादशकं दद्यात्। अथवा धान्यं तिलश्च लवणं हरिद्रादानं च सर्वत्रैवानुवर्त्तते। उमामहेश्वरमातॄणां चापि पूजनं कुर्यादित्यर्थः। इति स्त्रीस्तनस्फोटे। अथात्र वृद्धो ब्रह्मपुराणे। यस्तु विघ्नकरो यज्ञे जायते सोऽत्र वृद्धमान्। वक्ष्यामि तत्प्रतीकारं दानहोमादिकर्म्मणा। कुर्यात्स्वर्णमयीं मूर्त्तिं शुभां नारायणस्य च। व्यावहारिकनिः काभ्यामेकेनाथ तदर्द्धतः। नारायणलक्षणयुक्तं हेमहस्तिरयदानं। पश्चात्स्पंचगव्येन स्थापयेत्कुंभोपरि। श्वेतवस्त्रेण संवेष्ट्यगंधमाल्यैः

त्रिंवेशश्च। संख्या चाष्टोत्तरशतामष्टाविंशतिरेव वा। संपातेन च पुनर्मृन्मयात्सर्वमेव हि शोफिनः। अतीम्या
मितिसूक्तेन यथालिङ्गं भवेन तु॥ वाससा तु जनं कुर्यान्मार्जयेद्दर्भमुष्टिभिः। आचार्याय च तद्वस्त्रं द
द्यात्सोपफीसदक्षिणाम्। मंत्रेणानेन विधिवद्दक्षिणाभिमुखः शुचिः। ऋषीणां प्रवरोऽगस्त्यो लोपामु
द्रापतिः प्रभुः। होमवस्त्रप्रदानेन तुष्टो व्याधिं व्यपोहतु॥ दानमंत्रः। ब्राह्मणेभ्यस्तथान्येभ्यो दद्याद्व
त्त्या यथा दक्षिणाम्। ततः स्नातः शुचिर्भूत्वा वस्त्रमाल्योपशोभितः। इष्टबंधुजनैः सार्द्धं भुंजीत ताय ह
रिंस्मरन्॥ इति सोफहरहोमवस्त्रदानम्। तथा च शातातपः। खस्तुनागमनेवापि भवेत्सर्वाङ्गसो
हाति फवान्। तेनापि निःकार्यमेष दानेन यत्नतः। दद्याच्छास्त्रविधानेन ततः पापात्प्रमुच्यते। इति शो
फरोगे। पतितैः सह संपर्केण वल्मीकरोगवान्भवति। समासार्द्धं गोमूत्रयावकाहारवान्भवेदिति।
उक्तं च यतः। पतितैः सह संपर्काद्वल्मीकव्याधिमान्भवेत्। गोमूत्रयावकाहारो मासार्द्धेण विशुध्य
ति। इति वचनात्। सहिरण्यं घृतं दद्याद्वल्मीकेशोपशान्तये। तथा। यदि तत्र कृमिर्जायेत तदा हिरूपदा
नं च सर्ववत्कुर्यात्। यतः। जायते यदि तत्रापि कृमिर्ब्रह्मविदां वरः। प्रतिरूपेण तोदद्याडोगशान्त्यर्थ
मात्मनः। इति ब्रह्मगीतासूक्तत्वात्। इति वल्मीकरोगे। अथ हस्तपादतलस्फोटे घोरो राघाज्ञामनुधाव
ति प्रहारं ददाति। अथ कपर्दिक्षेपे गोब्राह्मणादीनामसंगतत्वे शरीरालभनं प्राप्नोति। सहस्रपाद

क॰वि॰ मेप्रीतोसर्व्वजगन्नाथयो॥ दानमंत्रः। एवंकृत्वाश्वासकासीनीरोगस्तत्क्षणाद्भवेत्। इतिश्वासकासहर
१५ ध्वजपाशदानम्। घृतानडुहेनेनश्वासकासात्प्रमुच्यते। इत्यायुर्वेदवचनात्। श्वासकासं। अथशोफ
रोगे। योमार्ज्जेविपुलंपर्व्वताग्रंवल्मीकंवाकपित्थाश्वत्थासुरालयादिछायामासाद्यमलमूत्रंविमुंच
तिनिष्ठीवतिवासश्वयथुपीडयातिइतिनित्यंमूर्छितोभवति। उक्तंयतः। पर्व्वताग्रंनदीतीरंछायामारु
ह्यवानरः। मूत्रंपुरीषमथवाष्ठीवनाद्यंविमुंचति। श्वयथुव्याधिमाप्नोति॥ इत्याहशंकरवचनात्।
सइन्दुंविश्वतस्परीत्यादिनाघोत्तरायुतत्रयंजुहुयात्। अत्रव्याधेर्गुरुलघुभावोद्रष्टव्यः माषान्नं
सघृतंदद्याल्लवणेनसमन्वितम्॥ इतिशोफहरणे। बौधायनमतः। विप्रकर्त्तांचभोक्तृणांशोफीभव
तिमानवः। तस्यकर्म्मविपाकस्यवक्ष्येव्याधिविनाशनम्। दानंयुक्तिविशेषेणसर्व्वशोफविनाशन
म्। हेमवासःसमानीयवहुमूल्यंयदर्हति। मुक्ताफलंनिवध्नीयाद्दृश्यस्वप्राप्तेसमंततः। कुंकुमेना
ङ्कितंसम्यक्कृष्णागुरुधूपितम्। तंडुलोपरिसंस्थाप्यतंडुलाश्वास्वशक्तितः। उपचारैःषोडशभिरा
चार्यःपूजयेन्मुदा। युवंयुवासुवासाभ्यांमंत्राभ्यांपूजनंविदुः। युवंवस्त्राणिहिरण्यकः। युवासुवासइत्यपरो
मंत्रः। होमंचापिप्रकुर्वीतसमिदाज्यतिलैरपि। उद्बुध्यस्वइदंविष्णु——यस्मिन्सइत्यपि। मंत्रैश्चजु
हुयाद्देभिः। स्विष्टकृच्चततस्ततः। यत्कर्मणात्यरीरिचमितिमन्त्रेणहोमः। हुत्वाचसंपातान्यात्रेसर्वा

वतीह न संशयः। इति वचनात्। पुरुषसूक्तं सहस्रनाम्नां तैजपेत्। उद्यन्तं च तथा सप्त वश्या। अघोत्तरायुतम्

च नु घृताभ्यां जुहुयात्। पंचाशद्ब्राह्मणभोजनं दद्याच्च। वासुदेवसहस्र केशाभिषेकं कुर्यात्। हिरण्यं रक्त

वासोसि दद्यात्ह्वासोपशान्तये। तदुक्तं श्रीमहाभारते। हिरण्यं रक्तवासांसि पंचाशद्द्विजभोजनम्।

सहस्रकलशैर्विष्णोः स्नानं श्वासादिमुक्तये॥ इति श्वासकाशे। एतदु श्वासकासे पिनामत्रयम

घोत्तरायुतत्रयं जपेत्। तत्रापि ब्राह्मणभोजनमनुवर्त्तते। इत्युद्धुासकासे। तथा शातातपः। पिशु

नो नरकस्यान्ते जायते श्वासकासवान्। घृतं तेन प्रदातव्यं सहस्रपलसम्मितम्। सप्रयोगं सद

क्षिणमिति। इति श्वासकाशे। अथ पद्मपुराणे। श्वासकासयुतो मर्त्यो वंदीग्रहणतो भवेत्। वायव्य

मः। ध्वजं पाशं पलैके न कुर्यात्तु रजतेन वै। पलार्द्धेनाथवा शुद्धस्फटिकोपममाहृतः। रत्नैर्मरकतैः

सम्यग्वद्धमङ्गेषु सर्वतः। कुंभं चस्थापयेत्तत्र तिलानां द्रोणपंचके। कुंभस्योपरि संस्थाप्यो ध्वजः

पाशश्च भोजनः। सहिरण्यं द्वयं तत्तु ब्राह्मणाय निवेदयेत्। वस्त्रेण वेष्टयेत्कुंभं गंधमाल्याद्यल्ता

र्च्चितम्। कृतहस्तसमृद्धाय। आचार्याय कुटुंबिने। वरुणस्य तथा वायो। प्रीत्यर्थं विनिवेदयेत्। इ

तिविधिः। नमः पाशभृते तुभ्यं नमो ध्वजकरायते। जलाधिपतये तुभ्यं वायो सर्वजनप्रियः। युव

योः प्रीतये दत्तौ ध्वजपाशौ तु राजतौ। सुरेषु वंशे महात्मानौ दानेन ध्वजपाशयोः। श्वासकाशौ हरेतां

लोदरजलधेनुदानम्। जलहर्त्ता जलोदरीति वचनसामर्थ्यात्। तत्र कुर्यात्तु मकरं सम्यग्राजतं ताम्र
१४ मेव च। पलत्रयेण द्वाभ्यां वा यद्वैकेनाथवा कृतिम्। यद्वा विभवविस्तारे कुर्याद्धैर्विन्नमानतः। पुच्छे रत्ना
नि देयानि कांडे कांडे विचक्षणैः। नेत्रे स्वर्णमये कार्ये जिह्वामित्यं प्रकल्पयेत्। पादद्वये च दातव्यं घृतपा
त्रे द्वयं द्वयम्। कृष्णवस्त्रेण संवेष्ट्य चंदागुरु च चर्च्चितम्। जलपूर्णे ताम्रपात्रे स्थापयेन्मकरं च तम्। ब्रा
ह्मणं वृत्तसंपन्नं शुचिं दांतमलोलुपम्। प्रसाद्य गृहमाकार्य प्रणिपत्य विसर्जयेत्। केयूरैः कटकै
र्वस्त्रैः पूजयेदंगुलीयकैः। ततः प्रदद्यात्तद्दानं च हुत्वा होमं च मंत्रवत्। तत्र। नमामि पाशहस्तं तं
प्रार्थयेद्यादसां पतिम्। ददामि शास्त्रविहितं मकरं रोगशान्तये। जलाधिदेव देवस्य पश्चिमाशाः
पते विभो। उदरव्याधिनाशं मे कुरु दानेन तोषितः। दानमंत्रः। एवं दत्वा च नत्वा च तमाचार्यं विस
र्जयेत्। तोषयेद्ब्राह्मणान्सार्धं भुंजीत सबंधुभिः। इति जलोदरहरमकरमूर्त्तिदानम्। अथ यक्ष्मा
सकाशे। तत्र स्मरणात्। यो लवणमधुकुष्मांजिनादिमहादानानि कुरुते वादिविशिष्टदेशेषु ग्र
हणादिविशिष्टकालेषु च निषिद्धदानभ्यश्च प्रतिगृह्णाति स्वयमपात्रीभूतो वा स जन्मान्तरे ते
न पाप्मनाक्रान्तः पीड्यमानः श्वासी कासी कृमिकुक्षिश्च भवति। तदुपशान्तये महिषीं यथोक्तवि
धिना दद्याद्वित्तशाठ्यं च वर्जयेत्। काम्यं यद्दीयते दानं तत्सम्यक्सुखावहम्। अथ समयं तु दोषायभ

मम। प्रतिमायाः प्रदानेन प्रीतो भानुर्हयतिः। अमरं देहजं सर्व्वमाशु देवो व्यपोहतु। एवं दत्वा तु तद्दान
माचार्यो याति भक्तितः। शनैः कियदनुव्रज्य स्वापराधं क्षमापयेत्। अन्येभ्योपि ब्राह्मणेभ्यो दद्याच्छक्त्या च दक्षि
णाम्। एवं दानं पुराणोक्तं दत्वा मर्त्योऽतिभक्तितः। पूर्वकर्म्मविपाकोत्थं भ्रमं त्यक्त्वा सुखी भवेत्। इति
वौधायनवचनात्। भ्रमनाशनस्सूर्यमूर्त्तिदानम्। अथ प्लीहरोगे। विश्वासविषदाता च पञ्चभक्षक
स्तथा। असत्कर्म्मरतः पश्चात्प्लीहवान्भवति ध्रुवम्। शूली च जायते सोपि। विश्वासविषदश्च प्लीह ता
वान् जायते नर इति वचनात्। तत्प्रायश्चित्तमुक्तम्। पराकं कृच्छ्रं चान्द्रायणं कुर्यात्। अत्राशक्तौ स्वव
र्णनिःकचतुष्टयदानम्। तत्राप्यशक्तः प्रतिदिनं चतुर्विंशति ब्राह्मणेभ्यो भोजनं दद्यात्। व्याधेर्गुरुलघु श्रा
भावात् प्रायश्चित्तेपि गुरुलघुभावो द्रष्टव्यः। अपामार्जनस्तोत्रं जपेत्। इति प्लीहशूले वित्तेन दत्वा
वा योऽधीते सप्लीहोऽश्ववर्त्ती तच्छान्तये श्रीसूक्तमयुतत्रयं जपेत्। चतुर्घृताभ्यामष्टोत्तरशतं जुहु[illegible]यात्
। भृतकाध्यायपकोपस्कन्यादूषणतत्परः। प्लीहवान्सम्भवेद्विप्रः श्रीसूक्तं मुक्तये जपेत्। द्विजमि
ष्टान्नभोजनं च। इति प्लीहरोगे शातातपः। गर्भपातनजा रोगा यकृत्प्लीहजलोदराः। तेषामुपस
मार्थाय प्रायश्चित्तमिदं स्मृतम्। एषु दद्याद्द्विजाय जलधेनुं विधानतः। सुवर्णरूप्यताम्राणां प
लैस्त्रयसमन्विताम्। भूरि भोजनदानं च ततो रोगात्प्रमुच्यते। इति शातातपवचनात्। यत्प्लीहज

वि० तत्र योधत्तेपृथिवीं सर्वां सशैलवनकाननाम्। क्षीराब्धौ यस्य शय्या च देवदेवस्य शार्ङ्गिणः। सोऽनन्तः।
७३ प्र प्रीतो दानेन तु षोव्याधिं व्यपोहतु ॥ दानमंत्रः। एवं दत्वा तु तं नागमाचार्याय सदक्षिणम्। भूमौ प्रणम्य पि
रस्नाशनैः शतपदं व्रजेत्। आचार्येणाभ्यनुज्ञातः स्वगृहं प्रविवेश तत्सुधीः। ब्राह्मणान्भोजयित्वा त्र
स्वयं भुंजीत बंधुभिः॥ इति त्रिसर्प्पवातहरनागविधिः॥ तथान्यमेव च। विज्ञाय तिथ्यो विप्रांश्चैव यथा
दि प्रयोगतः॥ वक्ष्यामि तत्स्वरूपाकारं दानहोमादिकर्मणा। व्यवहारिकनिःष्कैस्तु त्रिभिर्द्वाभ्यामथापि
वा। एकेन वा स्वशक्त्याथ सूर्यं प्रति मां शुभाम्। कुर्याद्द्विहस्तां मूर्द्धां तु पद्महृदयसुशोभिताम्। रथोप
रिस्थितां रक्तवाससा समलंकृतां। कुंकुमेनाङ्कितां सम्यक्माल्यैरलंकृताम्। स्नापितां पंचसुध। ग्र
या ताम्रपात्रोपरिन्यसेत्। पात्रस्य च परीमाणं पलानामष्टकं विदुः। तदर्द्धं वा प्रकर्त्तव्यमेवं पात्रवि
निर्णयः। पात्रं तिलानामुपरि विन्यसेद्दर्भसंस्तृते। एवंभूतस्थितां सम्यगाचार्यः पूजयेत्सुधीः। गं
धमाल्यैः सुरभिर्हंसः शुचिषद्दिसृच। उपचारैः षोडशभिर्होमैः स्विष्टकृतस्य च। आग्रेतुत्तर
दिग्भागे कलशस्थापनं मतम्। अभिषेकादिकं सर्वं शान्तिकर्म पुरःसरम्। सुखालेपयेत्तु। उ
दङ्मुखः प्राङ्मुखो वा यद्यात्प्रतिकृतिं शुभाम्। तत्र। भमः हृषा गभस्तिमान्। सर्वदेवमयो ब्रह्म
जगच्चक्षुरेव तनुः। औषधादिप्रयोगेणमयाय दुर्हितं कृतम्। विप्राणां तेन जनितं यदभूद्भ्रमणं

आह। सर्प्पैस्तु यः खादयति स विसर्प्पी भवति। दानेनेपशमः कार्यो होमेन च विशेषतः। पलेन वा त
दर्द्धेन तदर्द्धार्द्धेन वा पुनः॥ कुर्यान्नागं सुवर्णेन फणपंचकसंयुतम्। माणिक्याणि च देयाणि एकैकं
फणपंचके। रत्नं पृष्टे तथा देयं वज्रं लोचनयोर्द्वयोः॥ एवं कृत्वा शुभं नागं कुंकुमेनानुलेपयेत्॥ र
क्तवस्त्रेण संवेष्ट्य ताम्रपात्रोपरि न्यसेत्। पात्रस्य च परीमाणं पलानामष्टकं वि
दुः। उपचारैः षोडशभिरर्च्चयेन्नागमुत्तमम्। आचार्य्यः सर्व्वशास्त्रज्ञो धर्म्मशास्त्रपरायणः। होमं
चापि प्रकुर्व्वीत समिदाज्यतिलैः शुभैः। नमोस्तु सर्प्पेभ्य इति त्रिभिर्म्मंत्रैर्यथाक्रमम्। अष्टोत्तरसह
स्रं तु अथवा ष्टोत्तरं शतम्। अष्टाविंशतिमेवाथ तदन्ते स्विष्टकृद्भवेत्। हुत्वा हुत्वा च संपातैः स्तु
त पात्रस्थितैस्तु तैः। आचार्योऽङ्गानि मार्ज्जेत रोगिणः सविसर्प्पिणः॥ त्राभिस्तु सर्प्पराज्ञीभिर्भूर्विभू
म्नादिभिः क्रमात्। स्वस्थो यथासौ भवति गात्राणामनुलेपनैः। गुग्गुलुं च सुगंधे च। देवदारुं च
निक्षिपेत्। ततः स्वकल्पतः कुर्यादभिषेकं जलैः शुभैः। नमोस्तु इति वान्येस्तल्लिङ्गकैरपि। हिरण्य
वर्णाः सुचयः पावमानानुवाकतः। आपो हिष्ठा मय इति शन्नो वात ऋतीरयन्। उत्सादितांगं तु चिरं
लिंपेदगुरुचंदनैः। ततः शुक्लांबरधरः शुक्लमाल्यानुलेपनैः। सम्यक् समर्च्चये द्रोगी गंधमाल्या
क्षतादिभिः। सर्प्पदैवत मंत्रेण आचार्योपि समर्चयेत्। अनंतरं सर्प्पराजमाचार्याय निवेदयेत्।

घ्र

प्र वि० नीया विधेः शुभैः केयूरकटकादिभिः। उपचारैः षोडशभिर्न्नैवेद्यैश्च मोदकान्। यथा देवे तथाचार्य्येप्यलं
१२ कारादि कल्पयेत्। आचार्यः परया भक्त्या गणेशानां प्रकल्पयेत्। अर्घ्यपाद्याचमनीयैर्न्नैवेद्यं च।
निवेदयेत्। छत्रध्वजादि तथान्यच्च कारयेद्वस्तुमुत्तमम्। निवेद्य पार्वतीं चापि देवदेवं महेश्वरम्। पू
जयेत्परया भक्त्या आचार्यः स्वयमेव हि। तथैव रोगवान्भक्त्या संपूज्य गणनायकम्। गणानां त्वेति नां
मंत्रेण तूष्णीं भूतस्तु पूजयेत्। मध्यंदिने तु संप्राप्ते प्रतिमां दक्षिणायुताम्। मंत्रेणानेन वि
धिवत्प्रदद्याद्भक्तिसंयुतः। उदङ्मुखोपविष्टाय विप्राय प्राङ्मुखो गदी॥ विनायक प्रपन्नार्त्तिहर
विघ्नविनायक॥ त्वं देवैः प्रार्थितः पूर्वं विघ्नं विघ्नपरायणैः। ब्राह्मणप्रवासरोधेन यज्ञान्नमम वे
कृतम्। पूर्वकर्म्मविपाकेन ह्यपरोन्मनादिकम्। जाड्यं वाप्यथवा चार्यं मूकत्वं वा गलग्रहम्॥
त्वदर्चायाः प्रदानेन रोगमाशु विनाशय॥ दानमंत्रः। चतुर्णां ब्राह्मणानां तु दद्याच्छक्त्या च द
क्षिणाम्। एवं कृत्वा गणपतेर्दानेन स सुखी भवेत्। इत्यपस्मारहर विनायकदानविधिः॥ शा
पि तातपः। ध्रुत्रोऽपस्माररोगी स्यात्स तस्यार्थविशुद्धये। ब्रह्मकूर्च्चत्रयं कृत्वा धेनुं दद्यात्सदक्षिणा
मिति शातातपवचनात्। अपस्माररोगे। अथ विसर्प्पवातरोगे। अमेध्यदाता विसर्प्पवान्भवति।
स मासं पयोव्रतमाचरेत्। गां दद्यात्स्वशक्त्या द्विजभोजनानि च। इति विसर्प्परोगे। वृद्धबोधायन

भिर्द्व्रोपयंत्नेतः। मंडपस्य चतुर्भागं वेदिकामुपकल्पयेत्। मंत्रैर्विनायकस्यापि पूजां कुर्यात्समाहितः
पंचामृतेन स्नपनं कृत्वा शुद्धेन चेतसा। एवं विनायकस्यैव ह्यधिवासनमिष्यते। चतुर्भिर्ब्राह्मणैः सार्द्धमा
चार्यः सर्व्वशास्त्रवित्। स्वयमेव हि आचार्योधर्म्मज्ञः सत्यवाक् शुचिः॥ कुलीनो ज्ञानवृद्धश्च सर्व्वप्राणिहि
तेरतः। रात्रौ जागरणं कृत्वा मध्यरात्रे वलिं हरेत्। मद्यमांसेन सहितं तथा दीरोदनेन च। आचार्यः।
प्रयतो भूत्वा मंत्रेणानेन सर्व्वतः। सर्व्वस्यां दिशि दद्याच्च वलिं वै सार्व्वकामिकम्। आदित्या वसवो रुद्रा दे
वा भूतानि सर्व्वशः। सर्प्पाः पिशाचाः शाकिन्यो डाकिन्यः पांथदेवताः॥ अपस्माराधिदेवश्च वेताला
दिग्रहास्तथा। वलिदानेन दत्तेन शान्तिं कुर्व्वन्तु सर्व्वशः। वलिदानमंत्रः। ततः प्रभाते विमले स्नाता अह
तवासः। भूषितः कटकैः स्वकैः। पूर्व्वस्मिंश्च कुण्डे च कुर्यात्समिदाज्यचरूत्कटम्। विनायकं समुद्दिश्य गण
नाह्वेति शङ्कितः। ॐ तत्पुरुषाय विद्महे वक्रतुंडाय धीमहि। तन्नो दन्ती प्रचोदयात्। अध्वर्युर्दक्षिणे
कुंडे कुर्याद्धोमं समाहितः। छंदोगः पश्चिमे चापि वामदेवेन होमयेत्। अथर्व्वाणश्चोत्तरे होमं कुं च
डे समाचरेत्। विनायकाय देवाय सर्व्वभूतहिताय च। गणपतये नियुक्ताय हुं फट् स्वस्ति स्वधा नमः
इत्युच्चार्य स्वाहा। समिदाज्यचरुं हुत्वा पूर्णाहुत्यान्तमेव च। आचार्यः प्रतिमां तां तु ब्राह्मणैः सह संयु
तः। आसने वेदिकामध्ये वितानादिसुशोभिते। तिलानामुपरि स्थाप्य गंधमाल्यैः प्रपूजयेत्। वस्त्रै

१२

प्र[illegible]जोऽसुधीः। श्रद्धाभ्यामनुवाकेन यथालिङ्गं प्रयत्नतः। दर्भाग्रमुष्टिनाचैव दर्भपिंजुलिकैरपि। हिर
ण्यवर्णाः शुचयः आपो हि ष्ठेति वै पुनः। पवमानानुवाकेन आपो अस्मांस्तथैव च। अन्यैश्च पावनैर्मंत्रै
र्यजुर्भिर्लोकपावनैः। ब्राह्मणान्भोजयेत्तत्र यथाविभवतो नरः। ततः स्वबंधुभिः सार्द्धं भुंजीयाच्छुद्धमान
सेः। गुरोरलीकेन कृताद [illegible] पतंत्राद्विमुच्यते। असुरारोगसंपन्नः स्वस्थो भवति मानवः। ततस्त्वा
धिषु चान्येषु दानमेतत्करोति यः। सर्वतद्दोषनिर्मुक्तो नीरजो भवति ध्रुवम्। इति वोधाय[illegible]नः। प्रा
ह वचनं पाकतः॥ छू[illegible]त्र पतेत्र वायुहर हरिणदानम्। अथापस्माररोगे। स्वामिनो गुरोश्च प्रतिकू
लो[illegible]पस्मारी भवति। अपस्मारो नाम दारुणो वायुविशेषः। तत्रापस्मारी चांद्रायणं कुर्यात्। सदसस्प
तिमद्भुतमित्यनेन च [illegible] घृताभ्यां जुहोति। देवब्राह्मणान्संपूज्य नमस्कुर्यात्। हिरण्यं दद्यात्। कयान।
श्चित्र आभुवदूतीति सूक्तं जपेत्॥ इत्यपस्माररोगे। तथा वोधाय[illegible]नः। ब्राह्मणश्वासरोधेन ह्यपस्मा
री भवेन्नरः। तदेतस्य प्रतीकारं दानहोमादिकर्मभिः। पलेन वा तदर्द्धेन तदर्द्धार्द्धेन वा पुनः। विनायक
काद्धमानेन आखुं देवस्य कारयेत्। तस्याप्यंगे प्रदेयानि रत्नानि विविधानि च॥ माणिक्याभ्यां प्रकुर्वी
त चक्षुषी तस्य शोभने। एवं प्रतिकृतिं कृत्वा विघ्नराजस्य शोभनाम्। राजतं च तथा नागमुपवीतं प्रकल्पयेत्
पुष्करं पद्मरागेण हस्ते रत्नं प्रकल्पयेत्। षोडशपत्रभसंयुक्तः शाभो द्वादशभिः स्मृतम्। पायुदन्तं सुवर्णेन दश्र[illegible]

तत्रोवायुः। तत्रैवोधायन ःकारयेद्धरिणंशुभं वायोर्वाहनरूपमम्। मृगेचराजतेकार्यवलित्रयसमन्विते।
तंडुलोपरिसंस्थाप्यब्राह्मणायनिवेदयेत्। आढकत्रितयेनह्वा तदर्द्धेवास्वशक्तितः। पत्नसुचतुर्दुसंस्था
प्यकांस्यपात्रचतुष्टयम्। वायुर्देवतमंत्रैश्चहोमंतत्रप्रकल्पयेत्। समिदाज्यचरुंहुत्वाशतमष्टोत्तरंद्वि
जः। एतदानप्रयोगज्ञोवेदवेदांगपारगः। अग्नेरीशानदिग्भागेसकुंभंस्थापयेत्सुधीः नवदेयानि
रत्नानिअलाभेस्वर्णमेवतु। निक्षिपेन्मृत्तिकांचापिरोचनांगुग्गुलुंतथा। चतुर्भिर्ब्राह्मणैश्चापिशा
न्तिकर्म्मप्रकल्पयेत्। आपोहिष्ठादिभिर्मंत्रैर्हिरण्यादिभिरेवच। पवमानानुवाकेनअभिषिंचे
च्चतंनरम्। तथापीठसमासीनमाहृतारोगिणंततः। वस्त्रेणवेष्टितंकुंभमादायचतुरोद्विजाः। च
तुर्वेदविदः शुद्धाअभिषिंचन्निमंत्रतः। ततःशुक्लांवरधरःशुभ्रमाल्यानुलेपनः। आचार्येणसमं
पूजांहरिणस्यसमाचरेत्। वायोःसप्तेनमंत्रेणतल्लिङ्गेनाथवापुनः। ततस्तंहरिणंदद्यात्प्राङ्मुखा
यह्युदङ्मुखः। मंत्रेणानेनविधिवदाचार्यायस्वशक्तितः। वायोचरसिभूतानामन्तस्त्वंलोकपाव
नः। प्राणोपानव्यानोदानसमानाह्यभिधानतः। व्यलीकंयत्कृतंदेवपूर्वजन्मनिमारुत। तद्धेत्वि
सर्वमेतद्धिपरमात्मायथैवहि। वाहनस्यप्रदानेनअपतंत्वविनाशय। दानमंत्रः। ब्राह्मणानां
चत[illegible]र्णीद्विस्वशक्त्या[illegible]चिरणंददेत्। आचार्यस्वहतंवासोगृहीत्वाशुक्लमेवच। तेनतस्यतथालिङ्गंमगा

१०वि० तत्र नैवेद्यं तथा। गरुत्मतो रूपयुक्तं विधर्म्मान्तरे सरकतप्रख्यः कौशिकाद्यर्णिपत्नाकेन विवर्जितः। छ
त्रं च छर्णि कुंककरयोस्तस्य कारयेत्। करद्वयं च कर्त्तव्यं तथा विरचितांजलिः। विष्णोः पुरश्च वेत्कार्यो सौ द्विभुजो
रचितांजलिः। श्वेतवस्त्रेण संवेष्टत्ताम्रपात्रोपरिस्थितम्। चंदनागुरुकर्पूरैः श्वेतमाल्यैर्विशेषतः पूजये
त्परया भक्त्या गरुडाह्वयमादरात्। होमं कुर्याच्च तत्रैव समिदाज्यतिलैस्तथा। ब्राह्मणः सर्व्वशास्त्रज्ञः कु
शलो निर्म्मलात्मवान्। वैष्णवो धार्म्मिकः शान्तः स्वाचारः संजितेंद्रियः। तत्र मंत्रो गरुडस्य यत्री। ॐ तत्पुरु
षाय विद्महे। ॐ तत्पुरुषाय विद्महे वायुवेगाय धीमहि। तन्नोऽमृतमथनः प्रचोदयात्। समिदा
ज्यतिलानां तु मन्त्राणतेयथाक्रमेत्। ततः शुक्लांवरधरः शुक्लगंधानुलेपनः। यजमानः स्वयं भक्त्या
शुचिः प्रयतमानसः। ब्राह्मणाय प्रदद्यात्तं हृदि नारायणं स्मरन्। मंत्रेणानेन संपूज्य वस्त्राद्यैश्च स्व-
शक्तितः। विहंगराज पक्षीशस्सुपर्णीतनया प्रभोः। सर्प्पाशन वियद्गत्तनष्टं जन्मनि यत्कृतम्। देव
द्व्यापहरणं यच्चान्यदपि कुत्सितम्। रूपनिंदाथवा द्रोहस्ते न यद्विकृतं मम। अपवादकवातेन संजा
तमथवापि यत्। विनाशयाशु तत्सर्वं श्रीनारायणवाहन। दानमंत्रः। एवं दानेन दत्तेन विधिनामु
निसत्तम। ततो निःकल्मषो भूत्वा नीरुजो जायते नरः सप्तजन्मकृतात्पापाद्दुज्ञातं वा तवेदकृतम्।
तन्मुक्तो जायते नूनं शक्तितस्तर्प्पयेद्द्विजान्। इत्यपवादकवैकृत्यहरगरुडदानविधिः। अथ याप

आचारवन्तं धर्म्मज्ञं वेदवेदाङ्गपारगम्। प्रतिग्रहनिवृत्तं च श्रुतिस्मृतिपथस्मृतम्। स्वयं भक्त्या समा-
नीयं पूजयेद्धस्तकुंडलैः। कुंकुमागुरुकर्पूरैरनुपवीताङ्गुलीयकैः। पूर्वोक्तेन विधानेन होमं मन्त्रं च
कारयेत्। मन्त्रेणानेन दद्यात्सर्वलोकनमस्कृतम्। लक्ष्मीपते देवकिनंदने शचीशाब्धिशायिंवच
सामगम्य। गोविंद दामोदर वातरक्तं विनाशयाशु दत्तयितारिवर्गः। दानमन्त्रः। एवं दानेन दत्तेन शी-
घ्रं रोगात्प्रमुच्यते। इति वातरक्तहर लक्ष्मीनारायणमूर्त्तिदानम्। यो नरः पूर्वजन्मनि लसुनं ता-
लफलं वा स्वल्लीलया ऽश्नाति स इह वातपित्तोद्रेकवान्भवति। तत्र चांद्रायणं कुर्यात्स्वशक्त्या प्रत्या-
म्नायं वा दद्यात्॥ इति वातपित्ते। तथा च कुंजरघातकोऽश्वघातको वा कृमिकुक्षिर्भवति। स नीलवृ-
षोत्सर्ग्गमन्यं चा वृषमुत्सृजेत्। गोमिथुनं वा दद्याद्ब्राह्मणानां शक्त्या भोजनं च। तथा च। मृते भर्त्त-
रि या नारी न वं वस्त्रं प्रधापयेत्। सा मृता नरकं याति कृमिकुक्षिस्ततः परमिति वचनात्। ततःस्मन्स प ५
जन्मनीत्यर्थः। तस्माच्चांद्रायणं कुर्यात्कृमिकुक्षिविनाशनम्। विंशतिं ब्राह्मणांश्चैव मिष्टान्नेन त-
र्प्पयेत्। इति वैदिकशास्त्रदर्शनात्। इति कृमिकुक्षिहरम्। अथापवाहुकवायुरुच्यते। देवद्रो-
पयोगेन जायते ह्यपवाहुकः। तस्य रोगस्य शान्त्यर्थं दानमेतदुदीरितम्। ब्रह्माण्डपुराणे वचनात्। सौ-
वर्णं राजतं वापि गरुडं कारयेत्सुधीः। ताम्रेण वा यथा पलतः स्वशक्त्या तात यथा नारद॥ नासां स्वर्णमयीं कुर्या

स..। त्रिरात्रेण शुद्ध्येत्॥ भुक्त्वा तत्स्पर्शसंसृष्टं जायते ऽतिकृशोदरः॥ त्रिरात्रं वैष्णवं कुर्यात्स तत्पापवि-
शुद्धये॥ इति पराशरवचनात्। इति कृमिलोदरकृशोदरः। तथा। औषधस्यापहरणे सूर्यवातः प्रजायते
।सूर्यायार्घः प्रदातव्यो मासं देयं च कांचनम्। इति सूर्यवाते। रक्तवस्त्रप्रवालादिहारी स्याद्रक्तवातवान्
।स वस्त्रं महिषीं दद्यात्पद्मरागसमन्विताम्। इति रक्तवाते। दंडापतानकयुतः शूद्रहन्ता प्रजायते।
प्राजापत्यं सकृत्त्वेकं दद्याद्धेनुं सदक्षिणाम्। इति दंडापतानकवाते। तथा च। सभायां पक्षपाती च
जायते पक्षवातवान्। निःकत्रयमितं स्वर्णं सदद्यात्सभ्यवर्त्तिने। इति पक्षवातवान्। तथा च। अयोनौ
चाभिगमनाद्भुजस्तंभः प्रजायते। सहस्रकलशस्नानं मासं दद्याच्छिवस्य तु॥ इति भुजस्तंभे। तथा च। छ-
र्दीवामान्नदानं स्याच्छत्रदानं भ्रमातुरे। इत्यायुर्वेदोक्तं भ्रमरहरं छर्दिहरं च। तत्रायुर्वेदोवनस्पति-
सेचनेन विसर्प्यास्त्र मुच्यते। इति विसर्पहरम्॥ अथ वातरक्ते। बोधायनः। लक्ष्मीनारायणरूपं
सुवर्णेन प्रकल्पयेत्। पलेन वा तदर्द्धेन तदर्द्धेनाथ वा पुनः। लक्ष्मीनारायणरूपलक्षणम्। पद्मा-
सनगतं कुर्याद्देवदेवं चतुर्भुजम्। दक्षिणे कारयेत्पद्मं शंखमूर्द्धकरेन्यसेत्। वामोत्संगगता ल-
क्ष्मीरत्नपात्रकरा भवेत्। वस्त्रैरत्यन्तरुचिरैः परिधाप्याति कौतुकम्। मुक्तादाम परिक्षिप्तं चंदनागु-
रुलेपितम्। मिथुनं दर्शनीयं तत्लक्ष्मीनारायणात्मकम्। ततो विप्रं समाकार्य शीलवन्तं गुणान्वितम्

दुदरगुल्मवान्। गुडधेनुः प्रदातव्या तेन तद्दोषशान्तये॥ इत्युदरगुल्मे। कन्यादानं च गुल्मके। इत्यायुर्वे
दवचनात्। तथा उदररोगे। सर्व्व वस्त्रं यथाशक्त्या गणेशं कारयेत्सुधीः। आखुयज्ञोपवीतादि सर्व्वं कृत
स्य विन्यसेत्। तिलाढकद्वये वस्त्रं सोपरिस्थापयेत्तु तम्। भूमौ शुद्ध प्रदेशे तु भक्त्या प्रयतमानसः। व
स्त्रेण वेष्टमतिमां पूजयेत्तं विनायकम्। चंदनागुरुधूपैश्च कुंकुमेन विलेपयेत्। पूजयेद्वाहेचा
पि यथा देवं तथैव हि। आश्वर्य तिलैर्होमं कुर्याद्दशोत्तरं शतम्। गणानां त्वेति मंत्रेण तथैवाज्या
हुतिः क्रमात्। तस्मै होमं कृतवते सर्व्वमेतत्प्रकल्पयेत्। शुक्लपक्षे चतुर्थ्यां तु महा— सुभक्तितः
पूजयेत्तं तथाचार्य्यं वस्त्रेण प्रयतः शुचिः। सर्व्वकर्म्मविपाके न इहकर्म्मकृतेन वा। स्त्रीहृद्गुल्मोदरी
स्नाघ्या प्रदराव्याधयस्त्वये। सर्व्वेन ष्टप्रत्तिते ह्यस्मिन्दानेदत्तेन संशयः। मंत्रेणानेन दद्याच्च भक्त्या
परमया पुनः। विनायक गणेशस्य सर्व्वदेवनमस्कृतम्। पार्व्वतीनंदन मम समयव्याधिमोदरम्।
तव दानेन दत्तेन शक्तेनाखुरथेन हि। नाशयाशु महेशानपुत्र भक्त्यानमे गदम्। एवं कुर्यात्क्षणप
तेर्दानं व्याधिविनाशनम्। इति गुल्मादुदररोगहरगणेशदानम्। अथ। अनिवेद्यसुरादिभ्यो
भुंजानो जायते भ्रमरः। वाति मान्नर इति पाठो वा। स भोजयेद्धृतं विधान्सहस्त्रं वा प्रमाणतः शांत
... रणात्। इति भ्रमरहरम्। तथा च। अभक्ष्यभक्षणाच्चैव जायते कृमिलोदरः। गोमूत्रं पावकाहा

वि० [illegible]होमं तत्र प्रकारयेत्।समिदाज्यं तु संस्कृत्य शतमष्टोत्तरं द्विजः।अष्टाविंशतिरेवाथ दानमंत्रेण
कारयेत्।वायो चरसि लोकानां रक्षकस्त्वं लोकपावनः।वाहनस्य प्रदानेन वातव्याधिं प्रणाशय।दा
नमंत्रः।अनेन कृतमात्रेण यथोक्तेन विधानतः।वातव्याधिविनिर्मुक्तो नीरुजः सुखमश्नुते।इ
ति वातव्याधिहरमृगदानविधिः।तथाच गुरुप्रत्यर्थी गुल्मवातवान्भवति।अस्य प्रायश्चित्तं वातगु
ल्मवान्यदि भवति तर्हि मासमेकं पयोव्रतमाचरेत्।मुंचामीति [illegible] त्र्यंबकं चानुवाकाभ्यामयुतं जुहुयात्
वातघ्नावा तभेषजमिति जपेत्।अन्नदानं च कुर्यादिति।वातगुल्मरोगे।तथाच पद्मे।गुल्मी स्याद
त्यजागमइति।बौधायनवचनात्।सौवर्णं राजतं ताम्रं कारयेत्कांस्यतोपि वा।यद्वा। [illegible]र्कमूलका
ष्ठेन विघ्नं विभवतो नरः।पुष्करं कारयेद्धेमं सौवर्णं लोचनद्वयम्।आखुं च कल्पयेत्तस्य यथादे
वो विनिर्मितः।नागयज्ञोपवीतं च कल्पयेत्तस्य गुल्मवान्।अनंतरं च वासोभिश्चंदनागुरुपूजि
तम्।सहिरण्यं ब्राह्मणाय स्वशक्त्या पूजिताय च।कृतहोमाय दात्वाय सर्वशास्त्रार्थदिने।मंत्रेणाने दे
न विधिवद्दक्षिणाभिमुखाय तु।दद्यादुदङ्मुखः स्थित्वा ध्यायन्देवं गणेश्वरम्।विनायक गणेशा
य [illegible] सर्वदेवनमस्कृतम्।पार्वतीनंदन [illegible] मम गुल्ममाशु विनाशय।दानमंत्रः।कृतेनानेन दानेन नी न
रोगो जायते नरः।इति गुल्महरविनायकदानम्।तथाच शातातपः।विकारांश्च कृता हत्वा भवे

छत्रं च स्त्रियं परस्य बलाद् आक्रम्योपभुंक्ते स सर्वांगः संधिषु धनुर्वातरोगवान् तु चिरसानुस्न ज्वरवांस्तीव्रपी
डवानपि भवति। तदुपशान्तये प्रतिरूपदानं महिषी च। कृच्छ्रातिकृच्छ्रं चांद्रायणानि वा कुर्यात्। उद्यन्नद्यइ
त्यृचं जपेत्। धनुर्वातरोगोपशान्त्यर्थं प्रतिरूपं द्विजोत्तमे। प्रदद्यान्महिषीं कृष्णां सवत्सां सज्जपयत्नतः॥
इत्येतदुक्तं ब्रह्माण्डपुराणे। तत्र सहस्रनामस्तोत्रं नामत्रयं वा जपेत्। यतः नामत्रयं जपेन्मर्त्यो रोगशान्त्य
र्थमात्मनः। सहस्रनामकं चापि शास्त्रसम्यग्विधानतः॥ इति महाभारतवचनात्। नामत्रये छंदांसि
ऋषयो देवताश्च प्रदृश्यंते। ऋग्गायत्री पुरुषप्रदीसततत्स्तुवेति छंदांसि। वसिष्ठः कश्यपो नारदश्चे
त्यृषयः महाविष्णुर्महानरसिंहो महावराहश्चेति देवताः। सर्वरोगोपशान्तय इति शंकरगीतावच
नात्। पुरुषसूक्तं जपेत्। ततः पापदयान्मुक्तो रोगाद्भवत्येव॥ इति धनुर्वातरोगे। योस्वात्वा हुत्वाश्रा ज
चब्राह्मणो भुंक्ते स हिक्कावातरोगी भवति सत्रीणि चांद्रायणानि निःकृतिं कृच्छ्राब्दा तथा चरेत्। ---
--- ग्निवर्णमित्यादि सूक्तं जपेत्। इत्यङ्गिरोवचनात्। सुवर्णं ब्राह्मणे दद्याद्धिक्कारोगविनाशनमि
ति। इति हिक्कारोगे। अथ वायुपुराणे बौधायनः। वातव्याधियुतः सोपीति। तत्राह हरिणं कारयेत्ता
म्रे सुदृढं दशभिः पलैः। तदर्द्धेनाथ कुर्वीत शृङ्गे रूप्यमये दृढे। तं हलोपरि संस्थाप्य ब्राह्मणाय निवेद
येत्। आढकत्रितयं यद्वा तदर्द्धं वाप्यशक्तितः। स्थाप्यं चतुर्षु पादेषु कांस्यपात्रचतुष्टयम्। वायुदैवतमं

वि० तत्रैव परान्नविघ्नकरणादजीर्णत्वं प्रजायते। तथा पराशरः। परान्नविघ्नकरणादजीर्णमुपजा
यते। लक्षहोमं प्रकुर्वीत प्रायश्चित्तं यथाविधि। इत्याजीर्णहरलक्षहोमः। मंदोदराग्निर्भ... ते सर्व
दानिकरप्रदः। प्राजापत्यत्रयं कृत्वा भोजयेच्च शतं द्विजानिति। पराशरः। इत्यग्निमांद्यहरप्रायश्चि
त्तम्। अथ गुल्महरणेषु। तत्र वातव्याधौ। गुरुवधप्रत्यवायी वातरोगी स नामत्रयेण घृतलक्षहो प
मं कुर्यात्॥ यतः। वातरोगी जपं होममेकं वा पुनत्रयम्। नामत्रयेण कुर्वीत प्राह शंभुरुमापतिरि
ति लिङ्गेभिधानात्। इति वातरोगे। तत्रैव वातरोगे कारणान्तरप्रति कृत्यन्तरम्। चोच्यते। देवब्राह्म
णान्नापहरणात्स्वामिकार्यद्रोहाच्च वातरोगी भवति। अस्य प्रायश्चित्तं कृच्छ्रातिकृच्छ्रचांद्रायणानि
वा कुर्यात्। अग्निरश्मिसंख्यं वै जपेत्। अनेन च मंत्रेण प्रहोमं कुर्यात्। वातआवातमंत्रेणाजपेदयुत
संख्यया। अग्निरश्मिमंत्रं च जपेत्तथैव जुहुयादपि। इति वायुपुराणे स्मरणात्। इति व्याधिहर
णे। तथा च। विश्वास्य विषदाता च अभक्ष्यस्य च साधकः। वातव्याधिमनासुखोभवेदितिर्मम। तत्रत मदि
दसुभविनाशार्थं सप्रयोगं हिरण्यं दद्यात्॥ इत्यादि वातरोगे। अथ च। निक्षेपवस्तुनो भोमान्मोह
यित्वा परांस्तथा। नरस्तून्मादवानुन्मत्तो भवतीति वचनात्। पुतायति। चांद्रायणं कुर्यान्मंत्रान्सार
स्वतां जपेत्। दद्याद्वृषं च विप्राणामित्युन्मादः प्रणश्यति। इत्युन्मादवायौ। यः पुनरदत्तयोनिमनि

ऽपरायुतं जुहुयात्तत्तस्माद्रोगात्प्रमुच्यते ॥ इति । चत्वारिंशद्ब्राह्मणभोजनं दद्यात् । इति मृतकल्पाग्नौ । तथा वो
धायः । अग्निमांद्यं भवेत्तस्य स्वर्णताम्राग्निविनाशकः । सौवर्णाश्च वसुराः कार्याः श्वेतवस्त्रेण वेष्टयेत् । श्वेतमा
ल्यैः श्वेतगंधैर्धूपं दद्यान्मधूत्कटम् । तंदुलोपरि संस्थाप्य पुनरेतत्पूजयेत्सुधीः । तंदुलानां परिमाणं द्रो
णमुदीरितम् । आग्नेय्यां दिशि होमं च समिदाज्यतिलैरपि । आचार्येण विनीतेन सर्वशास्त्रार्थवेदिना ।
पं॰वा वह्नेर्वेनसु कर्तव्यं तत्रैनिमान्स्मृताः । अग्निमूर्द्धेति मंत्रेण समिद्धोमः प्रशस्यते । अग्नेनयेत्याज्यहोम
अग्निनाग्निस्तिलाहुतैः । मंत्राध्ययोक्तमार्गेण अग्निसंस्थापना भवेत् । अग्नेः प्रागुत्तरे देशे शुभं कुं
भं च विन्यसेत् । प्रणीतामोक्षपर्यंतं कृते स्नानं विधीयते । आपोहिष्ठेति त्र्यृचं हिरण्येति चतुष्टयम् ।
पवमानानुवाकेन मार्जयेद्रोगिणं ततः । शन्नोवातानुवाकेन शांतिं चैव प्रकल्पयेत् । तस्मै हुतवते
य रोगी प्राङ्मुखः । पूजितो यथाशक्त्या दद्यात्तु सदक्षिणम् । देवानां यो मुखं हव्यवाहनः सर्वपूजित
। तस्त्वं वाहनं पूज्यं देवैः सेन्द्रैर्महर्षिभिः । अग्निमांद्यं पूर्वकर्मविपाकोत्थं च यन्मम । तत्सर्वं नाश
यत्विप्रं जठराग्निं प्रवर्द्धय ॥ दानमंत्रः ॥ एवं विप्राय यो दद्यादग्नेर्वाहनमुत्तमम् । बलवानग्निमान्
भूर्यो जीवेद्वर्षशतं सुखी । ततः स्ववंधुभिर्विप्रैः स्नात्वा भुंजीत मानवः । इत्यग्निमांद्यहरमे[illegible]नम् ।
[illegible] । आयुर्वेदे अग्निमंदः कदन्नदद इति प्राक्यात् । होमंमंदाग्निरोगे चेति प्रतिवचनम् । इत्यायुर्वेदमंदा

क॰वि॰ ...दानमंत्रः। एवं गरुडदानं हि दत्वा दाता सुखी भवेत्। आचार्यं ब्राह्मणान् भोज्य प्रणिपत्य विसर्जये
दे॰ त्॥ इति कामलानाशन गरुडदानविधिः॥ अथाजीर्णे। अन्नहर्ता त्वजीर्णान्नो भवतीति श्रुतं पुरा। तत्र
स्य प्रायश्चित्तम्। उपवासत्रयं कृत्वा वा वस्थानुसारेण कुर्यात्। अग्नीरश्मीत्यनेनच मधुघृताभ्यां होमं
चाष्टोत्तरशतं सहस्रं जपेद्यस्य भुक्तं न जीर्य्यते। न निष्ठोर्द्धः कथंचन। ध्यात्वा चान्तरमंत्रस्य त्वग्नि
रश्मीत्यृचं जपेत्। इति वचनात्। देयमन्नं यथाशक्त्या विप्रेभ्यो भक्तितः स्वयम्। बुभुक्षितेभ्योप्य
न्येभ्यो दीनांधवधिरेष्वपि॥ इत्यजीर्णहरणम्। वाग्मृषाकस्य कावनस्पसंवंध्यन्नं भुक्त्वाऽजीर्णतो
नितेवलं शूलरोगवान् पि भवति। भुक्त्वास्ते यस्तु शूद्रान्नमव्रतस्य द्विजस्य वा शूलव्याधिर्भवेन्नित्यमजी
र्णान्नातिपीडितः। इति वृहच्छातातपस्मरणात्त्रोपवासत्रयं कुर्यात् छुद्धं चरजतं पलत्रयसम्मितं
श्रोत्रियाय कुटुंबिने विप्राय दद्यात्। एतद्रूप्यामिते विप्र शुद्धं रजतमादरात्। अजीर्णान्नभवं शूलरो
गं हरत्तु मे विभो॥ इति दानमंत्रः। भूरिभोजनं च स्वजनानां स्वशक्तिमुदीर्य इत्यजीर्णान्न शूलरोगे
। गोमांसखादको मंदजठराग्निर्भवत्यपि। सोग्निसूक्तं जपेन्नित्यं श्रीसूक्तं च विशेषतः। इति वृहत्प
राशरस्मरणात्। स गां दद्याद्वा गवाह्निकं च दद्यादिति। मंदत्वेराग्नौ। यः पुनः कारणमन्तरेण गरेद र
त्वा प्रमापयति स मंदजठराग्निर्भवति। मृतकल्पश्च जायते तत्राग्नीरोडश्रूक्तेनच मधुघृताभ्यामष्टो

नस्य। दीक्षितः। द्वीपसङ्क्रे न जायते रक्तदुष्टदृक्त्वस्तत्पापविशुद्ध्यर्थं प्राजापत्यानि षट् चरेत्। इतिरक्त
दुष्टदृष्टौ। नेत्रशूलप्रतीकारोऽन्यत्रको मुखरोगादिमध्ये [illegible] लिखितो विलोकनीयम्॥ अथ कामला
नाशने बौधायनमतः। कामली भक्तचोरः स्यात्तस्य वक्ष्याभि निःकृतिम्। कुर्याच्च प्रतिमानाभ्यां वि
ष्णोर्वाहनमुत्तमम्। सुवर्णेनाति शुद्धेन माल्यैः समर्चयेत्। सर्वशास्त्रार्थतत्वज्ञो वेदस्य धर्मपा
ठकः। ब्राह्मणस्त्वर्चितो भक्त्या यजमानेन भक्तितः। उपचारैः षोडशभिर्विष्णुमभ्यर्चयेत्तथा।
मंत्रो गरुडगायत्री सवादोपरिकीर्तितः। समित्त्वाज्ये च कीर्तिते इति पाठे वा। तिलहोमो व्याहृति हृ
भि स्तुतः स्विष्टकृतं ततं यजेत्। गरुडगायत्री वैकृतस्तस्य गरुडदानेवक्ष्यते। स्थापयेद्व्रणं कुंभं सि
त [illegible] वस्त्रेण वेष्टितम्। निक्षिपेन्नव रत्नानि मृत्तिकां रोचनां तथा। अश्वस्थाङ्गजस्थाना वल्मीका ना
त्संगमाद्ध्रदात्। पंचत्वक्पल्लवसमं पूरयेत्सुगंधवारिणा। तेनाभिषेकं कुर्वीत आपोहिष्ठादिभिः क्रमा
त्। हिरण्यवर्णेति तथा पवमानेन चैव हि। ततः स्नात्वा शुचीरोगी विष्णोर्वाहनमुत्तमम्। सदक्षि
णं मुदायुक्तः प्राङ्मुखायनिवेदयेत्। मंत्रेणानेन विधिवदाचार्याय ह्युदङ्मुखः। श्रीकृष्ण परमा
नंद जगतः परिपालक [illegible] पूर्वं जन्मनि यत्पापं भक्तचौर्यं मया कृतम्। तेनावाप्तं वैरूप्यं जन्म च
[illegible] हानि इः सह। कामलोत्थमिदं देवत्त्ववाहनदानतः। विनाशयाशु [illegible] जगतां पालकोह्य।

त

ब्रवीत् । नरकान्ते स कुर्वीत प्रायश्चित्तं यथाविधिः । प्राजापत्यान्स कुर्वीदं त्रिंशतछास्त्रविनिश्चयात् ।त्र
ता त्ते कारयेन्नावं सुवर्णपलसंख्यया । ताम्ररूप्यमयं चैव ताम्रपण्यावाहकानिषट् । निः क हेम... कर्तव्या
देवः श्रीवत्सलांछनः । पट्टकूलेन संवेष्ट्य पूजयेत्तं विधानतः । नावं द्विजाय तां दद्यात्सर्वोपस्करसं
युताम् । तत्र । वासुदेव जगन्नाथ सर्वभूताशयस्थित । पातकार्णवं मां तारय प्रणतार्तिहृत् । पूर्व
कर्मविपाकोत्थमेधत्वं मम केशव । त्वं नाशय जगत्स्वामिन्शुभदृष्टिप्रदो भव ॥ दानमंत्रः । इत्युदीर्य मग्नं
प्रणम्याथ ब्राह्मणं तं विसर्जयेत् । अन्येभ्योपि यथाशक्त्या विप्रेभ्यो दक्षिणां दिशेत् । इत्यक्षिन्नवली
वर्द्धेषु । इति कुष्मरूदत्तारत्वहर सितवृषभदानम् । तथा । नरस्तौनियतेते चैव जायते केकरेक्षणः
त दद्याद्रुक्कमयीं धेनुं सत्तत्पाकशान्तये । इति केकरनेत्रत्वहर रत्नधेनुदानम् । मार्जारे निहते चैव
जायते पिंगलेक्षणः । तेन वैदूर्यरत्नानि दातव्यानि स्वशक्तितः ॥ इति नेत्रपिंगलत्वहर वैदूर्यर
त्नदानम् । तथा । परोद्वेहासहत्क्रामणः सगो दत्वा स मौक्तिकं । इति काणत्वे । तथा । रीतिहृत्पिंगला नि
क्षः स्यादुपोष्य दिवसं सतः । रीतीपलशतं दद्यादर्चयित्वा विधानतः ॥ इति पिंगाक्षत्वे घृतचोर
स्तु पुरुषो जायते नेत्ररोगवान् । उपोष्य दिवसं दद्याद्घृतधेनुं विधानतः ॥ इति नेत्ररोगे । तथा
। शाकहारी च पुरुषो जायते नीललोचनः । ब्राह्मणाय प्रदद्यात्स महानीलमणिद्वयम् । इति नीललोच

भक्त्यासंपूज्य विधिवत्केयूरकटकादिभिः। मंत्रेणानेन विधिवत्प्राङ्मुखो व्याधितो रोगवान्। देवदेव जगन्ना
थ नारायण जगन्मय। उष्णं वापि दलं वापि क्लिन्नं शुष्कमथापि वा। रक्तं वाप्ययनं कोध्य। वैधायनः नक्तं
ध्यं जायते तस्य योगवानयनद्वये। करोति शूलप्रदेपं तस्य मे विनेः कृतिम्। विष्णोः श्रीगोपवेषस्य यथाश स्प
क्त्या च भक्तितः। सुवर्णं प्रति मां कुर्याद्देवकीवादनतत्पराम्। बर्हापीडकसंयुक्तां द्विभुजां पीतवाससाम्।
कारयित्वा शुभाकारां पत्राल्पसुचिवारिणा। संवेष्टय पीतवस्त्रैस्तां गंधमाल्यैः समर्चयेत्। तंडुलो
परि संस्थाप्य यथाविभवतः स्वयम्। पूजां च मूलमंत्रेण कुर्याद्देवस्य भक्तितः। आचारः सर्वशास्त्रज्ञो वे
दवेदाङ्गपारगः। इदं विष्णुः प्रतद्विष्णुर्विष्णोर्नुकमिति क्रमात्। मंत्राध्यायोक्तमार्गेण त्र्ययैः संस्थापनं भ
वेत्। प्रणीतामोक्षपर्यंतं कृत्वा देवं प्रपूजयेत्। देवस्य दद्यान्नैवेद्यं हविः सर्वं समंततः। अष्टोत्तरशतं चापि
मूलमंत्रेण वैष्णवम्। आज्यं चरुं जुहुयाद्रोगी प्राङ्मुखः प्रयतः शुचिः। मंत्रेणानेन विधिवन्नमस्कृत्य सा
ति भक्तितः। गोविंद गोपीजनवल्लभेश कंसासुरघ्न त्रिदशेशवंद्य। गोवर्द्धनाद्रिप्रवरैकहस्त संतिनाशे २
घ गवाम श्रीश। गोचत्तु खादेवनिरोधजेन पापेन मे नाथ तमोधिमेतत्। त्वदीयदानेन सुतुष्टरूप न
क्रोधमेतत्कमपाकुरुष्वादानंनव।। एवं कृत्वा प्रतीकारं गोपवेषधरस्य तु। तत्क्षणात् देहसुखी
जायते नात्र संशयः।। इति नकांध्यनाशनगोपालमूर्तिदानम्।। माध्वहंता भवेद्यस्तु इतिशातातपो:

थः॥ दृष्टिभ्रम्मनि ब्राह्मणमंदिरे देवालये वा प्रज्वलन्तं दीपं नाशयति सोऽन्यजन्मनि नेत्रतिमिरी भवति॥
अत्र मनुष्यकाशमंचांजपं जलमभिमंत्रयन्सर्वाङ्गेषु प्रोक्षयन्व्याधिनिर्मुक्तो भवति। महादेवस्य सह
स्रेकलशाभिषेकं कुर्यात्। दीपिकां भंजयित्वा तु तिमिरवान्भवेदिति वचनात्॥ इति तिमिररोगे॥ अ
थ पुराणे। जन्मान्तराक्षिरोधेन जायन्ते दृष्टिवेदनाः। वक्ष्यामि तत्प्रतीकारं ब्रह्मणा भाषितं पुरा।
अक्षादिरोगेऽपि। बृहदुक्तं अक्षिनिमीलनं शलाकादुष्टचूर्णादिभिर्दूषणम्। दीपादिदेवविप्राणां
परगृहे तेजोनिरसनाद्विकृतादिकरणम्। दुष्टौषधोपदेशदानोचितया पद्मोरत्ने द्वे हेम्नो सुविस्त
ते। कर्त्तव्ये चाक्षियुगलं मालिकाभ्यां सुयोजितम्। पादयोः स्वर्णकटकं रत्नाभ्यां परिकल्पयेत्। ग्रै
वेयकं स्वर्णमयं ग्रीवायामपि विन्यसेत्। नासिकां वज्रवैडूर्यमौक्तिकैः परिकल्पयेत्। वस्त्रैर्नानावि
धैर्नेत्रमलं कृत्य शुभाकृतिम्। स्थापयेत्पुरतो विष्णोः प्रीत्यर्थं पतगाधिपम्। गंधपुष्पाक्षतैर्वस्त्रैः
पूजयेद्ब्राह्मणोत्तमम्। वेदवेदाङ्गकुशलं ब्रह्मविद्यासुनिष्ठितम्। होमश्च तत्र कर्त्तव्यो मंत्रैस्तद्दे
वतैः शुभैः। षड्वा गरुडगायत्र्या समिदाज्यतिलादिभिः। अग्नेः प्रतिष्ठा कार्या तु गृह्योक्तविधिना।
ततः। गरुडगायत्री वेकुत्स्य हरे गरुडं दानेदर्शयिष्यते। पुण्याहवचनं कार्यं ब्राह्मणैर्वेदपारगैः। स्व
स्तिभिर्वाचनं तु निर्वाणं दोषोपशान्तये। तस्मै दुतवतैर्दाक्षेरि प्रीत्यर्थमाहतः। शौरिः। श्रीविष्णुः। भ

स्नानेवापिसमाचरेत्। सतीव्रारोगयुक्तोपिमुच्यतेब्रह्मभोजनात्। इतिवचनात्। बहुभोजनदानेनशूल
रोगाद्विमुच्यते। इति। तथाशातातपः। शूलीपरोपतापेनजायतेतस्यमाणतः। सोन्नदानंप्रकुर्वीतजपे
द्रुद्रेत्रियंवदेत्। अथनेत्ररोगेस्माह। यःपरदृष्टिविघातकृत्। योभिषग्मिथ्योपचारेणव्याध्याधिक्यकृ
त्। यःपरस्त्रीषुकुटिलदृष्टिंप्रेरयतिसनेत्ररोगीभवति। अस्यप्रायश्चित्तेपराकंचांद्रायणंचकुर्यात्।
अत्राशक्तः प्रतिदिनंपंचाशद्ब्राह्मणभोजनंकुर्यात्। अत्राप्यशक्तस्ययःसमुपर्वसिवेत्तिनाभ्याम
ष्टोत्तरंसहस्त्रंजुहुयात्। यावद्रोगमोक्षस्तावच्चक्षुर्मेदेहीतिमंत्रंजपेत्। आज्यसहितंहिरण्यंचदद्यात्
। तथा। मुक्तात्रंब्राह्मणेदद्यान्नेत्ररोगोपशान्तयेइतिब्रह्माण्डपुराणेवचनात्। इति नेत्ररोगे। अथप
नयनद्वयेनदंपत्योः प्रवृत्तंमैथुनंयःकामान्निरीक्षतेसनयनपूयरोगार्तोभवति। चक्षुर्मेदेहि। अ
क्षिभ्यामितिमंत्राभ्यांआज्यहोमंकुर्यात्। इतिपूयनयने। अथमंददृष्टिहरणम्। उच्छिष्टःसहसान्नु
द्यंतंमध्येगतंअस्तंयान्तंआदित्यंनक्षत्राणिवानिरीक्षतेसमंदीभूतनेत्ररश्मिर्भवति। समघन्त
मित्रमहमित्यादिऋचेनचरुघृताभ्यांहोमसंयुतंकुर्यात्। तयोर्घृतेनचक्षुरुणारश्मिहीनोद्धृताश्मने
त्वद्धृपादपुनंसम्यगितिशास्त्रविनिश्चयः॥ कूर्म्मपुराणेवचनात्। निःकद्वादशाकंदद्याद्वासांसिर
क्तानातंचेतियतोवासांसिरक्तानिदत्वाव्याधिनाप्रायेच्चदृष्टः। इतिमंददृष्टौ॥ अथतिमिरहरम्

कोष्ठस्थं सर्वं शूलविशांतनम्। दानं यद् ब्राह्मणेभ्योक्तं तत्सम्यक् कथयाम्यहम्। पलेनवातदर्द्धेनयथाशक्त्या
ष्यवांशुलः सौवर्णं रजतं चापि शूलं कुर्यात्प्रयत्नतः। ताम्रेण ध्यायसेनापि खादिरेण यथा पुनः। महादेवप्र
हरणं यथा तथ्येन कल्पयेत्। रक्तवस्त्रेण संवेष्ट्य तिलानामुपरिन्यसेत्। रक्तमाल्यैश्च संवीतं रक्तचंदनचं
र्चितम्। तिलानां च परीमाणं द्रोणं वाथ तदर्द्धकम्। एवं कृत्वा विधानं तु ब्राह्मणान्पूजयेच्छुचिः। ब्रह्मादिमूल
मंत्रेण उपचारैः पृथक् शोभनैः। क्रियाविद् ब्राह्मणं पूज्यं कृत्वा होमं च कारयेत्। शूलस्य दक्षिणपार्श्वे स्थ
ण्डिलेग्निं प्रणीय तु। समिदाज्यतिलान्हुत्वा पुरुषस्येति वै सतिम्। पुरुषस्येत्यागमः (पुरुषस्येत्यागमः)
पुरुषस्य विद्मेस हस्राक्षस्य महादेवस्य धीमहि। तन्नो रुद्रः प्रचोदयात्। त्र्यंबकेन तु मंत्रेण त्र्य
ष्ट होमं प्रकल्पयेत्। यत इंद्रेण च तिलान् शन्नः शान्तिं प्रकल्पयेत्। तेनोदकेन चासिंचेच्छूलिनं रो
२ गिणं नरम्। ततो हुतवते शूलं संपूज्य स्वीयभक्तितः। दद्यात्सदक्षिणं तत्तु प्राङ्मुखाय ह्युदङ्मुखः। मंत्रेण
नेन परया भक्त्या सर्वं परं स्मरन्। त्वं शूल ब्रह्मणा सृष्टस्त्वं सुराणां विनाशकः। दैत्यानां दानवानां च शंकर
स्यायुधं सदा। कुक्षिस्थमथवा यास्यमथ वा पृष्ठसंस्थितम्। [illegible]नं विनाशय त्वं मे महादेवकरोद्यतः। दा
नं नमंत्रः। ततः स्नात्वा तु भोजनं कुर्याद् ब्राह्मणैर्बंधुभिः सह। शूलरोगं [illegible]स्तु [illegible] वेदनामाशु नाशयेत्। इति शूल ल
हरदानम्। अथ हीनस्तनभुजदानं [illegible] भवेदनु [illegible] शूली नरः कुर्यात् जपं होमं तथा तीर्थ

ज्ञानी सभायां प्रायश्चित्तं व्यवहारमिश्रकं कसेति राजयक्ष्मी भवति॥ तत्र प्रतिरूपं दद्यात्। तदुक्तं ब्रह्मां
ण्डपुराणे। धर्मशास्त्राण्यविज्ञाय प्रायश्चित्तं ददाति यः। राजयक्ष्मा भवेत्तस्य रोगः पीडा च दारुणा। दृष्टो
क्तेन विधानेन दद्यात्तत्प्रतिरूपकमिति राजयक्ष्मणः॥ यतः। असाध्यसर्वरोगतत्त्वार्थं व्याधेः प्रतिरूपं कु
र्यात्। तदुक्तं ब्राह्मे ब्रह्माण्डपुराणे॥ ब्रह्मोवाच। शतेन वा तदर्द्धेन त्रिंशता निःकशं स्वया। जातरूपमयं व्याधेः
प्रतिरूपं तु कारयेत्। निधाय पात्रे संशुभ्रे तंडुलैः सितरूपकैः। अलंकृत्य च सौवर्णरूपं वागुरुलेपनम्।
वासोयुग्मेन संवेष्ट्य हिरण्यवरूभेर्भूषणैः। अलंकृत्य य विप्राय दद्यान्मंत्रमुदीरयेत्। येमारोगाः प्रवाध
न्ते देहस्थाः सततं स्थिताः। गृह्णीष्व प्रतिरूपेण तान्रोगान्द्विजसत्तम॥ दानमंत्रः। वाढमित्येव तद्गृ
ह्णीयात्सहितेन च। स रूत्वरोगी वदाता च दीर्घायुस्त्वप्रपद्यते। तत्र यद्यपि पात्रे सामान्येनाभिहितं तथा
पि कांस्यमय इति ज्ञातव्यम्। कांस्यं च यक्ष्मणो देयमिति वचनात्। तदा च प्रतिगृहीतुर्मुखं नावलोकयेत्।
यत उक्तम्। दुःप्रतिग्रहदग्धस्य विप्रस्य किल भारत। न पश्येद्वदनं पश्चात्तेन संभाषयेदिति महाभार ८
तात्। इति क्षयादिव्याधिप्रतिरूपकदानविधिः। ---- शातातपः॥ राजहा क्षयरोगी स्यादेषाननि
तिःकृतिः। गोहिरण्यमिष्टान्नजलवस्त्रघृतधेनुप्रदानैतैलकुंभप्रदानतः। इत्यादिकर्मणैव क्षयरोगः
प्रशाम्यति॥ इति क्षयरोगे॥ अथ शूलरोगे। शूलेन शूलीभवति मनुष्याणां वहिंसकः। अनन्तस्य विपा

सौवर्णं कारयेत्पद्मं पलेनार्द्धेन वा पुनः। यद्वा स्वशक्त्या मतिमान्दृष्ट्वा मृदन्तं शुभम्। वित्तशाठ्यं न
कुर्वीत भवेन्निःफलमन्यथा। द्रोणाष्टके तिले चापि ताम्रपात्रं जलान्वितम्। तस्य मध्ये तु तत्पद्मं नि
दध्यात्कुंकुमोपरि। ब्राह्मणांश्च ततः पश्चान्नैष्ठिकं चाग्निहोत्रिणम्। आहूय गंधमाल्याद्यैर्विधिवच्चाभि
भ्यर्च्चितः।। ततः स्वर्णमयं पद्मं दद्यान्मंत्रमुदीरयन्। भगः पूषपतङ्गो यो सो द्वादशात्मा त्रयीतनुः। प
द्मदत्तेन दानेन प्रीतस्त्वरणिस्कंमे। दानमंत्रः।। इति क्षयरोगहरपद्मदानम्। तस्यैव कारणान्तरेण
प्रकारान्तरमाह। क्षयी स्यात्स्वेच्छमारणेऽ इति क्रियान्तरम्। क्षयस्य कुर्यात्कदलीं दिव्यां पत्रैः सुसंवृता
म्। फलपुष्पैः समायुक्तां सुवर्णस्य पलेन च। यथाविभवतः। कुर्याद्धस्त्रेणावेष्टयस्तत्रकेः ब्राह्मणान्
भोजयेच्चापि भक्ष्यैर्नानाविधैः शुभैः। होमं च कारयेत्तत्र पूर्ववद्ब्राह्मणेन तु। हिरण्यगर्भ इत्यादि
त लिङ्गैः प्राङ्मुखेन तु। तस्मै तां कदलीं दद्याद्धस्त्वालंकारपूर्विकाम्। पूजिताय दरिद्राय वृत्तस्थाय या
त्मवेदिने। धर्मात्मा पापतिदाक्षाय मंत्रेणानेन कांक्षयी। हिरण्यगर्भपुरुषपरात्परजगन्मयः। रंभादा
नेन देवेश प्रसन्नो भव मे प्रभो।। दानमंत्रः। पुण्याहवाचनं कार्यं ब्राह्मणैर्वेदपारगैः। शिष्टैरिष्टैर्बंधुमि
त्रैः सह भोजनमाचरेत्। यक्ष्मखवने कृतिश्चैव प्रभूतो राजयक्ष्मणः। अन्नं जपहोमश्च कार्यं यत
मानसैः। इति क्षयरोगहरकदलीदानम्। अथ राजयक्ष्मणः [illegible] धर्मशास्त्रा

मांसलोलुपः परवस्त्वभिलाषीयः सर्वभोगानसहमानश्चैतत्त्वात्क्षयरोगे वा स्वत्रयवं मधुपिपीलि
कामध्यन्त्रानिद्रीणि — चान्यारेत्। अथ कृच्छ्रानुष्ठानाशक्तस्य धेनिनोपाधीन्यधीकशतम् १८० तिका
णां दानम्। तत्राप्यशक्तस्तद्द्रव्यं लयेन कुर्यात्। प्रतिदिनं चतुर्विंशतिब्राह्मणभोजनम्। अत्राप्येतदशक्तत्वे
तसमिति तिलचतुर्घृतानां शत्यहं जुहुयात्। जुहुयादिति वाक्यात्। अनुक्तसंख्या यत्र सा नियतमष्टोत्तरं
शतमितिस्मरणात्। रोगभूयस्त्वापेक्षया युतसंख्यया जपो होमश्च भवति। अस्यां धेव्याधिनाश्येण ब्राह्मण हारिता
। आईरोद्रेणशक्तेन प्रतिदिवा व्रतः शुचिः। पूर्वमाज्याहुती हुत्वा उपस्थापेच्च शंकरम्। हविः शेषेण
वर्तेण तरणकोत्तरमतं द्विजः। पूर्णे मासे जपेन्मृत्युं रोगेभ्यश्च प्रमुच्यते। दानकर्मणापशक्तानां जपस्त
द्विगुणो भवेदिति वचनात्॥ इति श्री सरहिन्द विरचिते सारसंग्रहे कर्मविपाके प्रतिकरणाव्यवस्थाकथन
म्॥ पद्मपुराणे। वर्तमानव्याधीनां दानप्रतीकारः। तत्र तदयस्य। तदयेत्तु राजतं पद्मं ब्राह्मणाय नि
वेदयेत्। तिलाढके परिपत्तप्रज्वलं कांस्यमयेद्दद्दे। पलेनाथ तदर्द्धेन यथाशक्त्या थवा कृतम्।
निर्वापतत्र पद्मं तु ब्राह्मणाय समर्पयेत्। संपूज्य शास्त्रविधिना मंत्रेणानेन भक्तितः। पद्मेन राजते
नाह प्रदत्तेनाग्निनेत्रजा। जातकर्मविपाकेन तदयं नाशयमेन व॥ दानमंत्रः॥ कृत्वैवं तदयरोगी तु
शीघ्रं रोगात्प्रमुच्यते॥ इति श्री ...पुराणोक्तयरोगहरपद्मदानम्। तत्रैव द्वितीयप्रकरणमाह

षंथ॰॰वैस्वयः प्रकृतीसमीक्ष्य। नानाप्रकारवचनादिगदातुराणामुक्तं चिकित्सितमिदं न तु कर्म्मजानामिति।
तस्मांद्रोगोपशमनेतस्मिन्नेव विषयेशाखा॰॰॰न्तरेक्वचिद्दृष्टेषु दृश्यते। दृष्टापचारजरजितिदोषोत्थं कर्म्म हेतुभि
र्विना। महारंभोल्पकेहेतावत्रोदोषकर्म्मजः अयमर्थः। समयान्तर दृश्यमानमिति तत्तोदोषजः। तदाभी
म दृश्यमाहेतुः कर्म्मजः। स्वल्पहेतुराधिकोऽनुभूयमानोपः कर्मजोक्तमूलप्रकारमाह। विकशीलना पूर्व
कर्म्मजं कर्म्मसंत्तयात्। गच्छत्युभयजन्मातु दोषकर्म्मत्तयात्तयम्। तथा। निःकृत्याकर्म्मजन्मातुदोष
जौषधसेवया। उभयजंतुपमानस्कनिः कृत्यौषधसेवया। तस्मात्पूर्व्वकर्म्मपाकजनितरो॰ गोपशमनार्थं
प्रायश्चित्तमुच्यते। प्रायश्चित्तविधानसमयेदेशवयः शक्तिपापान्यवेक्ष्यास्यांच प्रायश्चित्तार्हमाचरेतां कु
तएतत्। नरकानुभवेक्षीणत्वात् [illegible] अवशिष्टपापजनितत्वाद्रोगस्यनकृत्स्नं प्राय[illegible]
तापस्॰॰ नरकानुभवक्षीणत्वात्। स्वल्पावसिष्टपापजनितत्वाद्रोगस्यनकृत्स्नं प्रायश्चित्तमुदितम्। उक्तं
हि पतः। मृताहिपापकर्म्माणो नरकस्य परित्तये। स्वल्पावशिष्टपापेनजायन्तेरोगचिन्हि॰॰। अत उक्तम्
देशंकालंवयः शक्तिं पापमावेक्ष्य यत्नतः। प्रायश्चित्तं प्रकल्प्यंस्याद्याव दुक्ता बुनिःकृतिः। तत्रतावद्ब्रह्मह
न्तुः प्रथमं पठितत्वादादौ तस्य प्रायश्चित्तमुच्यते॥ तद्यथा। ॰र्वं ज॰ ॰मनिसादा॰ ॰ब्रह्महादयरोगीत्। तत्प्रायश्चि
त्तं। असाध्यरोगोपस्पृष्टः षडब्दं व्रतमाचरेत्। रोगा॰॰गन्तरा॰भावात्प्रायश्चित्तान्तर॰॰॰ऽपेक्ष्यः। तथा।

श्रा॰ श्वगन्ता युश्चब्राह्मन्द्वेष्टभारत। अथा। दुष्टामयः स्मुरपरद्रवेणापहारगुर्वङ्गनागमनाविप्रवधादि
भिर्यो कर्मभिस्तत्तु स्मृतामिहकर्म्मजास्तेनोपक्रमेणाभिषयासुखयान्ति सिद्धिमः इति प्रकृतिकृतम्। तथा
।पित्र्यापूर्वात्पन्तिकाः प्रोक्तागदाश्चाकस्मिकास्त्रिधा। आकस्मिकामयाः केचिदुष्टसंसर्ग्गेयोनयः। अप
स्मारः। क्षयः कुष्टमत्तिरोगव्रणादयः। दर्शनास्पर्शनाद्दानात्संक्रमन्ति नरान्नरम्। देवादगोहसिद्धानां
क्रोधादपिगदोद्भवः। यज्ञेष्टिस्तत्प्रतीकारः संग्रजेषु प्रतिक्रिया। उक्तान्ता द्विगुणा वाच्या स्त्रिगुणा
कस्मिके स्मृताः। चतुर्गुणा पितुसहजे पित्र्येष्वेवं विकल्पयेत्॥ अन्यच्च॥ प्रतीकारे यलक्षं तदग्रा
वस्कवादि पेन्। मौनी त्रिषवंस्नायीत त्वन्मे त्रै जितेन्द्रियः। अनुदानविषयमेतत्। कृत्वा शौचा
दस्नानं वाग्निगुरुपूजनमिति। सर्व्वं चश्राद्धम्। गोहिरण्यादिदक्षिणादानं चाभ्युदयार्थम्। तस्मा
त्तदेव दातव्यमविछिन्नासुखार्थिभिः। छिद्यन्ते चान्यथा रोगा ग्रीष्मे कुसरितो यथा। पूर्वजन्मकृतं
पापं व्याधिरूपेणबाधते। तच्छान्तिः मत्यवैर्मे त्रै द्दौनयज्ञार्च्चनादिभिः। रोगाश्च त्रिविधाः कर्म्मजाः दो
षजाः कर्म्मदोषजाश्चेति इत्युक्तम्। कर्म्मप्रकोपेन भवन्ति चान्ये तथा परे प्राणिषु कर्म्मदोषाः। प्रकोपजाः
क्षयमानोपकारयेमिथ्थितास्तेपि मनो विकारात्। इति। तथा। कर्म्मदोषजाः प्रायश्चित्त चिकित्सिताभ्यां न
न्ति। दोषजाश्चौषधसेवया। कर्म्मजाः प्रायश्चित्तेन तयो क्रमः। तद्दोषदेशबलकालविकारसत्वम्। मेयो

।आचारवर्म्मधर्म्मिष्टं द्विजश्शुश्रूषणे रतम्। गृहे चाहूय विधिवद्देववत्पूजयेच्च तम्। कर्पूरैः कटकैर्वे
स्त्रैर्म्मौल्यैश्चाप्यंगुलीयकैः। कमंडलुछत्रयुताउपानयुगशोभिताः सर्व्वेषु वत्सुमाणेषु कार्या एवं
विधा द्विजाः। यस्य रोगस्य यो देवस्तल्लिङ्गैर्म्मंत्रसंचरैः। जपो दशसहस्राणि कार्यो नियतमान
सैः। न हृश्यांसेन होमः स्यात्समिदाज्यतिलैरपि। नाजप्तः सिध्यते मंत्रो नाहुतः फलदो भवेत्। न
स्याज्जपश्च होमश्च कर्त्तव्यः कर्म्मसिद्धये। इतरेषां च रोगिणां विपाके कर्म्मणां भवेत्। यो मंत्रो यश्च
होमः स्यात्तत्तन्मंत्रेण कारयेत्। अयुतं जपमासाद्य सर्व्वकर्म्मसुसिद्धिदम्। शान्तिः पुष्टिश्च जा
येत सततं शान्तिकारिणम्। गदश्चतुष्पदो यस्य स्याल्लक्षजाप्यं सदा भवेत्। त्रिपादो यदि रोगस्
स्याज्जपस्तन्मानयोगतः। अर्द्धं यदा गदस्यास्ति तदार्द्धं जप्यते नरैः। यदा पादैकसंस्थायां पादः
स्यादृदिनांतने। अयुतं हि तदा जाप्यं नहृशांसेन होमयेदिति। दानादिदानग्रहसर्व्व विष्णुविप्राग्निषु ६
र्वचनप्रतिभिश्च जप्यैस्तपोभिः। इत्युक्त पुण्यनिचयैरुपचीयमानाः प्राक्पापदिरुजः प्रशमं प्र
यान्ति। दयादिभिरिति भावविषयम्। तपस्तनुसेवनादि। यदि पापजानुजस्तर्हि प्रशमं प्रयान्तीति। अ
न्यत्राहुर्वेदोक्तप्रतिकारविषये। परं च। यस्यातिमात्रः पापौघः पुण्यमल्पतरं स्मृतम्। तस्याशी किं
णहेषकर्म्मवैगुण्यमेति च। तथाचाह व्यासः। गतश्रीर्गत[illegible]कान्देष्टिगतायुश्च चिकित्सेन। गत

स्वयसमंदायकन्याशीर्षे थवाकरे। रात्नभार्य्यां परपूर्वां प्रतिगृह्णीत चादत्ताम्। पुत्रमुत्संगमारोप्य प्रति
गृह्णीयाद्यथाविधि। रथं रथमुखे स्पृष्ट्वा प्रतिगृह्णीत कूबरे। रथो गत्रिविशेषः। कूबरो युगधारकाष्ठं युग्य
कांचनवस्त्राणां नागयुक्ते प्रतिग्रहे। तथा। गजस्य दन्ते तुरगस्य कर्णे गवां च पुच्छे महिषस्य शृङ्गे। अ
जाविकाः॥ कुक्षिषु नाभिदेशे संकल्पनं स्यात्तुरगस्य दाने। अत्र गजो दन्तीदंष्ट्रिजातिसु सामान्यल
क्षणः। तथा रथस्य ——— नाभाविति महारथः। शकटरूपभेदः॥ इतिसरहिंदरचिते सानग्रहे कर्म्म श्री
विपाके दानादैवत संकल्पांगलक्षणम्। तत्र दाने उदगग्रेषु दर्भेषु पात्रमुद्दिश्य प्रागग्रेषु कुशेषु स्वयं
समाहितः स्थित्वा विभुं स्मरन् वामकरेण विप्रस्य दक्षिणकरमालभ्य च स्वदक्षिणकरमालभ्य च स्व
दक्षिणकरं सकुशदर्भाक्षतमेयेजलपूर्णं हेमेता म्रेवा पात्रे निवेश्य पाद्यादित्यादि देशकालं कीर्तनं कृ
त्वा अमुकगोत्रायेत्यादि प्रवरवेदशाखाध्यायिने अमुकशर्मणे ब्राह्मणाय एतद्द्रुणसंयुक्तममुकदानं
अमुकगोत्रोमुकशर्माऽमुककामसिद्ध्यर्थं अमुकफलप्राप्तये तुभ्यमहं संप्रददे इति एतद्दानप्रतिष्ठा
सिद्ध्यर्थमिमां दक्षिणां पूर्वोक्तगुणयुक्ताय तुभ्यमहमिति। इति दानसंकल्पविधिः॥ अथ कर्मजानां च
रोगाणां शान्तिर्नो भेषजैः शमम्। जाप्यैः सुरार्च्चनैर्होमैर्दानैस्तेषां शमो भवेत्॥ इति शातातपः॥ अ
थर्वो धायनः। सर्वकर्मसु सर्वेषां ब्राह्मणाः स्युः सुवर्चसः। आचार्यः स्यात्तु संपूर्णं वैसर्वं च कुर्दविन्म॥

वं

विभूषणैः। गृह्णीयान्महिषं शृङ्गे परं वै पृष्ठदेशतः। प्रतिग्रहमथोक्तस्य यानानां चाधिरोहणात्। वीजा-
नीमुष्टिमादाय रत्नान्यादाय सर्वतः। दस्त्रं दशनं तं चादद्यात्परिधानाय याथवा पुनः। आरुह्य यानदोलं च मा-
सं हैव च पादुके। वर्म्म ध्वजौ च संस्पृश्य प्रविशेच्च प्रतिगृहम्। अवतीर्य च सहस्राणि जलस्थानानि वै द्विजः
। ईषायां तु रथो याह्यस्तद्वन्तं दंडस्त थैव च। पारयोरथमात्रोमध्यमस्वरूपः। सांग्रामिक लक्षणैर्वा। दु-
र्गांस्तु प्रतिगृह्णीयान्मूलन्यस्तकरो द्विजः। आयुधानि समादाय तथा मुच्य विभूषणम्। आमुच्य
परिधाय वहेत्यर्थः। ईषायां दंडाग्रे। परिशिष्ट। परिगृह्णीत गां पुच्छे कर्णे गां हस्तिनं करे। करकर्णे
च हस्तिनि विशेष विकल्पः। करे हेमादिद्रव्यद्रव्यगजानामिति विशेषः। पूर्वोक्त दासीदासादिशब्द-
शुद्ध कर्म्मसं रे - दिसुहृज्जन्मसूचकः। अत्र तु वक्ष्यमाणदासीशब्दो निकृष्टजन्मकर्म्मख्यापकः॥
मूर्द्धि दासीमजं चैव पृष्ठे श्वेताजगर्द्दभौ। पूर्वोक्तोयज्ञियोऽन्तः। अत्र तु सामान्येन कथयति। अश्वे
कर्णे स दैवापि अन्नमुद्दिश्य धारयेत्। शय्याशनगृहं दत्तं संस्पृश्यादाय काञ्चनम्। उष्ट्रं च ककुदि स्पृ-
श्यान्मृगाश्च महिषादिकान्। प्रतिग्रहो वराहस्य पादयोः परिकीर्त्तितः। वाराहदाने। गोधामश्वविधा-
नेन पुच्छे संस्पृश्य पक्षिणः। दंष्ट्रिदंष्ट्रिणो चैव न तथा द्रव्यमृगाश्चये। अजसानानुसत्वानामेष एव विधिः
स्मृतम्। छत्रं दंडे तनुन्मूले फलं संगृह्य गोरवान्। प्रतिगृह्य पानदो मंत्रं वाचयेत्सति तुच्यं वै। वासः

ङ्कारं ब्राह्मणे कुर्यान्निरोङ्कारं महीपतौ। उपांशु च तथा वैश्ये मनसा स्तिशूद्रजे। प्रतिग्रहं प्रतिग्रहमंत्रम
। प्रत्यम स्वरं मद्दः ब्राह्मणे दातरि सोङ्कारं स्वस्तिवाचनं कुर्यात्। एवं क्षत्रियादिषु। विष्णुधर्म्मोत्तरे। दाना
धिद्रव्याधिदेवताकथनम्। अभयं सर्व्वदेवत्यं भूमिर्व्वै विष्णुदेवता। कन्यादासस्तथा दासी प्राजापत्याः। स
प्रकीर्त्तिताः इत्यादि दृष्टव्योक्तं द्रष्टव्यं। द्रव्याणामथ सर्व्वेषां। देवसंश्रवणान्तरम्। वाचा तज्जलमादाय क
रेणाथ प्रतिग्रहम्। दातुर्म्मंत्रप्रयोगान्ते अमुकस्मै सुरायवै। इदमंप्रतिगृह्णामि तद्दत्ते स्वस्ति
कीर्त्तयेत्॥ तद्यथा। अग्नये हिरण्यं प्रतिगृह्णामीति। द्रव्याणि तान्यथादाय स्पृष्ट्वा तान्ब्राह्मणः
पठेत्। कन्यादाने न तु पठेद्द्रव्याणि पृथक्। गृन्हीयाद्दक्षिणे हस्ते तद्दत्ते स्वस्तिकीर्त्तयेत्। प्रतिग्रहे द्वि
जश्रेष्ठास्तथैवं वार्त्तभवन्ति ते। प्रतिग्रहस्य यो धर्म्मं न जानाति द्विजो विधिम्। द्रव्यास्तेस्य समायुक्तो नरकं ना
प्रतिपद्यते। विधिं तु धर्म्मं विज्ञाय ब्राह्मणस्तु प्रतिग्रहे। दातारं सह तरत्येव महादुर्ग्गाणपि सो ध्रुव
म्। तस्मादुक्तं विधिं कृत्वा ब्राह्मणस्तु प्रतिग्रहे। आत्मनः श्रेयसो योगं कुर्याद्दातुस्तथैव च। तथा।
भूमेः प्रतिग्रहं कुर्याद्भूमिं कृत्वा प्रदक्षिणम्। करे गृहीत्वा कन्यां तु दासदास्यो द्विजोत्तमः। करं तु
हृदि विन्यस्य धर्म्मो ज्ञेयः प्रतिग्रहः। प्रतिग्रहं च स्वीकारम्। आरुह्य च गजस्यारूढः कर्णे चापस्य कीर्त्ति
तः। तथा चैकशफानां च सर्व्वेषां नाविशेषतः। पृष्ठे प्रतिगृह्णीत सर्व्वः। कर्णेजः पशवः सर्व्वे ग्राह्या पुच्छे

प्रतिग्रहम्। सर्व्वं तद्दातसंविधाद्द्विजोनुचयन्नकृतम्। बौधायनः। काषायवासाकुरुते जपहो
मंप्रतिग्रहान्। न तद्देवगमं भवति। हव्यकव्यं स्वधा हविः। गालवः। हस्तमध्यं ब्रह्मतीर्थं दक्षिणग्र
हणेन तु। प्रचेताः। दक्षिणहस्तमध्ये ब्राह्मणस्याग्रे यं तीर्थम्। आग्नेयेन प्रतिगृह्णीयादिति। गारुडः
स्नातः सम्यगुपस्पृश्य पदधानो धौतवाससी। सावित्रकरं चैव प्रतिगृह्णीत धर्म्मवित्। विष्णुधर्म्मो
त्तरे। सूतके मृतके विप्रान न तु ग्राह्यः प्रतिग्रहः॥ तत्रापि च यथायाह्यानैरेरभयदक्षिणा। कालः
सर्व्व ग्रहणे यदाभयमुपस्थितम्। प्रतिगृह्णास्तथान्येतु ग्राह्यनाशुचिनाद्विजः। अभ्यक्तेन च
धर्म्मज्ञास्तथामुक्तशिखेन च। स्नातः सम्यगुपस्पृश्य गृह्णीयात् प्रयतः शुचिः। प्रतिग्रहीतासा
वित्रीं सर्व्वं चैवानुकीर्त्तयेत्। ततस्तु कीर्त्तयेत्सार्द्धं द्रव्येण द्रव्यदेवताम्। समापयेत्ततः पश्चात्कोत्त त:
त्वा प्रतिग्रहम्। तदन्ते कीर्त्तयेत्स्वस्ति प्रतिग्रहविधिः स्वयम्। सावित्री सवितृदेवत्यात्मक। देवस्य
त्वेत्यादि प्रसिद्धा। द्रव्यदेवतामभयं सर्व्वदैवमित्यादिवत्प्रमाणम्। कामः स्वस्त्या को दात्कस्मा
दादिति मंत्रेण। शाखान्तरे तु कामः कामायेत्यादि प्रसिद्धः। आदित्यपुराणे। ॐकारमुच्चरन्प्रा
ज्ञो द्विवर्णं सकुशोदकम्। गृह्णीयाद्दक्षिणे हस्ते तदन्ते स्वस्ति कीर्त्तयेत्। प्रतिगृह्णं पठेदुच्चैः प्रतिगृ
ह्य द्विजोत्तमान्। मध्यमं क्षत्रराजन्ये उपांशु च तथा विशि। मनसापि तथा शूद्रे स्वस्तिवाचनमेव च। सो

त्वासीनः कुशसंस्तरे। एषां फलमनंतं तु लभते प्रा[illegible]खोन्नरः। स्मृत्यन्तरात्। नामगोत्रे समुच्चार्य संप्रकथ्य
देवतो ददेत्। संकीर्त्य देशकालादि तुभ्यं संप्रददे इति। नामेति स्वसंज्ञा यानि वृत्तिमपि कीर्त्तयेत्। षड्विंश
न्मते। प्रणीय तु समिद्धेग्नौ जुहुयां द्व्याहुतित्रयम्। उदगग्रेषु दर्भेषु पात्रं तेषूपपादयेत्। प्रागग्रेषु
स्वयं स्थित्वा दाता च परमेश्वरम्। ध्यात्वा स्वपुण्यमुद्दिश्य दक्षिणां प्रतिपादयेत्। उदगग्रेष्विति स्वभा
वाहर्षदानविषयम्। अत्र कर्म्मविपाकोक्तप्रतीकारदानेषु प्रागग्रेष्वित्येव विधेयं स्वयमुदङ्मुखो दा
ता॥ यतः। मंत्रेणानेन विधिवत्प्राङ्मुखो याति रोगवान्॥ इति सर्वदानेषु प्रक्रान्तात्॥ शास्त्रेषु स
मस्ताव्याहृति हुत्वा तत्रोपरि समापयेत्। ब्राह्मणं प्रणिपत्याथ ततः पात्रं विसर्जयेत्। अनेन वि
धिना दानं दातव्यं होमपूर्वकम्। सत्कर्म्म दक्षिणावर्ज्जं होमवर्ज्जं च नार्हति। एतच्च विहिताङ्गभू
तहोमानुवादपुरस्सरमुपवर्णितम्। न तद्गुणविधिपरम्। अन्यथा। ह्यतथा दृष्टशिष्टाचारेषु
तो वृत्तादिदानेष्वपि प्रसङ्गः स्यात्॥ अथ प्रतिगृहीतृधर्म्माः॥ ब्रह्माण्डपुराणे। शुचिः पवित्रपाणि
श्च गृह्णीयाद्वुत्तरामुखः। अभीष्टदेवतां ध्यायन्मनसा विजितेन्द्रियः। कृतोत्तरीयको नित्यमन्तर्जानु
करस्तथा। दातुरिष्टमभिध्यायन्प्रगृह्णीयादलोलुपः॥ विश्वामित्रः। अभ्यर्थितश्च धर्म्मज्ञस्तथा बहु।
श्रिरर्हो द्विजः। स्नातः सम्यगुपस्पृश्य गृह्णीयात्प्रयतः शुचिः। आपस्तंबः। आर्द्रवासास्त्वयः कुर्याज्जपहोम।

र्थेः॥ विवाहे। नारदीयपुराणे विशेषश्चोक्तः। मनसा पात्रमुद्दिश्य जलं भूमौ विनिःक्षिपेत्। विद्यते साग
रस्यान्तो दानस्यान्तो न विद्यते॥ धौम्यः। दानकाले तु संप्राप्ते पात्रे चासन्निधौ जलम्। अन्यविप्रकरे दत्त्वा
दानं पात्रं विधीयते॥ षट्त्रिंशन्मते॥ पात्रं मनसि संचिन्त्य क्रियाकर्त्तं गुणान्वितम्। देशे काले च संप्राप्ते दे
यं भूमौ विनिःक्षिपेत्। उभयासंनिधाने तु विशेषस्तत्रैवोक्तः। द्रव्यपात्रविकर्षे चेत्परोक्षं दातुमुद्यतः। त
द्ध्यायेद्भुवं पात्रं द्रव्यमादित्यदैवतम्॥ धौम्यः। परोक्षेऽपि यद्दत्तं तीर्थस्नानेन सोदकम्। तद्दानं सोद
कं प्राहुरनन्तफलदायकम्। परोक्षे कल्पिते दाने पात्राभावे कथं भवेत्। गोत्रजेभ्यस्तथा दद्यात्तद
भावे स्वबंधुषु। परोक्षेऽपि च यद्दानं भावदत्तेन चेतसा। गुरुमित्रद्विजातिभ्यस्तत्तु दानमनन्तक
म्। परोक्षे खलु यद्दानं स्वस्त्यक्षरविवर्जितम्। दृश्यते सागरस्यान्तस्तस्यान्तो नैव दृश्यते॥ आप
स्तंबः। तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः। प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्। वि
मात्रस्तु प्रयोक्तव्यः कर्मारंभेषु सर्वशः। त्रिस्वः सार्द्धास्तु कर्त्तव्या मात्रास्तत्त्वार्थचिन्तकैः। देवता
ध्यानकाले न क्षतं कुर्यान्न संशयः। वृद्धवसिष्ठः। नामगोत्रे समुच्चार्य संप्रदान [illegible] स्वचात्मनः
संप्रदेयं प्रयच्छन्ति कन्यादाने तु पुंस्त्रयम्। --- मितिप्रपितामहादिपुरुषत्रयमित्यर्थः। नांदीमुखे त्र
विवाहे च प्रपितामहपूर्वकम्। नामसंकीर्त्तयेद्विद्वानन्यत्र पितृपूर्वकम्। तथा। दानहोमजपान्कुर्व

कर्म्मणि।वध्नीयान्नासुरीकक्षांशेषकालेयथारुचिः।याज्ञवल्क्यः।परिधानवहिःकक्षनिवद्धाह्यासुरीभ
वेत्।धर्म्मकर्म्मणिविद्वद्भिर्वर्ज्जनीयाप्रयत्नतः।वहिर्न्निर्गतनाकक्षेतस्यर्थः।मनुः।संध्ययोरुभयोर्जपे
भोजनेदन्तधावने।पित्र्यकार्येचदैवेचतथामूत्रपुरीषयोः।गुरूणांसंनिधौदानेयोगेचैवविशेष त्र
तः।एषुमौनेनसमातिष्ठन्स्वर्गंप्राप्नोतिमानवः।पराशरः।स्नानेदानेजपेहोमेदैवेपित्र्यैककर्म्मणि च
।सव्यापसव्यौकर्त्तव्यौसपवित्रौकरौद्विजैः।लघुहारीतः।स्नानेदानेजपेहोमेदैवेपित्र्येचकर्म्मणि
।अशून्यंतुकरंकुर्यात्सुवर्णरजतैःकुशैः।दर्भहीनाचयासंध्यायच्चदानंविनोदकम्।असंख्यातंच
यज्जप्तंतत्सर्व्वंनिःफलंभवेत्।हारीतः।देवाश्चपितरश्चैवतपोयद्दानमीशते।मन्त्राःसर्व्वकार्य्य
साधनानाम्।अन्तिभयोपसर्ग्गेभ्योरक्षितारोभवन्तिहि।मंत्रादेवतासंघएवंसिद्धान्मंत्रवत्करो
ति।यद्ददातिदेवताभ्योदेवताभिरेवनददाति।यत्प्रतिगृह्णातिदेवताभ्योदेवताभिरेवप्रतिगृह्णा
ति।तस्मान्नामंत्रवत्प्रतिगृह्णीयात्।प्रदद्याच्च।यद्यमंत्रितःप्रतिपादयिताहिदेवतास्तस्मै
प्रतिगृह्णीयुर्हिशठाभवन्ति।तस्मान्मंत्रवद्भिरेवप्रदद्यादालभ्यवा।एवंदत्त्वाप्रोक्षणंकृत्वा।
आलभ्यसोदकेनपाणिनास्पृष्ट्वा।आपस्तंबः।सर्व्वाण्युदकपूर्व्वाणिदानानियथाश्रुतिविहारे
विहारेयज्ञे।अन्वाहार्य्यदानादौयथाश्रुतिनिर्यादवेश्रुतंतावत्तेतकुर्य्यान्नोदकपूर्व्वतादिनियमस्त्व

हत्तुर्गृहंगत्वायद्दीयते।तत्कृतयुगदत्तंभवति।पात्रंचगृहंस्व[illegible]यमाहूययद्दीयतेत्रेतायुगदत्तं
भवतीत्यर्थः।एवमुत्तरत्रापि।वह्निपुराणे।तमोवृत्तस्तुयोदद्याद्भयात्क्रोधात्तथैवच।नृपदानं
तुतत्सर्वंभुंक्तेगर्भस्थएवच।ईर्ष्यामनुमनाचैवदंभार्थंचार्थकारणात्।योददातिद्विजातिभ्यःस
वालत्त्वेतदश्नुते।देशेकालेचपात्रेचयोददातिद्विजातिषु।परितुष्टेनमनसायौवनस्थस्तदश्नुते।
मनुः।विस्मयेततपसावदेदिष्टान्नचानृतम्।नार्त्तान्निपीडयेद्विप्रान्नदत्वापरिकीर्त्तयेत्।यज्ञोनृतेन
क्षरतितपःक्षरतिविस्मयात्।आयुर्विप्रापवादेनदानंतुपरिकीर्त्तनात्।हारीतः।दानंज्ञानं
तपस्त्यागोमंत्रकर्म्मविधिक्रियाः।मंगलाचारनियमाःशौचभ्रष्टस्यनिःफलम्।प्रचेताःस्नातो
धिकारीभवतिदैवेपित्र्येचकर्म्मणि।पवित्राणांतथाजप्येदानेविधिदेशिते।वायुपुराणे।क्रियायः
कुरुतेमोहादनाचम्यैवनास्तिकः।भवन्तिहिवृथातस्यक्रियाःसर्वानसंशयः।शांखायनः।दानमा
चमनंहोमंभोजनंदेवतार्च्चनम्।प्रौढपादोनकुर्वीतस्वाध्यायंपितृतर्पणम्।आसनारूढपादस्तु
जान्वोर्वाजंघयोस्तथा।कृतावसक्थिकोयस्तुप्रौढपादःसउच्यते॥वसिष्ठः।यज्जलेशुष्कवस्त्रेणस्थ
लेचैवार्द्रवाससा।जपोहोमस्तथादानंतत्सर्वंनिःफलंभवेत्।विष्णुपुराणे।होमदेवार्च्चनाद्यासु
क्रियास्वाचमनेतथा।नैकवस्त्रःप्रवर्त्तेतद्विजवाचनकेजपे।गौतमः।स्नानेदानेजपेहोमेदैवेपित्र्येच

त धर्मश्चयः॥ आपस्तंबः। प्रयोजितानुमन्ता कर्त्तेति स्वर्गफले भुभागिनः याज्ञवल्क्यः। विधिहीन
स्तु यत्कर्म करोत्य विधिनात्तु यः। फलं किंचित् सप्नोति क्लेशमात्रं हि तस्य तत्। मनुः। प्रभुः प्रथमक
ल्पस्य योनुकल्पेन वर्त्तते। न सांपरायिकं तस्य दुर्बुद्धेर्जायते फलम्। गरुडपुराणे। प्रशस्तदेशका
ले च पात्रे दत्तं यदक्षयम्। कोटिजन्मार्जितं पापं ददतस्तस्य नश्यति। देवीपुराणे। शुचिना भाव
पूतेन दान्तिसत्यव्रतादिना। अपि सर्षपमात्रोपि दातारं तारयेदिह। तथा। दानं हि वर्द्धमाना
घोगुणवज्ञः प्रयच्छति। स तु प्रेत्य धनं लब्ध्वा पुत्रैः पौत्रैः सहाश्नुते। परं चानुपहत्येहं दानं दत्वा
विचक्षणाः। सुखोदयं संकीर्य प्रेत्यैव लभते फलम्। अनुपीडामनुत्पाद्य सुखोदर्कं सुखात्त
र फलं। रामायणे। नावज्ञया प्रदातव्यं किंचिद्वा केनचित् क्वचित्। अवज्ञया हि यद्दत्तं दातुस्तद्दोष
मावहेत्॥ शातातपः। अभिगम्य तु यद्दानं यच्च दानमयाचितम्। विद्यते सागरस्यान्तस्तस्या
न्तो नैव विद्यते। प्रच्छन्नानि च दानानि ज्ञानं च निरहंकृतम्। तपांसि च सुतप्तानि तेषां फलम
नंतकम्। ब्राह्मे। शुभध्यायी शुभदाता शुभपूजाग्निसत्क्रियः। पूज्यते सर्वलोकेषु देवैरिव शत
क्रतुः। व्यासः। स्वयं नीत्वा तु यद्दानं भक्त्या पात्राय दीयते। तत्सहस्रगुणं भूत्वा दातारमुपतिष्ठति।
बृहस्पतिः। कृते प्रदीयते गत्वा त्रेतायां दीयते गृहे। द्वापरे च प्रार्थयानिकलौ चानुगमान्विता। प्रतिग्र

विध
पु
७

व्यासः। श्रद्धा वै सात्विकी देवी सूर्य्यस्य दुहिता नृप। सावित्री प्रसवित्री च जीव विश्वासिनी तथा। स्कांदे। श्रद्धमाते वजननीजा तस्य सुकृतस्य च। तस्माच्छ्रद्धां समुत्पाद्य जातं सुकृतमर्ज्जयेत्॥ मनुः॥ श्रद्धयेष्टं च पूर्त्तं च नित्यं कुर्यात्प्रयत्नतः। श्रद्धाकृते ह्यक्षये ते भवतः स्वागतैर्द्धनैः। बृहस्पतिः॥ मंत्राज्यदोषाद्धोमे तु तपसीन्द्रियदोषतः। न्यूनं तस्यान्नदोषे तु श्रद्धयुक्ते भवेत्क्वचित्। अत्रादोषः॥ इह तु पात्रादिदानाङ्गपंचके निरूप्यमाने दानेङ्गभूतस्यापि दातुः कथं पृथगुपादानं स्यात्। एवमादिक्लेशपर्य्यालोचनया षडङ्गदानमिति वदता देवलेन तु निरूपितमेव। तथा हि। दाता प्रतिग्रहीता च श्रद्धा देयं च धर्म्मयुक्। देशकालौ च दानानामङ्गान्येतानि षड्विदुः। इत्युक्ते पिशुनराद्धियामहे। यत्र श्रद्धैव यजमानो दाता। जन्यजनकलक्षणाभिप्रायेण नयोर्न्न भेदः। यदि दातुः पृथग्गत्वेनोपादानम्। तत्र इति कर्त्तव्यतादिदानां गमित्यतः। श्रद्धावदितिकर्त्तव्यतान प्रतिपादनीयैव। यदाह। याज्ञवल्क्यः। देशे काले उपायेन द्रव्यं श्रद्धासमन्वितम्। पात्रे प्रदीयते यत्तत्सकलं धर्म्मलक्षणम्॥ इति श्रद्धानिरूपणम्। अथ दानसामान्यविधिः। तत्र ल तद्धर्म्मा भविष्यपुराणे। सम्यक् समाधनं कर्म्म कर्त्तव्यमधिकारिणा। निःकामेन महावीरः काम्य कामान्वितेन च। आचारयुक्तः श्रद्धावान्वेदतो ध्यात्मवित्तमः। मेणफलमाप्नोतिन्यायाजि

निष्क्रांतिमेदिन्यां तत्तित्रयोजनत्रयम्। द्वारवत्यां शिलादेविमुद्रिताङ्गमुद्रया। यत्रापिनीयते तत्स्यात्ती
र्थेक्षाद शयोजनम्॥ तथा। प्रयागादिषु तीर्थेषु पुण्येष्वायतनेषु च। दत्वा चाक्षयमाप्नोति नदीपुण्यवतीषु
च। क्रोशमात्रं भवेत्क्षेत्रं शिवस्य परमात्मनः। प्राणिनां तत्र पंचत्वं शिवसायुज्यकारणम्। फलं द
हुतानां च अनंतं परिकीर्त्तितम्। मनुजैः स्थापिते लिङ्गे क्षेत्रे मानं न हि स्मृतम्। स्वयंभुवि सहस्रस्यादा
र्धं च वेत्तदर्द्धकम्॥ अथ श्रद्धारव्यं दानाङ्गमुच्यते। तत्र स्कंदपुराणे। दानं दद्यात्स्वयत्नेन श्रद्धापूतं
स्वशक्तितः। श्रद्धाकृतं स्वल्पमपि दानमानन्त्यमश्नुते॥ तत्र स्कंदपुराणे। न तत्फलाय भवति तस्मा
च्छ्रद्धां समाश्रयेत्॥ देवलः। प्रदाय काशमुष्टिं वा श्रद्धाभक्तिसमन्वितम्। महते पात्रभूताय सर्वा
भ्युदयमाप्नुयात्। महाभारते। श्रद्धया साध्यते धर्मो महद्भिर्नार्थराशिभिः। अकिंचना हि मुनयः
श्रद्धावंतो दिवं गताः। धर्मार्थकाममोक्षाणां श्रद्धा परमकारणम्। पुंसामश्रद्दधानानां न धर्मो
नापि तत्फलम्। वह्निपुराणे। श्रद्धाः पूर्वाः सर्वधर्माः श्रद्धामध्यान्तसंस्थिताः। श्रद्धा धर्मप्र
तिष्ठाश्च धर्माश्चाह्नेव कीर्त्तिताः। कायक्लेशैर्न वहुभिर्न चैवार्थस्य राशिभिः। धर्मः संप्राप्यते सूक्ष्म भि॰
श्रद्धाहीनैः सुरैरपि। श्रद्धा धर्मः परः सूक्ष्मः श्रद्धाज्ञानं हुतं तपः। श्रद्धा स्वर्गश्च मोक्षश्च श्रद्धा
श्रमिदं जगत्। सर्वस्वं जीवितं वापि दद्यादश्रद्धया यदि। नाप्नुयात्स फलं किंचिच्छ्रद्धावान् स्ततो भवेत्।

 धा

द०वि० सर्वे शिवाश्रमाः पुण्याः सर्वा नद्यः शुभप्रदाः। भविष्ये। न हृयतेयत्र धर्म्मश्चतुःपात्सकलो द्विजाः।स
५५ देशः परमो नित्यं सर्वपुण्यतमो मतः। विद्वद्भिः सेवितो यश्च शास्त्रोक्तं यत्र वर्त्तते। याज्ञवल्क्यः। यस्मि
न्देशे मृगः कृष्णस्तस्मिन्धर्म्मान्निबोधत। मार्कण्डेयः। सह्याद्रेरुत्तरो पश्च यत्र गोदावरी नदी। पृथिव्या
मपि कृत्स्नायां स प्रदेशोतिपावनः। व्यासः। गंगाद्वारे प्रयागे च अविमुक्ते च पुष्करे। नागरे वाट्टहासे च
गंगासागरसङ्गमे। कुरुक्षेत्रे गयायां च तीर्थे चामरकंटके। एवमादिषु तीर्थेषु दत्तमक्षयतामिया
त्। सर्वतीर्थमयी गंगा तत्र दत्तं महाफलम्। स्कांदे। श्रीपर्वतमहाकालं गोकर्णं वेदपर्वतम्। इत्याद्याः
कीर्त्तिताः देशाः सुरसंघनिषेविताः। सर्वे शिलोच्चयाः पुण्याः सर्वे नद्यः ससागराः। गोसिद्धमुनि
वासाश्च देशाः पुण्याः प्रकीर्त्तिताः। एषु तीर्थेषु दत्तं हि फलस्यानन्त्यकृद्भवेत्। ब्रह्मपुराणे। गंगा
वारोद —— दयां यत्र यत्र प्राची सरस्वती। तत्र क्रतुशतं पुण्यं स्नानदानेषु सुव्रत। लिङ्गं वा प्रतिमा
वापि दृश्यते यत्र कुत्रचित्। तत्सर्वं पुण्यतां याति दानेषु च महाफलम्। ब्राह्मे। नदीतीरे गवां गो
ष्ठे ब्राह्मणानां च वेश्मनि। दत्तं शतगुणं प्राहुर्ह्रदतमादिसन्निधौ।। शिवस्य विष्णोर्ब्रह्मणश्च सन्नि
धौ दत्तमक्षयम्। तथा। अग्निहोत्रे गवां गोष्ठे वेदघोषविचित्रिते। शिवायतनसंस्थाने यदल्पमपि
दीयते। तदनन्तफलं ज्ञेयं शिवदेवानुभावतः। मत्स्ये। शालग्रामसमुद्भूता शिला चक्राङ्कमंडिता। यत्र

हा। दानात्तु गतकांचनमेदिनी। दानविषयमेतत्। तथा। हिरण्यं भूमिमश्वं वा अन्नं वा तिलान्घृतं म
अविद्वान्प्रतिगृह्णानो भस्मीभवति दारुवत्। अनायश्च अनधीयानः प्रतिग्रहरुचिर्द्विजः अंभस्य
श्मप्लवेनेव सह तेन निमज्जति। तस्माद विद्वान्बिभियाद्यस्मात्प्रतिग्रहात्। स्वल्पकेनाप्यविद्वान्हि
पंके गौरिव सीदति। याज्ञवल्क्यः। विद्यातपोभ्यां हीनेन तु ग्राह्यः प्रतिग्रहः। गृह्णन्प्रदातारमधो
नयत्यात्मानमेव च। प्रतिग्रहसमर्थोपि प्रसंगं तत्र वर्जयेत्। प्रतिग्रहेण विप्राणां ब्राह्मं तेजः प्रण
श्यति। तथा। नद्रव्याणामविज्ञाय विधिं धर्म्यं प्रतिग्रहे। प्राज्ञः प्रतिग्रहं कुर्यादवसीदन्नपि क्षुधा।
विधिरत्नेतिकर्त्तव्यताप्रकारलक्षणः। याज्ञवल्क्यः। प्रतिग्रहसमर्थोपि नादत्ते यः प्रतिग्रहम्।
ये लोका शील दानशीलानां स तानाप्नोति शाश्वतान्। इति द्रव्यनिरूपणम्। अथ पुण्यकालाः स्मा
मासेन। उत्तरायणदक्षिणायनविषुवत्प्रभृतिसंक्रमाः। आषाढी कार्त्तिकी माघी वैशाखी च विशे
षतः। अन्याश्च पौर्णमास्यः। वैशाखे शुक्लतृतीया या कार्त्तिके नवमी सिता। त्रयोदशी भाद्रपदे माघे द
र्शो युगादयः॥ इति चतस्रो युगादयः। चतुर्दश मन्वादयः। चंद्रसूर्योपरागः। वैधृतिव्यतीपातदि
नक्षयाश्च अष्टकान्वष्टका। द्वादशी। इत्यादयो ह्यनेकशः। पुण्यकालाः कालेदत्तमनन्तकमिति
वचनात्। कालापेक्षा सर्वकर्मसु। पुण्यादिकालनिरूपणं। अथ देशाख्यादानाङ्गम्। देवीपुराणे।

*.ध.वि. योमत्स्यागेध्याः पुष्पंदधिद्विति। मांसंश ासंधानाः प्रत्याख्येयंनवाखिच। आमंमांसंमधुघृतंधानाःक्षीर
५३ मथोदितम्।गुरुतक्रंचसंग्राह्यंनिवृत्तिर्ज्ञोपिशूद्रतः।शाकमत्स्याननालानिकन्दुकाःसक्तवस्तिलाःइ
क्षुःफलानिपिण्याकंप्रतिग्राह्याणिसर्वतः।कन्दुकाः कणाः कंडुकमितिपाठेकंडु कंसुणकं।लकुच
फलरसलवणादिसिद्धम्।साक्षाज्जलपाकविवर्जितम्॥विष्णुधर्म्मे।ग्राह्यंप्राणप्रदानेचचांडाला
त्पुक्कसादपि।जीवन्सर्व---तिजीवन्धर्म्मंकरोतिच।शरीरंधर्म्मसर्वस्वंरक्षणीयंप्रयत्नतः॥अ
ग्राह्यमुच्यते।ब्रह्मपुराणे।ब्राह्मणःप्रतिगृह्णीयाद्वृत्त्यर्थंसाधुतःसदा।अजाश्वमणिमातंग
तिललोहांश्चवर्ज्जयेत्।कृष्णाजिनतिलग्राहीनभूयःपुरुषोभवेत्।शय्यालंकारवस्त्राणिप्र
तिगृह्यमृतस्यच।नरकान्ननिवर्त्तन्तेधेनुंतिमयींतथा।बहुशोद्विजवित्तानामपिस्तेयंपरिष्यति। क
।अन्तराधग्रहीतंतुतत्कथंनिस्तरिष्यति।आतुरान्मुमूर्षो।वन्हिपुराणे।हस्त्यश्वरथयानानिमृत
शय्यासनादियः।कृष्णाजिनंचगृह्णातिअनापत्सुगतोद्विजः।तथोभयमुखींघोरांसप्रोल्लांमेदि
च नीद्विजः।कुरुक्षेत्रेयद्दानंचांडालान्पतितात्तथा।मासिकेपिनवश्राद्धंभुंजन्प्रेतत्वमाप्नुयात्॥
अजिनंमृतशय्यांचमेखीचोभयतोमुखी।कुरुक्षेत्रेचगृह्णानोननभूयःपुरुषोभवेत्।ब्रह्मांडंभूमि
दानेचयाह्यंनैकेनतद्भवेत्।गृन्ह न्नोषमवाप्नोतिब्रह्महत्यांनसंशयः।अमिदानमितिषोडशप्र

न्यन्निवेदयेत्। गोरसंकांचनंदत्वा गोस्तिलामधुसर्प्पिषा। तथा। सर्व्वान्नसान्यपिचांडालेभ्योनिवे
दयेत्। स्वस्तिनदद्यादित्रिपुराणंममन्त्रेरणशूद्रस्यस्वस्तिनब्रूयादित्यर्थः। विष्णुधर्मे। भुवंधे
नर्कः नुमथाश्वंचरत्नानिकथंनतथा। तिलाश्वकुंजरंदद्यान्नाविज्ञायगुणानिति। अथयाह्यसु
हि ।तत्रव्यासः। कुटुंबार्थंतच्छूद्रात्प्रतिगृह्यमयाचितम्। गत्यर्थमात्मनेचैवनहियाचेतकर्हिचि
त्। स्कांदे। दुर्भिक्षेदारुणेप्राप्तकुटुंबेसीदतिक्वचित्। असाधोरपिगृह्णीयात्स्वप्रतिग्रहमतंद्रितः।
क्रमणप्रकरणार्थंचप्रतिग्राह्यंद्विजातिभिः। चिकीर्षयान्तुयज्ञस्यमातापित्रर्थमेवच। वृद्धौच
मातापितरौभार्यासाध्वीसुतःशिशुः। अप्यकार्य्यशतंकृत्वाभर्त्तव्यामनुरब्रवीत्। अकार्यशतंता
त्रेणवैश्यकर्म्मणावासेवावाणिज्यप्रभृतिनानाप्रकारैः। नतुब्रह्मगोवधादिना। यतः। अकर्त्तव्यं
नकर्त्तव्यंप्राणैःकंठगतैरपि। कर्त्तव्यमेवकर्त्तव्यंप्राणैःकंठगतैरपि। ब्रह्मांडपुराणे। अनाप
द्यतिधर्म्मेणयाज्यतःशिष्यतस्तथा। गृह्णन्प्रतिग्रहंविप्रोनधर्म्मात्परिहीयते। बृहस्पतिः। अ
पिपापकृतांराज्ञांप्रतिगृह्णन्तिसाधवः। पृथिवीनान्यच्छिदन्तिपावनहेतदुत्तमम्। तथा। अया
चिताहृतंग्राह्यमपिदुःकृतकर्म्मणः। अन्यत्रकुलटाषंढपतितेभ्यस्तथाद्विजः॥ याज्ञवल्क्यः। रा
जान्तेवासियाजेभ्यः सीदन्निच्छेद्धनंक्षुधा। दंभिहैतुकपाषंडवकवृत्तींश्चवर्ज्जयेत्। कुशाःशाकंप

क॰ वि॰ व्यं न बहुभ्यः कथंचन॥ तथा। बहुभ्यो न प्रदेया नि गो गृहं शयनं स्त्रियम्। विभक्तदक्षिणा ह्येते दा
५२ तारं पातयन्ति हि॥ व्यासः। न वंध्यां गां रोहिणीं वंध्यां न वशां मृतवत्सकाम्। न वामृतस्वे हेतं च दद्याद्धि
प्राय गां नरः। विहङ्गभीर्वा तिनी। देवलः। विवत्सां रोहिणीं रूक्षां स्थविरां शृङ्गभीयणाम्। क्षीण
क्षीरशरीरां गां दत्त्वा दोषमवाप्नुयात्। न चोषरीं न निर्दिग्धां महीं दद्यात्कथंचन। न श्मशानप
रीतां च न च पापनिषेविताम्। पापहिंस्राः प्राणिनो व्याघ्रादयः॥ विष्णुधर्मे। शोसीरां तस्करा की
र्णां तथा व्यालवतीं भुवम्। न दद्यात्तु द्विजश्रेष्ठ याचसंधियुसंस्थिताः॥ स्कंदे॥ पापदः पापमा
प्नोति निरोलक्षणं गुसदा॥ तस्मान्न दद्यान्मेधावी यातकं जातु कस्यचित्। दुःखितेभ्यो हि भूतेभ्यो
मृत्युरोगजरादिभिः। भूयः को दुःखपरं सघृणो दातुमर्हति। दुःखं ददाति यो न्यस्य ध्रुवं दुःखं
२ स विंदति। तस्मान्न कस्यचिद्दुःखं दातव्यं दुःखभीरुणा॥ अथ पात्रविशेषेण देयमुच्यते। यमः।
सुवर्णं रजतं ताम्रं यतिभ्यो यः प्रयच्छति। न तत्फलमवाप्नोति तत्रैव परिवर्तते। धर्म्मो विपरीत
मधर्म्मं जनयतीत्यर्थः। उक्तं तथा। यतये कांचनं दत्त्वा दाता पि नरकं व्रजेत्। इति। देवलः। पक्व
मन्नं गृहस्थस्य वानप्रस्थस्य गोरसः। वृत्तिश्च भिक्षा वृत्तिभ्यो न देयं पुण्यमिच्छता। वृत्तिर्भिक्षाति
रिक्तवर्त्तनम्। तथा। न शूद्राय हविर्दद्यात्स्वस्तिदीरं तिलाब्दयः। न शूद्रात्प्रतिगृह्णीयात्तेषस

तदभावे स्वबंधुषु। यदा च स न कुल्यः स्यान्न च संबंधिबांधवाः। दद्यात्सज्जातिशिष्येभ्यस्तद्
भावेप्सु निःक्षिपेत्। गौतमः। प्रतिश्रुत्याप्यधर्म्मसंयुक्तां न दद्यात्। अंगिराः। देवतानां गुरूणां
च मातापित्रोस्तथैव च। पुण्यं देयं प्रयत्नेनापुण्येन नोदितं क्वचित्। नंदिपुराणे। पादेपः पापमा
प्नोति निरोलत्तगुणं सदा। पुण्यदः पुण्यमाप्नोति शतशोथ सहस्रशः। वन्हिपुराणे। द्वावि
मौ पुरुषौ लोके सूर्यमंडलभेदिनौ। दातान्नस्य च दुर्भिक्षे सुभिक्षे हेमवस्त्रदः। अथ देयनि
रूपणं। देवलः। अन्यायाधिगतांदत्वासकलांपृथिवीमपि। अन्यायाधिगतांदत्वासकलांपृ
थिवीमपि। श्रद्धावर्जमपात्राय न कांचिद्भूतिमाप्नुयात्। वह्निपुराणे। अन्यायोपार्जितं द्रव्यं गृही
त्वा यो ह्यपंडितः। धर्म्माभिकांक्षी यजते न धर्म्मफलमश्नुते। एवमन्यैश्च बहुभिः रन्यायोपार्जि
तैर्धनैः। आरभ्यन्ते क्रिया यास्तु पिशाचास्तत्र देवतम्। स्कांदे। देवद्रव्यं गुरुद्रव्यं ---- स्व
रस्य च। त्रिविधं वचनं दृष्टं दानलंकणभक्तणात्। अपहृत्य परस्यार्थं दानं यो वै प्रयच्छति। स
दाता नरकं याति यस्यार्थास्तस्य तत्फलम्। तथा परिभुक्तमवज्ञातमपर्याप्तमसंस्कृतम्। यः
प्रयच्छति विप्रेभ्यस्तद्भस्मन्यवतिष्ठते। परिभुक्तं गृहीतो प्रयोगवस्त्रादि। अपर्याप्तं स्वकार्यातम
जरद्गवादि। उपकात्यायनः। कन्याशय्यागृहं चैव देयं पाद्वास्त्रियादिकम्। न देकस्मै प्रदात

क॰वि॰ पहृताश्च ये। भक्तैर्व्यासेन महाराज न तु देयः प्रतिग्रहः। इति पात्रनिरूपनम्॥ यथाभावो यथाद्रव्यो यथा
प॰ ४ कृत्यं यथाविधिः। संप्रेत्य विहत फलं तथा प्रोतितत्थाविधम्। शिवधर्म्मोत्त। ददत्रिभागं वित्तस्य जीवनो-
य प्रकल्पयेत्। भागद्वयं तु धर्म्मार्थे नित्यं च जीवितं यतः॥ अशेषवित्तस्य भागपंचकं कृत्वा भागत्रयं जी-
वनाय संरक्ष्य भागद्वयं धर्म्माय कल्पयेदित्यर्थः॥ महाभारते। एकां गां दशगुर्दद्याद् दश दद्याच्च गोश-
ती। शतं सहस्रगुर्दद्यात्सर्व्वे तुल्यफलाः स्मृताः। गोशब्दग्रहणादत्र गोलभ्य परिमाणं मोद्रव्यस्यापि ता-
वद्दानम्। यतो दशावरगोर्हूनि नोऽपि गोदानाधिकारः स्यात्। याज्ञवल्क्यः। देयं प्रतिश्रुतं चैव दत्वा-
२ नापहरेत्पुनः। यमः। यच्च वाचा प्रतिज्ञातं कर्म्मणा नोपपादितम्। तद्धनं ऋणसंयुक्तमिह लोके परत्र च।
ऋणसंपृक्तं ऋणसमर्पणजन्यदोषसंयुक्तमित्यर्थः। सप्ताजातान्नरो हन्याद्धत्तं मानाश्च सप्त च॥
प्रतिश्रुत्य तथाहन्याद प्रयच्छन्प्रतिश्रुतम्। प्रतिश्रुताप्रदानेन दत्तस्य हरणेन च। जन्मप्रभृति
हा यत्पुण्यं तत्सर्व्वं संप्रणश्यति। महाभारते। ब्राह्मणं स्वयमाहूय भिक्षार्थे कृशवृत्तिनम्। पश्चान्नास्ती-
ति यो ब्रूयात्तं विद्याद्ब्रह्मघातकम्। तथा। संश्रुत्य यो न दित्सेत याचित्वा यश्च नेच्छति। उभावानृति-
कावेतौ मृतौ पापमवाप्नुतः। यो न दद्यात्प्रतिश्रुत्य स्वल्पं वा यदि वा बहु॥ आसास्तस्य हताः सर्व्वाः
क्लीवस्येव प्रजाफलम्। नारदः॥ ब्राह्मणस्य च यद्देयं सान्वयस्य च नास्ति सः। सकल्पेत्तदिनं येत्

नभीतुं बहुज्ञम्। स्त्रीपुत्रान्नधार्मिकं गोग्रासं पं व्रतैः। क्रान्तं ता दश पात्रमाहुः। यमः। किंचिद्वेदमयं पात्रं किं
चित्पात्रं तपोमयम्। आगमिष्यति यत्पात्रं तत्पात्रं कं तरिष्यति। ब्रह्मचारी भवेत्पात्रं पात्रं वेदस्य पारगः।
पात्राणामपि तत्पात्रं शूद्रान्नं यस्य नोदरम्॥ व्यासः। किंचिद्वेदमयं पात्रं किंचित्पात्रं तपोमयम्। असंकी
तार र्णं च यत्पात्रं तारयिष्यति। असंकीर्णयोन्यादिसंकरहीनम्। याज्ञवल्क्यः। न विद्यया केवलया तपसा
चापि पात्रता। यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्तितम्। अथ कौर्म्मो न वार्य्यपि प्रयच्छेत्तु वैडालव्रतिके प
द्विजे। न बकव्रतिके पापे नावेदविदि धर्म्मवित्। त्रिष्वप्येतेषु दत्तेषु विधानेनार्जितं धनम्। दातुर्भ्भव स
त्यनर्थाय परत्रादातुरेव च। अनर्थः प्रत्यवायः। यथा प्लवेनौपलेन निमज्जत्युदके तरन्। दातृप्रतिग्र
हीतारौ तथैवाज्ञौ निमज्जतः। शातातपः। न ष्टं देवलके दत्तमप्रतिष्ठं च वार्द्धुषौ। यच्च वाणिज्यके दत्तं।
नैव तत्प्रेत्य नो इह। दक्षः। धूर्त्ते वन्दिनि मल्ले च कुवैद्ये कितवे शठे चाटचारणचौरेभ्यो दत्तं भवति
निःफलं। स्कंदे। देवपितृविहीने यदीश्वरेभ्यश्च दीयते। दत्वानुकीर्त्तितं यच्च वेदाग्नित्यागिने तथा। अ
न्यायोपार्जितधनैर्द्दत्तं ब्रह्महरणे च यत्। गुरवेन्नृतवक्त्रे च स्तेनाय पतिताय च। परि काय भृत्या
य सर्वस्य पिशुनाय च। इत्येतानि च राजेंद्र दत्तदाना निषोडश। गर्भस्थो ज्ञानवालोपि भुंक्ते तद्द्रा
स्ये यौवने। न दत्तस्येदनाशोस्ति सर्व्वं दारिपुसूदनम्॥ महाभारते। पंगंधवधिरा मूकाव्याधिनो

क॰ वे॰ रणंहिद्विजत्वस्यवृत्तमेवतुकारणम्।किंकुलंवृत्तहीनस्यकरिष्यतिदुरात्मनः।क्रमयंकिन्नजायं
५० तेकुसुमेषुसुगंधिषु।नैकमेकान्ततोग्राह्यंपठनंहिविशांपते।वृत्तमन्विष्यतांतातनरक्तोभिकिन्नपद्यते
वहुनाकिमधीतेननटस्येवदुरात्मनः।तेनाधीतंश्रुतंवापियःक्रियामनुतिष्ठति।कपालस्थंयथा
तोयंश्वदृतौचयथापयः।दूष्यंस्यात्स्थानदोषेणवृत्तहीनेतथाश्रुतम्।तस्माद्विद्धिमहाराजवृत्तंब्रा
ह्मणलक्षणं।चतुर्वेदोपिदुर्वृत्तःशूद्रादल्पतरःस्मृतः।सत्यंदमस्तपोदानमहिंसेन्द्रियनिग्रहः।
दृश्यन्तेयत्रराजेन्द्रसब्राह्मणइतिस्मृतः।अहिंसापरमोनित्यंजुह्वानोवेदजातसम्।स्वदारनिर
तोदान्तासवैब्राह्मणउच्यते।श्रुतंप्रज्ञानुगंयस्यप्रज्ञाचैवश्रुतानुगा।असंभिन्नार्यमर्यादःस
वैब्राह्मणउच्यते।अशिषोर्थायस्रजांचप्रसंगान्नकरोतियः।निवृत्तोलोभमोहाभ्यांतंदेवाब्राह्मणं
विदुः।प्रसंगोत्थासक्तिः।येदान्तादान्ताःश्रुतपूर्वकर्म्मणाजितेन्द्रियाः।प्राणिवधेनिवृत्ताः।प्रतिग्रहेसंकु
चितायहस्तास्तेब्राह्मणास्तारयितुंसमर्थाः।यमः।तेषांदत्वाचभुक्त्वाचप्राप्नुयुःपरमांगतिम्।दत्वाद्विजा
यसुद्वायदातायातिपराङ्गतिम्।विद्यातपःशीलवांश्चसन्तारयतिनेरतेः।मत्स्यः।शीलंसंवृत्तेनाद
त्तेयंशौचंसंव्यवहारतः।प्रज्ञासंकथनाज्ज्ञेयात्रिभिःपात्रंपरिक्ष्यते।क्षान्तिःस्पृहादयासत्यंदानःशीलं
तपःश्रुतम्।एतदष्टाङ्गंसुदिष्टंपरमंपात्रलक्षणम्।वसिष्ठः।स्वाध्यायाध्यंयोनिमन्त्रंवैतानस्थंप

पुराणत्त। येषांपूर्व्वंकृतंकर्म्मसात्विकंमनुजोत्तम।पौरुषेणविनातेषांयत्किंचिद्दृश्यतेफलम्।कर्मणाधा
र्यतेलोकेराजसस्यतथाफलम्।विध्यत्येवंतामसस्यफलंकृच्छ्रेणकर्मणा।इतिदानलक्षणम्। अथदा
नाङ्गनिरूपणम्।तदुक्तंभविष्यपुराणे।प्रतिग्रहीताद्रव्यंचकालोदेशश्चपावनम्।श्रद्धाचसात्वि
कीज्ञेयंदानानामङ्गपंचकम्।तत्रपूर्वंपात्रनिरूपणम्।स्कंदपुराणे।देवींप्रतीश्वरवचनम्।श्रुती
नामाकराह्येतेरत्नानामिवसागराः।विप्राविप्राधिमुखेयत्नतस्तान्प्रपूजयेत्।यत्रवेदविदा
न दोविप्रानप्राश्नन्त्युत्तमंहविः।नतद्देवादेवेशिहविरश्नन्तिकर्हिचित्।तथाचैतैत्तिरीयश्रुतिः।या
वतीर्देवतास्ताः सर्व्वावेदविदिब्राह्मणेवसन्तीत्यादि।वियदित्युच्यतेव्योमडकारःप्रापणेस्मृतः।
दिवंसंप्रापयन्त्येतेदातॄन्विप्रास्ततःस्मृताः। अपिनारायणेनत्रोब्रह्मास्कंदोऽनिलःशिखी।त
ज्ज्ञानेनाभिनंदन्तियत्रविप्रानपूजिताः।येषांप्रसादसुलभमायुर्धर्म्मःसुखंधनम्।श्रीर्यशःस्व
र्गवासश्चतान्विप्रानर्चयेद्बुधः॥ विष्णुधर्म्मोत्तरे।ब्राह्मणेपूजितेनित्यंपूजितोऽहंनसंशयः।निर्भ
र्त्सितैश्चनिर्भर्त्स्यैर्नरहंसर्व्वकर्मसु।याज्ञवल्क्यः।तपस्तप्त्वासृजद्ब्रह्माब्राह्मणान्वेदगुप्तये।तृ ६
प्त्यर्थंपितृदेवानांधर्म्मसंरक्षणायच।मत्स्य।नास्तिविप्रसमोदेवोनास्तिविप्रसमोगुरुः।नास्तिवि
प्रसमःशत्रुर्नास्तिविप्रात्परोविधिः।वह्निपुराणे।नजातिर्नैकुलंराजन्नस्वाध्यायःश्रुतंनचा।को

कृ॰वि॰ क्रवानीति तत्प्राहुस्तमेव कृतवादिनः। प्रसावाप्रसंसा। वृथानंदोदिप्रयोजनप्रतिरेकेन। कौर्म्मे। नित्यं
४९ नैमित्तिकं काम्यं विमलं चेति कथ्यते। अहन्यहनि यत्किंचिद्दीयतेऽनुपकारिणे। अदिश्यफलं तत्स्याद्ब्रा
ह्मणाय तु नित्यकं। यत्तु पापोपशान्त्यर्थं दीयते विदुषां करे। नैमित्तिकं तदुद्दिष्टं दानं सद्भिरनुष्ठि
तम्। पापोपशान्त्यै इति नियतनिमित्तोल्लक्षणम्। अपत्यविजयैश्वर्यस्वर्गार्थं यत्प्रदीयते। दानं त
त्काम्यमाख्यातमृषिभिर्धर्म्मचिन्तकैः। यदीश्वरप्रीणनार्थं ब्रह्मविद्भ्यः प्रदीयते। चेतसा भक्तियु
क्तेन दानं तद्विमलं शिवम्। मनुः। येन येन हि भावेन यद्यद्दानं प्रयच्छति। तेन तेन हि भावेन तत्तत्
प्राप्नोति पूजितः। येन येन हि भावेन सात्विकादिना —। न दुःखं भवद्गीतासु। दातव्यमिति यद्दानं दी
यतेऽनुपकारिणे। देशे काले च पात्रे च तद्दानं सात्विकं विदुः। यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पु
नः। दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम्। अदेशकाले यद्दानमपात्रेभ्यश्च दीयते। असंस्कृतमव
ज्ञातं तत्तामसमुदाहृतम्॥ विष्णुधर्म्मे। कृतानि विधिहीनानि विबंधनार्थं परस्य च। क्रोधलोभाभिभू
तेन तामसानि विनिर्द्दिशेत्। सात्विकानि भवन्तीह श्रद्धया परं द्विजाः। तामसानां फलं भुंक्ते तिर्य्यक्त्वो य॰
मानवः सदा। वर्णसंकरभावेन वार्द्धके यदि वा पुनः। बाले वा दासभावे वा नात्र कार्य्या विचारणा। अतो
तथा तु मानुष्ये राजसानां फलं भवेत्। सात्विकानां फलं भुंक्ते देवत्वेनात्र संशयः। अत्र विपाको मत्स

परिबाधाकरं दानं महदप्यनुत्तमं व्रजेत्। निःफलमपकृष्टफलम्। पात्राप्रागल्भ्यमासाद्य दत्तं हीनं
फलं भवेत्। हीनम् ऊनं किंचिन्न्यूनमित्यभिप्रायः। यथोक्तमपि यद्दत्तं चित्तेनाकलुषेण न तु। तत्र संकल्प
दोषेण दानं तुल्यफलं स्मृतम्। युक्ताङ्गैः षड्भिर्दानं स्याद्विपुलोदयम्। अनुक्रोशवशाद्दत्तं दानमक्ष
यतां व्रजेत्। अनुक्रोशो दया। चतुःप्रकारमाह। ध्रुवमाजस्रिकं काम्यं नैमित्तिकमिति क्रमात्। वैदि
को दानमार्गोऽयं चतुर्द्धा वर्त्तते द्विजैः। कूपप्रकारारामतडागादि सर्व्वकामफलं ध्रुवम्। तदाजस्रि
कमित्याहुर्द्दीयते यद्दिने दिने। अपत्यविजयैश्वर्य्यस्त्रीबलार्थं यद्दीयते। इच्छासंस्थं तु तद्दानं
क्रियापेक्ष काम्यमित्यभिधीयते। कालापेक्षमर्थापेक्षमिति स्मृतम्। त्रिधा नैमित्तिकं प्रोक्तं सहोमं होम
वर्ज्जितम्। त्रैविध्यमाह। नवोत्तमानि चत्वारि मध्यमानि विधानतः। अधमानीति शेषाणि त्रैवि
ध्यत्वमिदं विदुः॥ तच्च विविनक्ति। अन्नं दधि मधुत्राणं गोभूरुक्माश्वहस्तिनः। दानान्युत्तमदा
नानि उत्तमद्रव्यदानतः। विद्यादानादनावासपरभोगौषधानि च। उपानत्प्रेषयामि छत्रया
नासनानि च। दीपकाष्ठफलादीनि चरमं बहुवार्षिकम्। बहूनि वर्षाणि प्राप्तं पुरातनमिति या
वत्। एतेन [illegible]समम् अपि हस्त्यश्वादि जीर्णं त्तप्राप्तमधर्मं भवति। विनाशत्वमाह। इष्टं दत्तमधीतं वा विनश्य
त्यनुकीर्त्तनात्। श्लाघानुशोचनाभ्यां च भग्नतेजो विपद्यते। तस्मादात्मकृतं पुण्यं न वृथा परिकीर्त्तयेत्। अ

क॰ वि॰ त्यायोर्थार्थिभ्यः प्रदीयते। अयाचितेन तद्दानं व्रीडादानमिति स्मृतम्। हृष्टा प्रिया निश्रुत्वा वा हर्षव
८५ द्यत्प्रदीयते॥ तद्धर्षदानम्। आक्रोशान वधर्षणां प्रतीकाराय यद्भवेत्। दीयते तापकर्तृभ्यो भ
यदानं तदुच्यते। षडङ्गमिति। दाता प्रतिग्रहीता च शुद्धा देयं च धर्म्मयुक्। देशकालौ च दानानाम
ङ्गान्येतानि षड्विदुः। दाता अपापरोगी धर्म्मात्मा दित्सुरव्यसनः शुचिः। अनिंद्याजीवकर्म्मा च ष
ड्भिर्दाता प्रशस्यते। अपापरोगी राजयक्ष्मादिरोगरहितः। पात्रम्। त्रिशुक्लः कृशवृत्तिश्च घृ
णालुः सकलेन्द्रियः। विमुक्तो योनिदोषभ्यो ब्राह्मणः पात्रमुच्यते। त्रीणि विद्यावयवृत्तानि शुक्लानि
शुद्धानि यस्य सः। घृणालुः कृपालुः सकलेन्द्रियां विकलेन्द्रियः। सौमुख्याद्यभिसंप्रीतिरर्थिनां द
र्शने सदा। सत्कृतिश्चानसूया च तदा श्रद्धेति कीर्त्यते॥ देयम्। अपराबाधमक्लेशं स्वयत्नेनार्जि
तं धनम्। स्वल्पं वा विपुलं वापि देयमित्यभिधीयते। यत्र यदुर्ल्लभं द्रव्यं यस्मिन्काले पि वा पुनः। दा
नार्हौ देशकालौ तौ स्यातां श्रेष्ठौ न चान्यथा। अवस्थादेशकालानां पात्रोपस्वसंपदाम्। हीने वापि भ
वेच्छ्रेष्ठं वाप्यन्यथा भवेत्। षड्विपाकत्वमाह। दुःफलं निःफलं हीनं तुल्यं विपुलमक्षयम्। षड्विपा
कत्वमुद्दिष्टं षडेतानि विपाकतः। तान्याह। नास्तिकस्तेनहिंस्रेभ्यो जारायौनितितायच। पिशुनभ्रूण
हन्तृभ्यः प्रदत्तं दुःफलं भवेत्॥ दुःफलं विपरीतफलम्। महदप्यफलं दानं श्रद्धया परिवर्जितम्॥

सं। सुवर्ण्णहस्तायगत्तोलोकान्देवैरधिष्ठितान्। लोमपादश्चराजर्षिःशान्तांदत्त्वासुतांशुभाम्॥
ऋष्यशृङ्गायविपुलैः सर्व्वकामैरयुज्यत। दत्त्वाशतसहस्रंतुगवांराजप्रसेनजित्। सत्त्वसानां
महातेजागत्तोलोकाननुत्तमान्। एतेचान्येचबहवोदानेनतपसाधिया। महात्मानोगताःस्वर्गं
शिष्टात्मानोजितेन्द्रियाः। तेषांप्रतिष्ठिताकीर्त्तिर्यावत्स्थास्यतिमेदिनी। दानयज्ञप्रजासर्गैर्जरते
हीदेवमानुषुयुः। दानेनभूतानिवशीभवन्तिदानेनवैराण्यपयान्तिनाशम्। परोपिबंधुत्वमुपै
तिदानाद्दानंहिसर्व्वव्यसनानिहन्ति॥ इतिश्रीकर्म्मविपाकेदानप्रशंसा। देवलः। दानलक्षणमह
द्विहेतुषडधिष्ठानंषडङ्गंषड्विपाकयुक्। चतुःप्रकारंत्रिविधंत्रिनाशंदानमुच्यते। तत्रद्विहे
त्विति। नाल्पत्वंवाभ्युदयावहम्। श्रद्धाभक्तिश्चदानानांवृद्धिक्षयकरेस्मृते। श्रद्धाआस्तिक्यबुद्धिः
स्नेहपूर्व्वमभिध्यानंभक्तिः शक्तिरितिपाठे। शक्तिरौदार्य्यम्। षडधिष्ठानमिति। षडधिष्ठानानिआ
श्रयानिमित्तत्वेनयस्य। धर्म्ममर्थंचकामंचव्रीडाहर्षभयानिच। अधिष्ठानिचदानानांषडेतानि
प्रचक्षते॥ तान्याह। पात्रेभ्योदीयतेनित्यमनपेक्ष्यप्रयोजनम्। केवलंत्यागबुद्ध्यायधर्म्मदानंत
दुच्यते। प्रयोजनमपेक्ष्यैवप्रसंगाद्यत्प्रदीयते। तदर्थदानमित्याहुरैहिकंहेतुफलकम्। स्त्री
पानमृगयाक्षाणांप्रसंगाद्यत्प्रदीयते। अनर्हेष्वपिदानेनकामदानंतदुच्यते। संसदिव्रीडयास्तु

क॰वि॰
४९

सत्यसंधोमहाव्रतः। स्वैः प्राणैः ब्राह्मणप्राणान्परित्रायदिवंगतः। रन्तिदेवश्चसांकृत्योवसिष्ठा
यमहात्मने। अपः प्राणापशीतोस्मा नाकलोकमितोगतः। आत्रेयश्चन्द्रदयमीरहंतोर्विवि
धंधनम्। दत्वालोकान्ययौधीमानन्नंतान्समहीपतिः। शिबिरौशीनरोङ्गानि पुत्रंचप्रियमौर
सम्। ब्राह्मणार्थमुपाकृत्यनाकपृष्ठमुपागतः। प्रतर्दनःकाशिपतिःप्रदायनयेस्वके। ब्राह्म
णायातुलांकीर्त्तिमिहचामुत्रचाश्नुते। दिव्यंमृष्टशतकंचसौवर्णंपरमर्द्धिमत्। छत्रंदेवावृधोद
त्वासराष्ट्रोभ्यगमद्दिवम्। सावित्रीकुंडलेदिव्येशरीरंजनमेजयः। ब्राह्मणार्थेपरित्यज्यजं
गमतुर्ल्लोकमुत्तमम्। सर्वरत्नंवृषादर्भौयुवनाश्वःप्रियास्त्रियः। रम्यमावसथंचैवदत्वा
मुंलोकमास्थितः। निमीराष्ट्रंचवैदेहोजामदग्न्योवसुंधराम्। ब्राह्मणेभ्योददौचापिगावश्चो
र्वीसंपत्तनाम्। अवर्षतिचपर्जन्येसर्वभूतानिचासकृत्। राजामित्रसहश्चापिवसिष्ठाय
महात्मने। मयन्तींप्रियांदत्वातयासहदिवंगताः। सहस्रजिच्चराजर्षिः प्राणानिष्टान्महा
यशाः। ब्राह्मणार्थेपरित्यज्यगतोलोकाननुत्तमान्। सत्यकामेश्वसंपूर्णंदत्वावेश्महिर
ण्मयम्। मुद्गलायगतःस्वर्गंशतद्युम्नोमहामतिः। नाम्ना स्तुद्युम्नोनामशाल्वराजःप्रताप
वान्। दत्वाराज्यमृचीकायगतोलोकाननुत्तमान्। मदिराश्वश्चराजर्षिर्दत्वाकन्यांसुमध्यमा

न्ति। नरः स्वर्गापवर्गौ च दानेनैव समश्नुते। अगस्त्यः। गोभिर्विप्रैश्च वेदैश्च सतीभिः सत्यवादि
भिः। अलुब्धै र्दानशीलैश्च सप्तभिर्धार्य्यते मही। येन्नं दत्तं न च हुतं न तीर्थे मरणं कृतम्। हिरण्य
मन्नमुदकं ब्राह्मणेभ्यो न चार्पितम्। दीना विवसना रूक्षाः कपालाङ्कितपाणयः। दृश्यन्ते ते महा
राजयाचमानाः पुनः पुनः। सीदन्ते द्विजमुख्याय यो र्थिने न प्रयच्छति। सामर्थ्ये सति दुर्बुद्धि र्न
रकायोपपद्यते॥ कौर्म्मे। यस्तु द्रव्यार्जनं कृत्वा नार्च्चयेद्ब्राह्मणान् सुरान्। सर्वस्वमपहृत्यैनं राजा रा- णभ
ष्ट्राद्विवासयेत्। दृश्यन्ते दुःखिनः सर्वे प्राणिनः सर्वदा मुने। दत्तदाना जायन्ते परभाग्योपजी
विनः। एके न तिष्ठताधस्तादन्ये नोपरि तिष्ठता। दातृयाचकयोर्भेदः कराभ्यामेव सूचितः।
दीयमानन्तु यो मोहाद्गोविप्राग्निसुरेषु च। निवारयति पापात्मा तिर्य्यग्योनिं प्रयाति सः। शा
तातपः। मा देहीति च यो ब्रूयाद्गव्यग्नौ ब्राह्मणेषु च। तिर्य्यग्योनिं प्रयाति सः। शातातपः। मा दे
पो हीति च ब्रूयाद्गव्यग्नौ ब्राह्मणेषु च। तिर्यग्योनिशतं गत्वा चांडालेष्वपि जायते। यमः। कन्या
प्रदाने यज्ञे वा यस्मिन्वा यज्ञसंभवे। विघ्नमाचरते यस्तु तमाहुर्ब्रह्मघातकम्। तस्माद्विभूति
मन्विच्छन्दाने विघ्नमाचरेत्। दद्यादहरहः पात्रे लोकद्वयजिगीषया॥ महाभारते। अर्हताय ध
नुरूपाणां नादेयं ह्यस्ति किंचन। उच्चैःश्रवसमप्यश्वं प्राणाधिकं सतां विदुः। अनुनीय यथाकामं

गायदेहिनः नापि कीर्त्तिर्यधर्म्मायतस्य वित्तं निरर्थकम्। तस्माद्वित्तं समासाद्य दैवाद्वा पौरुषा
द्यथा दद्यात्सम्यग्द्विजातिभ्यः कीर्त्तनानि च कारयेत्। व्यासः। अहन्यहनि याचन्तमहं मन्ये गुरुं
तथा। मार्ज्जनं दर्प्पणस्येव यः करोति दिने दिने कथयन्ति न याचन्ते भिक्षाहारा दिने दिने। अर्थि
भ्यो दीयतामेवमदत्तफलमीदृशम्। किं धनेन करिष्यन्ति धनिनो भंगुराशयाः। यदर्थं धनमिच्छ
न्ति तच्छरीरमशाश्वतम्॥ मनुः। दानधर्म्मं निषेवेत नित्यमैष्टिकपौर्त्तिकं। परितुष्टेन मनसा पा
त्रमासाद्य शक्तितः। अन्तर्वेदि यदैष्टिकं च वहिः सर्व्वं हि पौर्त्तिकम्। यत्किंचिदपि दातव्यं याचितेना
नसूयया। संपद्यते तत्पात्रं हि यत्तारयति सर्व्वशः। स्वर्गायुर्भूतिकामेन तथा पापोपशान्तये।
मुमुक्षुणा च दातव्यं ब्राह्मणेभ्यस्तथान्वहम्। वह्निपुराणे। अन्नं मूलं फलं शाकमुदपात्रं त
पोधनम्। दानं विभवतो दत्वा नराः स्वर्यान्ति धर्म्मिणः। ये यजन्ति ददन्तीह भोगान्भुंजन्ति नित्य
शः। न मामुद्दिश्य ते मूढा इहैव सुखिनः परे॥ याज्ञवल्क्यः। दातव्यं प्रत्यहं पात्रे निमित्तेषु विशे
तं षतः। याचितेनापि दातव्यं श्रद्धापूतं तु शक्तितः। मत्स्यपुराणे। उक्तसर्व्वगुणोपेतमुक्तदोषैर्वि
वर्ज्जितः। कामधुग्धेनुवद्दानं फलत्यात्मेप्सितं फलम्। इह कीर्त्तिं च दानाख्यां स्फीतान्भोगां
स्त्रिविष्टपे। दानश्रद्धा तृतीयेपि जन्मनि प्रभवोत्तमेः। दानेन भोगानाप्नोति दानेनायुश्च विंद

डुव्यं दानं माता पिता तथा। न दानेन विना किंचित्प्रार्थितं फलमाप्यते। न नो दानादधिकं किंचिद्दृश्य
ते भुवनत्रये। न दानशीलिन्ना मापत्तस्माद्दानं समाचरेत्। दानेन प्राप्यते स्वर्गो दानेन श्रीरवा
प्यते। दानेन शत्रून्जयति व्याधिर्दानेन नश्यति। वर्द्धितं वित्तमहंमन्ये शेषं कस्यापि रक्षसि यद्ददा
ति यदश्नाति तदेव धनिनो धनम्। अन्ये मृतस्य क्रीडन्ति दारैरपि धनैरपि। तपो धर्म्मं कृतयुगे
ज्ञानं त्रेतायुगे स्मृतम्। द्वापरे चाध्वरः प्रोक्तो दमो दानं दया कलौ। दानेन भोगी भवति मेधावी वृद्ध
सेवया। अहिंसया च दीर्घायुरिति प्राहुर्मनीषिणः। यतीनामुपशमो धर्म्मो नियमो वनवासिनाम्॥
दानमेकं गृहस्थानां शुश्रूषा ब्रह्मचारिणाम्। पापकर्मसमायुक्तं पतन्तं नरके नरम्। त्रायते दान
मेवैकं पात्रभूते हि जे कृतः। न्यायेनार्ज्जनमर्थानां वर्द्धनं चाभिरक्षणम्। सत्पात्रप्रतिपत्तिश्च सर्व
शास्त्रेषु पठ्यते। शतेषु जायते शूरः सहस्रेषु च पंडितः। वक्ता शतसहस्रेषु दाता भवति वा न
वा। दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य। यो न ददाति भुंक्ते तस्य तृतीया गतिर्भवति न
। आयासशतलब्धस्य प्राणेभ्योपि गरीयसः। गतिरेकैव वित्तस्य दानमन्या विपत्तयः। ब्राह्मणानु पा
रूपा यथा दद्यादर्थमर्थिने। विदधाति निधिं श्रेष्ठं पारलौकिकमात्मनः। कूर्मपुराणे। न कृः सुचे
वतीर्थेषु व्रतेषु नियमेषु च। सम्यक्क्षीणेषु विप्रेषु पश्चाद्दानं समाचरेत्। यस्य वित्तं न दानाय नोपभो

क॰वि॰ मवाप्नोति द्विजः षष्टीसमुत्सृजन्। विद्यादानं प्रगृह्याथ अपि पुस्तकरूपिणम्। भोजयेद्ब्राह्मणं
४५ छित्वा ततः शुध्यति वाडवः। गजप्रतिग्रहे कुर्याद्यति चांद्रायणत्रयम्। महास्नानं तपनं चापि ब्रह्म
कूर्चसमन्वितम्। रथादाने लक्षमेकं जप्त्वा मार्तण्डदैवतम्। अयुतं मूर्ध्नि गायत्र्याः संगमे स्नानमा
चरन्। षष्ठांशं सर्वथा त्यक्त्वा ब्राह्मणान् भोजयन्शुचिः। प्रतिगृह्याल्पदानानि तीर्थवारले जानि
तु। जपत्रिरक्षरं देवीं वैष्णवं व्रतमाचरेत्। वैष्णवं व्रतमेकादश्यां। एवं कर्म्मविपाकोऽल्पं दानमाद्दा
यवाडवः। जपध्यानार्चनस्नानदानाद्यैः शुद्धिमाप्नुयात्। जगोगायत्र्यारुद्रजपो वा ध्यानं श्रीवि
ष्णुसूर्यादीनाम्। अर्चनं च तेषामेव स्नानं महानद्यां संगमे वा। दानं षष्ठांशस्य द्विजभोजनं चा। आ
दिशब्दात्संतां गति वेद---परायणम्। एकाशनादि। एतच्चान्यच्च सर्वं यथादानप्रतिग्रहार्थं
कार्यमिति। एतत्ते कथितं सूत प्रायश्चित्तस्य लक्षणम्। सर्वशास्त्रात्समुद्धृत्य पुराणार्थं परिस्फुट
म्। आलोड्य सर्वशास्त्राणि पादं पादार्द्धमेव च। प्रतिग्रहाणां मुद्देशात्प्रायश्चित्तं प्रदर्शितम्॥ इ
ति सर्वशास्त्रग्रहे कर्म्मविपाके सद्धिरचिते प्रायश्चित्ताधिकारः समाप्तम्॥ अथ दानप्रशंसा॥ त
त्र व्यासः। वर्णानामाश्रयाणां च चातुर्वर्ण्ये युधिष्ठिरः। दानधर्म्मं प्रवक्ष्यामि यथा देवेन भाषितम्।
दानं परं प्रशंसन्ति दानमेव परायणम्। दानं वै धर्म्ममनुष्याणां दानं कोशो ह्यनुत्तमः। दानं पुत्रः परं

न्यसात्मनासह। शक्तः समुद्धरेदित्येवमेवेतानुभयोरपि। षष्ठांशं चाब्दलब्धस्य प्रायश्चित्तमथान
स्य च। परित्यज्य चरेत्कृच्छ्रं विप्रः सांतपनं व्रतम्। तीर्थे त्रिषवनस्नायी लब्धं देयात्स्वयाजयेत्।
दोषादेवं विमुच्येत दत्वा च द्विजभोजनम्। तद्द्वये तद्द्वयं कार्यं रुद्रजाप्यान्वितम्। भोजयेच्च
शतं विप्रान्षष्ठांशं च समुत्सृज्य च वाससी। लब्धस्यतस्य द्रव्यस्य षष्ठंभागं परित्यजेत्। समुत्स
र्गे परित्यागं च ब्रूते न तु पात्रस्य मुख्यत्वेन स्वस्य स्त्विति विधिना दानद्वारेणोक्रमः। यतस्तव्य
स्यातिमालिन्यं दूदयति। दीनेष्वान्तेष्वगोष्वित्यागः। एवं कृते शेषद्रव्यस्य शुद्धिर्दृष्टा। देशस्य प्रा
यश्चित्ते न शुद्ध——। तदाह। चांद्रायणत्रयं कुर्यात् क्रियाद्ग्रायी तीर्थसेवकः। लब्धत्रयं च गायत्र्या
जपेदेकाशनो द्विजः। सहस्रं भोजयेद्विप्रान्प्रतिमांस्थापयेद्विभोः। इति शुद्धिमवाप्नोति व्रतं कृत्वा
द्विजोत्तमः। ऋणार्थं प्रतिगृह्णाणो मुच्यते प्रतिदुः ग्रहात्। प्राजापत्याष्टकं कृत्वा दंभलोभविवर्जि
तः। जपन्देवीं यथाशक्ति शुद्धिमाप्नोति वै द्विजः। एवमेव विहार्थे दो——परिवृंहितम्। कृच्छ्रत्रयं त
था कृत्वा कुटुंबे त्ववसीदति। विंदुपात्तविमोक्षार्थं महापद्मसमन्वितः। नवाध्यन्ते धिदोषेण प्रातश्शो
दुः प्रतिग्रहात्। पृथिवीप्रतिगृह्यायसशैलवनकाननाम्। सद्वीपामर्णवयुतां जपेत्सांतपनत्रय
म्। अपिधान्तमयीं गृह्णन्तः कृच्छ्रत्रयं तथा। भूत्वा त्रिषवणस्नायी क्षिपेन्मासचतुष्टयम्। एवं शुद्धि

शब्दार्थविद्यो वेत्ति स्मृतिपुराणवित्। आचरति च यस्तत्त्वज्ञो विप्रः सोर्हति पर्षदम्। वेदं वेत्ति न वेदा
र्थं स्मृतिशास्त्रेष्वपारगः। स न कार्यः परिषदि सम्यक्कर्म्मवहिष्कृतः। प्रायश्चित्तकृतं द्रव्यं प्रतिगृह्य हि
जोत्तमः। स्वयं संशोध्य विधिवत्तारयेदुभयोरपि। द्वादशाब्दं वा षडब्दं वा त्र्यब्दं वा पातकोयमम्। व्रतं
परस्य दत्वाथ शास्त्रोक्तविधिना द्विजः। गुरुश्चरणरूपस्य तद्द्रव्यस्य परिग्रहम्। कुर्वन्नेवैकामतः स्व
नदेहान्नं व्रतमाचरेत्। आमरणं यावदित्यर्थः। कृच्छ्रचांद्रायणादीनि सततं कुर्यादिति भावः। किं तुल
ब्धं तद्द्रव्यार्द्धं परित्यजेत्। शास्त्रार्थदर्शनात्। एतेन दैवे पित्र्ये च कर्म्मणि तस्य योग्यतां निष्पादयन्ति॥
अत्र च त्र्यब्दादिकं कामकृतत्वाद्विषयाद्यवस्थं। अथ प्रायश्चित्तरूपदर्शनादकाममप्याह। अवृ
त्तस्य कर्तुर्यः सभ्यो भूत्वोपदेशकः। स तं दोषविशुद्ध्यर्थं प्राजापत्यत्रयं चरेत्। एतत्सम्यग्परिज्ञायो
पदेशविषयम्। अतो ह्यविज्ञाय शास्त्राणि विप्रापदेशं पापिनां कुत्रापि न दद्याद्दोषदर्शनात्। तथा
विज्ञापय शास्त्राणि च शास्त्रतत्त्वं पोलोभदंभाभिमत्तिं विहाय। एतस्विनां शुद्धिदोषः कृपावान्नि
र्दोषो येन नाकलोकं प्रयाति। अथातः। प्रायश्चित्तकृतं द्रव्यमुपरोधात्प्रमादतः। प्रतिगृह्य द्विजः
शीघ्रं प्रायश्चित्तं स्वयं चरेत्। सद्धासाजतमास्कृत्य षष्ठांशं च ततस्त्यजेत्। एतत्साधारणं कार्यं
प्रायश्चित्तं जनार्द्दनो। प्रायश्चित्तं धनं नीत्वा निष्पापइत्तितं ब्रुवन्। विप्रः प्रातःपतिस्वर्गांत्पितृ

रिसंस्मरणं परम्। प्रातर्न्निशि तथा सायं मध्याह्नादिषु संस्मरन्। नारायणमवाप्नोति सद्यः पापक्ष
यं नरः विष्णुसंस्मरणाद्देव समस्तक्लेशसंक्षयात्। मुक्तेपद्यांति स्वर्गेभोग्येस्तस्य विघ्नो सुर्मीयते। वासु
देवस नोयस्य जपहोमार्च्चनादिषु। तस्यान्तरायो वै सूत देवेंद्रत्वादिकं फलम्। कनाकपृष्ठगमनं पुन
रावृत्तिलक्षणम्। क्व जपो वासुदेवस्य मुक्तिबीजमनुत्तमम्। तन्मुखं परमं तीर्थे यत्रावर्त्तेवितन्व
ती। नमो नारायणायेति भाति प्राची सरस्वती। तस्मादहर्न्निशं विष्णुस्मरणात्पुरुषोत्तमः। न
याति नरकं सूत संक्षीणाखिलकल्मषः। ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वापरेर्च्चयन्। यदाप्नोति
तदाप्नोति कलौ संकीर्त्य केशवम्। एतज्ज्ञात्वा मन्योन्यस्य जगदात्मनि केशवे। सर्व्वपापपरिक्षीणा
यान्ति विष्णोः परं पदम्। अथ च। यत्नार्यमेवयेस्तस्य ब्रह्मणा पद्मयोनिना। तेषां प्रतिग्रहे घोरः पे
काश्चिरिवडुस्तरः। प्रतिग्रहेण सदृशो यो विधिर्द्विजसत्तमे। अपि सर्व्वमधीयाने तस्मृणुष्व मयेरित
म्। नाभिभाषेत तं दत्त्वा न मुखं चावलोकयेत्। दुष्टप्रतिग्रहहतो नरो भवति किल्बिषी मुखावलो
कनेयस्य प्रायश्चित्तीयते जनः। जानन्नपि कथं विप्रो निंदितं तत्समाचरेत्। इहैव तत्क्षणाद्धेनदि
वाकीर्त्तिसमो भवेत्। परलोकेपि तस्यैवमाहुदुर्ग्गतिमात्मनः। ऐहिकामुष्मिकार्थीयः स तत्कर्म वि
वर्जयेत्। परिषत्कर्म्म शाकेन कार्यं विप्रेण तद्विदा। नेतरेणाल्पसारेण तत्त्वार्थमविजानता। शब्द

कं॰वि॰ पसंघातः कथाका कु प्रतिग्रहात्। प्रतिग्रहात्परं नास्ति ब्राह्मणस्य विनाशनम्। दृश्यते ब्राह्मवर्च
४३ स्त्वं नरकं प्रतिपद्यते। नरकान्निसृतः कालात्क्षेत्रो वा ब्रह्मराक्षसः। अन्येर्जले मयो हस्तिमानुषो जल
मास्थितः। तस्माद्धि निर्गतः पश्चादुलूकः श्वापदो भवेत्। प्राप्य वै मानुषीं योनिं दरिद्रो दुःखित
स्तथा। व्याधितश्चैव मूर्खश्च बन्धुभिः परिवर्जितः। दृष्ट्वा परश्रियं दीप्तामनुतापं मुहुर्मुहुः। करोति
दुःप्रतिग्राही प्रायश्चित्तं न चैव चरेत्। तस्मात्प्रतिग्रहं कृत्वा प्रायश्चित्तं समाचरेत्। यतः प्रतिग्रहद्ध
नं न स्थिरं स्यात्कदाचन भप्राज्ञः प्रतिग्रहं पूर्वं न कुर्याद्वै कदाचन। कृपया प्रतिगृह्याथ तद्धनं सद्ग
तिं नयेत्। यजेद्वा सप्तसंस्थास्तु पुण्यान्यायतनान्यपि। शिवस्य विष्णोर्मार्त्तण्डस्यागारान्विनिवेश
येत्। वापीकूपतडागेषु ब्रह्मस्वानि विमुक्तये। एतेषु विसृजेच्छुक्तमन्यथा नरकं व्रजेत्। प्रायश्चि
त्तं विमुक्तं तु ब्राह्मणस्य प्रतिग्रहे। शूद्रादिवर्णतोयच्च चरेद्द्विचतुर्गुणं। पादुकोपानच्छत्रविधा ह
चामरवाससि। अनुक्तेष्वप्यहः प्रोक्तं प्रायश्चित्तमभोजनम्। पापेगुरूणि स्वल्पेषु स्वल्पानि तद्विदुः॥
प्रायश्चित्तानि सर्वे राजगुः स्वायंभुवादयः। दृष्टं परेषां पापानामनुक्तानां विशोधनम्। विष्णोर्जि
ष्णोः प्रयत्नेन स्मरणं पापनाशनम्। प्रायश्चित्तानि सर्वाणि तपःकर्मात्मकानि वै। यानि तेषाम
शेषाणां कृष्णानुस्मरणं वरम्। कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते। प्रायश्चित्तं तु तस्योक्तं ह

निमज्जेत्तयावदाहूतसंप्लवम्। रक्तोदपूयमांसादौवसेत्कल्पत्रयंनरः। अनुगृह्णन्स्वसमस्माच्छास्त्रो
क्तविधिनाद्विजः। प्राजापत्यत्रयंकुर्यादथवाशतभोजनम्। जपेद्वाप्यस्यवामीयशिवसंकल्पमेवच
। रथन्तरंवामदेव्यंमुच्यतेतेनकिल्बिषात्॥ हिरण्यकामधेन्वादेरन्येषांचयथोदितम्। महाभूतघटादि
भ्यः प्रायश्चित्तमथोच्यते। यद्येभ्यः प्रतिगृह्णीयाद्धर्माभासोद्विजोत्तमः। समज्जेन्नरकेपूयविष्ठामूत्रस
माकुले। धर्माभासोद्विजस्तस्मात्प्रतिगृह्यचरेद्व्रतम्। तप्तकृच्छ्रद्वयंचैवमतिकृच्छ्रंतथैवच। अथवामु
च्यतेपापात्प्राणायामपरायणः। प्राणायामदहेत्सर्वंयच्छरीरेस्तिपातकम्। यथावह्निर्गतोवह्निः
शुःकाष्ठंदहतीधनम्। प्राणायामस्तथापापंशुःकाष्ठंनात्रसंशयः। पावकाइवदीप्यन्तेजपहोमैर्द्विजो
त्तमाः। प्रतिग्रहेणशाम्यन्तेपावकःसलिलादिव। नाप्रतिष्ठेयेजादोषान्प्राणायामैर्द्विजोत्तमाः। ना
शयन्तीहविद्वांसोवायुर्मेघाविवांबरे। त्वगसृङ्मांसपिशितास्थीनिमेदोमज्जरसास्तथा। एकैकंसप्तरा
त्रेणपुनातिविधिवत्कृतः। प्राणायामैर्दहेद्दोषान्धारणाभिश्चकिल्बिषम्। प्रत्याहारेणयेलोका
न्ध्यानेनपरमंपदम्। नास्तितत्पातकंलोकेप्राणायामैर्नशुद्ध्यति। सव्याहृतिंसप्रणवांगायत्रींशि
रसासह। योजयेदायतप्राणःप्राणायामःसउच्यते। प्राणायामेनशुद्ध्यन्तिगायत्र्याजपनेनच। ना
रायणानुस्मरणान्मुच्यन्तेदुःप्रतिग्रहात्। गायत्र्यादशलक्षैश्चप्राणायामसहस्रशः। नश्यन्तेपा

वि० स्वर्कं प्रतिपद्यते। नरो भूविक्रयं कृत्वा चरेच्चांद्रायणत्रयम्। त्रिगुणां जपेद्वेदं नव ग्रहमखं तथा॥
२२ एतेन मुच्यते पापादन्यथा तु नरकं व्रजेत्। महद्दानसमं दानं न भूतं न भविष्यति। यत्तत्षोडशधा
प्रोक्तं मत्स्ये तु महात्मना। आद्यं तु सर्वदानानां तुलापुरुषसंज्ञितम्॥ ततो हिरण्यगर्भं दानम्।
कल्पपादपगोसहस्त्रं च हिरण्यधेनुः महाभूतघटदानम्। एतेष्वन्यतमं गृहीत्वा प्रायश्चित्तीय
तेन नरकं यानि तत्त्वमनुभवति। तत्र तु तुलापुरुषदानभाण्डं गृहीत्वा चान्द्रायणं चरेत्। यस्मात्तुला
यामारूढो यजमानः स्वयं तुलेत्। तस्मान्मांसमत्तस्य तद्द्रव्यं परिकीर्तितम्। हिरण्यगर्भब्रह्मा
ण्डकल्पपादपेषु प्रतिगृहीतेषु जलेविष्वनस्नायी चरेत्सान्तपनद्वयम्। गोसहस्रस मुद्भूता
दुस्तरा स्त्वा द्विजन्मनां। गोशते गोसहस्रे च वैतरण्यस्त्रयः स्मृताः। एवं तस्त्रश्चैव या गावो रत्ने
हेमविनिर्मिताः। एतास्त्वद्विजवर्य्येण वर्जनीया प्रयत्नतः। यज्ञकर्म्मणि या धेनुर्या धेनुर्व्रतक
र्म्मणि। प्रायश्चित्तनिमित्ता या होमार्थे दुग्धभोज्यया। मधुपर्के च या धेनुर्या धेनुः कर्म्मसिद्धये। ए
ताः सर्वा द्विजो विद्यान्प्रतिगृह्य न तस्ततः लिप्यते न च पापेन पद्मपत्रमिवांभसा। गोसहस्राधिका
स्वैकां प्रतिगृह्य त्वकामकः। गोमूत्रयावकाहारो मासेनैकेन सुध्यति। ऋग्सामवेदो नियतो जपेद्वा
शिवसंन्निधौ। एवं तत्पापतो मुच्येदन्यथा नरकं व्रजेत्। प्रतिगृह्यैव तरणीं लोहदंडमहाभयम्। विरह्यं

नोत्तुवाडवानांरवगोत्तम। मानुष्यमपिदुःष्प्रायंस्वर्गलोकस्यकिंपुनः। दृशाशूनासमश्वक्रीत्यादिदो
षदर्शिनाह्वोरोराजंति यहः। योराज्ञःप्रतिगृह्णातिलुब्धःसच्छास्त्रवर्जितः। सपर्यायेणयातीहन
रकानेकविंशतिम्। नासिश्रमंधतामिश्रमित्यादि। एवंज्ञात्वानकुर्वीतदुष्टराजप्रतिग्रहम्। मू
दवुद्धिश्चतंकृत्वा चेरेचांद्रायणत्रयम्। सहस्रंभोजयेद्विप्रान्स्वयंभक्त्या जितेंद्रियान्। एतेनैवविं
शुध्यन्तिदुष्टाराजप्रतिग्रहात्। गृहीत्वाह्विमुखींधेनुंधान्यादिदशपर्वतान्। एतेष्वन्यतमंगृह्य
नभूयः पुरुषोभवेत्। धान्यपर्वतलवणाःगुडतिलकर्पासघृतरत्नभूषाशर्करावलाः। एते
ष्वन्यतमंगृह्यनभूयःपुरुषोभवेत्। धान्यपर्वतलवणाःगुडतिलकर्पासघृतरत्नभूषाशर्करा
वलाः। एतेदशवलाःप्रोक्ताह्विमुखीचततोऽधिका। एषांप्रतिग्रहेविप्रःक्षिपेन्मासचतुष्टयम
।प्रजापत्येनकृच्छ्रेण षष्ठांशंतुपरित्यजेत्। जपेद्द्वादशलक्षाणिगायत्र्याःसायभोजनः। एते
नमुच्यतेपापादन्यथानरकंव्रजेत्। भूमिंयःप्रतिगृह्णातिभूमिंयश्चप्रयच्छति। उभौतौपुण्यक
र्माणौनियतंस्वर्गगामिनौ। प्रतिग्रहेणदोषःस्याद्दोषस्तस्यचविक्रये। तथापिस्वल्पयज्ञेनमु
च्यतेतस्यरिग्रहात्। अन्यैरपिचभूतायःसशक्तिनुपपेदत्ते। नरकेपच्यतेघोरेयुगानामेकविंश
ति। तस्माद्भूमिंचपत्नींचमातरंवंदनेनतथा। अन्यैरपिहृतांदृष्ट्वासद्यःप्राणान्परित्यजेत्। विक्रीणान्सतानूनंन

वे॰ दि॰ र्धनि। कन्याप्रतिग्रहं कृत्वा ब्राह्मणस्तु यथाविधिः। कर्मणे तेन ततः कुर्याद्भूरिदानं द्विजोत्तम। कन्याप्रतिग्रहस्तेन शाम्यते तत्सुदानतः। सर्वैरपि तथा वर्णैः कृत्वा कन्याप्रतिग्रहम्। जलौके वा स्त्रवाना यन्नृणां स्यादसुखावहाः। जलौकाः रक्तमादत्ते केवलं सा तपस्विनी। इतरा तु धनं वीर्यं मांसं चित्तं सुखं बलम्। साशंका बाल्यभावे स्याद्यौवने सापराध्यसुखी। तृणवन्मन्यते पंचाद्वृद्धभावे स्वकं पतिम्। यतस्तस्मात्स्वकर्तव्यं भूरिदानं सुभेच्छया। भूरिदानेन शुद्ध्यन्ति कृत्वा कन्याप्रतिग्रहं। कपिलां प्रतिगृह्णीयाद्धोमार्थं च विशेषतः। कपिलादर्शने पुण्यं तथा चस्पर्शने परम्। पुण्यं दानपालाभ्यां पुण्यं तस्याश्च पोषणे। प्रतिगृहतस्तस्याः पुण्यात्पुण्यतरः स्मृतः। परं न विक्रयं कुर्यान्महदोषाय तद्यतः। कपिलाविक्रयं कृत्वा कुर्याच्चान्द्रायणव्रतम्। यथा शूद्राय तां दत्वा चरेच्चान्द्रायणव्रतम्। तस्मात्तां प्रतिगृह्णीयान्न परं विक्रयं चरेत्। कृष्णाजिनं मृते शय्यां काले पुरुषमेव च। न ग्रहं छत्रत्रयं कुर्यादैन्दवेन समन्वितम्। सत्रेण वाजयजेता थगायत्रीलक्षसमकाम्। वापीकूपतडागादि विसृजेद्धनसंचयम्। यदनित्यं भवेद्यस्मान्न स्थिरं तद्भवेद्वसु। प्रतिग्रहार्जितं द्रव्यं सर्वं नश्यति तूलवत्। राजप्रतिग्रहो घोरो मध्वास्वादो विषोपमम्। तज्ज्ञात्तु मानुषः कस्मात्कुरुते स्मि प्रलोभनम्॥ भक्षितेमानुषे मांसे प्रायश्चित्तं विधीयते। तत्कर्तव्यं कचित्सद्भिस्ततनु राजप्रतिग्रहः। प्रति यहरतो

म॥ गृहोपकरणे सर्व्वं गोमहिष्यादिभूषणम्। कंडनी पेषणी चुल्ही उदकुंभ प्रमार्ज्जनम्। शय्याश्च भाज
नाद्यत्र विना नरथ गोवृषम्। प्रदत्तं प्रगृहीतं च ग्रह दान प्रतिग्रहात्। गृहप्रतिग्रहस्तस्मा दुस्तरो
हि द्विजन्मनां। तस्मात्प्रतिगृह्यं कृत्वा प्रायश्चित्तं समाचरेत्। कृच्छ्रत्रयं चरेद्विप्रो महासांतपनं तथा। श
तं वा भोजयेद्विप्रान्गायत्रीलक्षमेव च। प्रायश्चित्ते कृते विप्रो मुच्यते दुःप्रतिग्रहात्। प्रायश्चित्तं न चेत्कु
र्य्याद्ब्राह्मणोऽज्ञानमोहितः। युवानोस्य म्रियंते नष्टा रः पुत्रपौत्रकाः। म्रीताः प्रेतत्वमायांति न
स्मां कुर्य्यात्प्रतिक्रियाम्। अश्वदाने महादानं यत्नात्तच्च विवर्ज्जयेत्। यावंति तस्य रोमाणि तावत्स्व
नो र्गेष्व दो वसेत्। तमेव प्रतिगृह्णा नरकं प्रतिपद्यते। प्रतिग्रहेण दोषः स्याद्दोषस्तस्य च विक्रये॥
ऋषिभिस्तु पुरा गीता गाथा ह्यश्वस्य विक्रये। यानि कानि च पापानि ब्रह्महत्यासमानि च। प्राय
श्चित्तैर्विशुध्यंति न त्वेव हयविक्रयी। रोम्णि रोम्णि ब्रह्महत्या पापं तस्य विधीयते। अश्वानां
हयग्रीवानां विक्रयेन पुमान्भवेत्। ग्रासं कल्पशतं यावत्पच्यते ताम्रभ्राष्ट्रके। तस्माद्धि निर्ज्जितः
काले पाषाणास्तु भवेन्नरः। तस्मान्न प्रतिगृह्णीयाद्विक्रयेपि च दोषदः। अश्वानां विक्रयं कृत्वा
चरेच्चांद्रायणव्रतम्। गायत्र्याश्च जपेद्वापि त्रीलक्षान्समाहितः। प्रतिग्रहे चरेद्विप्रो घृतकृ
च्छ्रेन संशयः त्रिगुणं च जपेद्देवं ब्राह्मणान्भोजयेच्छतम्। आपन्नः प्रतिगृह्णाति तेनैव चावष्टु

क॰वि॰ विप्रो भवति किल्विषी। अपि भिंदंश्च गृह्णानः पुण्यमंत्रमुदीरयेत्। किं पुनः कांचनादौ तु प्रायश्चित्तं
५० चरेत्ततः। प्रतिग्रहेषु सर्वेषु षष्ठांशं परिकल्पयेत्। षष्ठांशं च ततस्तस्मात्प्रायश्चित्तं समाचरेत्। प्रतिग्रहा
त्तु षड्भागं वाणिज्याच्च तृतीयकम्। कृषितो विंशमेवाथ त्यजतो नास्ति पातकम्। प्रतिग्रहेषु सर्वेषु ज
पहोमादिकं भवेत्। प्रतिग्रहे तु कुत्सितानां त्रिभिः कृच्छ्रैर्विशोधनम्। त्रिगुणं वा जपेद्देवं गायत्र्यां वा
पु तत्त्रयम्। जपहोमादिकं कुर्यात् ज्ञात्वा यस्तु प्रतिग्रहम्। षष्ठांशं तु परित्यं मुच्यते नात्र कि
ल्विषात्। न भाषेत ग्रहीतारं महिषीरथवाजिनाम्। कृष्णाजिनस्पशय्यापाद्विमुख्या गोस्तथैव
च। स्वकृषेर्यैं तिला जाता स्वगोष्ठे गौर्विवर्द्धिता। ऋणयज्ञविवाहार्थे विक्रीणन्ने हदोषभाक्। गवां वि
क्रयकारी तु गविलोमानि यानि च। तावद्वर्षसहस्राणि गवां गोष्ठे कृमिर्भवेत्। गुडधेन्वादिधेनूनां प्राय
श्चित्तमथोच्यते। गुडधेनुर्घृतधेनुस्तिलधेनुर्जलधेनुर्मधुधेनुः शर्कराधेनुः रसधेनुः स्वरूपधेनुरिति। एता
सां दशधेनूनामितरासां विशेषतः। प्रतिग्रहे चरेद्विप्रः प्राजापत्यमतंद्रितः। जपेद्वापोनुषसूक्तमस्फ
चैवाघमर्षणम्। अहोरात्रे स्थितं चैव मुच्यते तेन किल्विषात्। अजां च महिषीं चैव वृषभं युक्तलांग
लम्। शकटं प्रतिगृह्याथ पादोनं कृच्छ्रमाचरेत्। तु प्रान्पुरुषसूक्तं च मंडलाध्यायमेव च। अत्तर्पणेन
कृच्छ्रस्य मुच्यते तेन किल्विषात्। गृहदानं महादानं न दानं वै गृहात्परम्। येन रत्नेन दानेन सर्वं दत्तं भवेन्नृण

स्वधर्म्मो नश्यते विप्रे प्रायश्चित्तमकुर्व्वतः। अहोरात्रकृतं पुण्यं पाक्षिकं मासिकं तथा। षाण्मासिकं
द्विकं तद्वद्द्वादशाब्दिकमेव च। जन्मार्जितं च सुकृतं प्रतिग्रहकृतेन तु। नश्यति ब्राह्मणस्यैव प्राय
श्चित्तमकुर्व्वतः। ब्राह्मणान्नेन दारिद्र्यं क्षत्रान्नेन पशुर्भवेत्। वैश्यान्नेन तु कृमित्वं स्याच्छूद्रान्नान्नरकं
सदा। एतेन सिद्धान्तोपयोगाज्जन्मान्तरविपाको ह्युक्तः। एवमन्यैर्म्महादानैर्गृहीतैर्द्विजसत्तमः। नर
कं समवाप्नोति अकृत्वा कायशोधनम्। अरुण उवाच। भुक्त्वान्नं ब्राह्मणेनेह ब्राह्मणादिषु वर्णि
ना। कीदृशं वद कर्त्तव्यं प्रायश्चित्तं सुरोत्तम॥ श्रीभानुरुवाच। ब्रह्मणः सकृद्भुक्त्वा सायं प्रातः शुचि
स्थितः। गायत्र्यष्टसहस्रं च जप्त्वा शुद्धिमवाप्नुयात्। द्विगुणं क्षत्रियस्यान्ने वैश्यान्ने त्रिगुणं स्मृतम्। चतु
र्गुणं च शूद्रान्ने तत्र संशुध्यते यवैः। गणान्ने गणिकान्ने च यज्ञान्ने ग्रामयाजके। सूतिकान्नं च वै भुक्त्वा
विप्रश्चान्द्रायणं चरेत्। सर्व्वत्रापायद्विषमकामादज्ञानाच्च ज्ञेयम्। मासमेकं यवान्भुक्त्वा लदतमेकं
द्विजो जयेत्। गायत्र्याः स्तकपयोभक्षी मुच्यते सत्प्रतिग्रहात्। परमाङ्गेनेनापि म्लेच्छस्य जाति प्रतिग्रहः
नयाद्धो ब्राह्मणेनेह च्यात्मनः श्रेय इच्छता प्रतिगृह्यान्त्यजाद्द्विजः पतति क्लीववदस्तु ततः। सम्यग्यो नरकं
याति योनिं चायाति सौकरीं। अरुण उवाच। प्रतिग्रहेण विप्राणां ब्राह्मं तेजः प्रणश्यति। आयुः स्वर्गं
यशः कीर्त्तिः क्षीयते सत्प्रतिग्रहात्। अतः प्रतिग्रहं कृत्वा प्रायश्चित्तं समाचरेत्। दुष्प्रतिग्रहवाति

क०वि० स्तस्लीयते। यथाश्मनिस्थितंतोयंलीयतेमारुताक्षेपैः। एवंकर्तृषुतत्पापंनाशयेत्सर्वेजनः। कृ
३९ त्वापापंतम्भुंजीतत्रिरात्रमहरेवच। कुर्य्याद्ब्राह्मणशुश्रूषामाप्रदानाद्व्रतस्यच। अछिद्रमितिय
द्वाक्यंवदन्तिक्षितिदेवताः। प्रणम्यशिरसाधार्यमग्निष्टोमफलप्रदम्। व्रतछिद्रंतपश्छिद्रंयाछि
द्रंयज्ञकर्म्मणि। सर्वंभवतिनिश्छिद्रंयस्यचेछन्तिवाडवाः। उपवासोव्रतंचैवस्नानंतीर्थफलंतपः॥
विप्रैःसंपादितंयस्यसंपन्नंतस्यतत्फलं। अछिद्रंब्राह्मणेनदद्यात्स्वेछयाब्राह्मणस्ययः। प्रायश्चित्त
मिदंतस्यगायत्र्यष्टशतंजपेत्। क्षत्रियेद्विगुणंप्रोक्तंवैश्येपचत्रिगुणंस्मृतम्। शूद्रेचतुर्गुणंजाप्यं
गायत्र्याःशुद्धिमिछता। एवंसर्वंसमालोच्यवर्णानामनुपूर्वशः। तस्मान्नदेयमछिद्रंब्राह्मणेन
विपश्चिता। अश्रद्दधानायभक्तायगुरुशुश्रूषवेतथा। विनीतायैवदातव्यमछिद्रंधर्म्मकांक्षिभिः
॥ इतिश्रीकर्मविपाकेप्रायश्चित्तानि। पुराणेभ्यः। सूर्यारुणसंवादे॥ अरुणउवाच। प्रतिग्रहध
नाविप्रावदन्त्येवंमहर्षयः। तथापिपात्रेवगंतिनारकीनात्रसंशयः। प्रतिग्रहंगृहीत्वातुकांगतिं
संव्रजेद्विजः। कथंवानरकान्मुच्येत्तन्मेवददिनेश्वर। श्रीसूर्य्यउवाच। प्रतिग्रहेणपमेयोमध्वा
स्वादोविषोपमः। ब्राह्मणस्यभवेन्नित्यंदाताधर्म्मेणयुज्यते। जपोहोमस्तथादानंस्वाध्यायादिकं
तंशुभम्। दारुप्रयछतेविप्रस्तेनोनस्वर्गमाप्नुयात्। यद्दानंद्वागृहीत्वातुप्रायश्चित्तंसमाचरेत्।

र्वैः पराकैः शोधितस्त्रिभिः। अहन्तु यवसेद्यस्तु स्त्रीण्यहान्युपहन्त्त प्रमुच्यते पातकैः सर्वैस्त्रिभिर्ज
प्त्वा घमर्षणम्। यथाश्वमेधः क्रतुराट् सर्वपापापनोदनः। तथा घमर्षणं सूक्तं सर्वपापापनोदनम्।
हत्वा लोकानपीमांस्त्रीन श्नन्नपि यतस्ततः। ऋग्वेदं धारयन्सङ्गे नैनः प्राप्नोति किंचन। ऋक्संहितां
त्रिरभ्यस्य यजुषो वा समाहितः। साम्नां वा सरहस्यानां सर्वपापैः प्रमुच्यते। यथा महाह्रदं प्राप्य क्षि
प्तं लोष्टः प्रणश्यति। तथा दुश्चरितं सर्वं वेदे त्र्यावृत्य मज्जति। ऋचो यजूंषि चान्यानि सामानि विवि
धानि च। एष ज्ञेयस्त्रिविद्वेदो यो वेदैनं स वेदवित्। अन्त्रिः सर्ववेदसहस्राणां वद्याम्यहमतः प
रम्। येषां जप्यैश्च होमैश्च पूज्यन्ते किल्विषावृताः। अघमर्षणं वेदकृतं शुद्धवत्यस्तरत्समा। कू
ष्माण्ड्यः पावमान्यश्च दुर्गा सावित्रीरेव च। शतरुद्रमहस्त्यां शिर ---- स निषंगादयस्तो
भाः सामानि ---- व्याहृतीस्तथा। भानुं डानि च सर्वाणि गायत्री चैव तत्तथा। गोस्तु मिन्द्रशुद्धे
च शुद्धये सूर्यसामत्ती। त्रीण्याज्यदोहानि रथन्तरं च चाग्नि व्रतं वामदेवं वृहच्च। एतानि जप्तानि पुन
न्ति पापाज्जातिस्मरत्वं गमत्तेय इच्छेत्॥ इति श्री मद्धिरचिते सारसंग्रहे कर्मविपाके ऐहिक प्रायश्चित्ता
नि॥ ब्रह्मपुराणे सनत्कुमारः। प्रायश्चित्ते यदा चीर्णे पुरुषो नष्टकल्मषः। भगवन्परिपृच्छामि तत्
स्तस्मै कुत्र गच्छति॥ ब्रह्मोवाच॥ न रयं गच्छति कर्त्तारं न च गच्छति पार्षदम्। मारुतादित्यसंयोगाज्जलवत्त

१४० मोक्ष उपवासः प्रणश्यति। मनुः। एवमेतैर्द्विजातयः शोध्या व्रतैराविःकृतैनसः। अनाविःकृतपापां
३९ स्तु मन्त्रैर्होमैश्च विशोधयेत्। ख्यापनेनानुतापेन तपसाध्ययनेन च। पापं विमुक्तं इम। यातित थादाने
न चापदि। उपाध्यायं हि संतर्प्य तस्मात्पापात्प्रमुच्यते। नैव कुर्य्यात्पुनरिति निवृत्त्या पूयते तु सः।
यदुस्तरं यदुरापं यद्दुर्गं यच्च दुष्करम्। सर्व्वं तत्तपसा साध्यं तपो हि दुरतिक्रमम्। इत्येतदेनसो
मुक्तैः प्रायश्चित्तं यथाविधि। अत ऊर्द्ध्वं रहस्यानां प्रायश्चित्तं निबोधत। सव्याहृतिप्रणवकाः प्राणा
यामास्तु षोडश। अपि भ्रूणहनं मासात्पुनन्त्यहरहः कृताः। कौत्सं जप्त्वाप इत्येव — — पंच — प्रति।
माहेंद्रश्शुद्धवत्यश्च सुरापोऽपि विशुद्ध्यति। सकृज्जप्त्वास्यवामीयं शिवसंकल्पमेव च। अपहृत्य सु
वर्णं तु क्षणाद्भवति निर्म्मलः। हविष्पान्तीयमभ्यस्य न तमंह इतीति च। प्रतिगृह्य प्रतिग्राह्यं भुक्त्वा
चान्नं विगर्हितम्। जपंस्तरत्समंदीयं पूयते मानवस्त्र्यहात्। सोमारौद्रं तु बह्वेना मासमभ्यस्य
शुद्ध्यति। स्रवन्त्यामाचरन्स्नानमर्य्यम्णामिति — यम्। अब्दार्द्धमिन्द्रमित्येतदेनस्वी सप्तकं जपे
त्। अप्रशस्तं तु कृत्वाप्सु मासमासीत भैक्षभुक्। मन्त्रैः शाकलहोमीयैरब्दं हुत्वा घृतं द्विजः। सु
गुर्वप्यपहन्त्येनो जप्त्वा वा नम इत्यृचम्। महापातकसंयुक्तोऽनुगच्छेद्गाः समाहितः। अभ्यस्या
— पावमानीर्भैक्षाहारो विशुध्यति। अरण्ये वा त्रिरभ्यस्य प्रयतो वेदसंहिताम्। मुच्यते पातकैः स

ब्रह्मकूर्च्चमिदं कृत्त्वं मासिमासिचरन्द्विजः। सर्व्वपापविशुद्धोवैजायतेनात्रसंशयः। चतुर्थ्यादि
गतंपापंयद्देहेयातिदेहिनाम्। ब्रह्मकूर्चोदहेत्सर्व्वंप्रदीप्तोग्निरिवेंधनं। एकादश्यामुपोष्य द्वा
दश्यांभगवन्तंश्रीवासुदेवमभ्यर्च्चयेत्। पुष्पधूपगंधानुलेपादिभिर्नैवेद्यैर्वह्निब्राह्मणतर्पणै
श्चव्रतमेवसंवत्सरंकृत्त्वापापेभ्यःपूतोभवतियावज्जीवंकृत्त्वाश्वेतद्वीपमवाप्नोति। उभयपक्षे
द्वादशींवधंपंचवत्सरेणस्वर्ग्गलोकमवाप्नोति। यावज्जीवंविष्णुलोकमितिइदमेवपंचदशीष्व
पि। ब्रह्मभूतममावास्यांपौर्णमास्यांतथैवच। ब्रह्मभूतंपरिचरन्केशवंमहदाप्नुयात्। दृश्यते
सहितौयस्यांदिविचंद्रबृहस्पती। पौर्णमासीतुमहतीप्रोक्तासंवत्सरेतुसा। तस्यांदानोपवा
सांद्यमक्षयंचप्रकीर्त्तितम्। तथैवद्वादशीशुक्लायास्याच्छ्रवणसंयुता। यमः। द्वेचाष्टम्यौमास
स्यचतुर्द्दश्यौतथैवच। आमावास्यांपौर्णमास्यांसप्तमीद्वादशीद्वयम्। संवत्सरमभुंजानःस
ततंतुजितेन्द्रियः। मुच्यतेसर्व्वपापेभ्यःस्वर्ग्गलोकंचगच्छति। ब्रह्मचर्य्यफलंयच्चयत्फलंक्रतु
याजिनाम्। ऋतुकामफलंयच्चतत्तदाप्नोत्यसंशयं। देवलः। ब्रह्मचर्योपवासोतुसत्यमामिष
वर्ज्जनम्। पापघ्नायचचत्वारिवरिष्ठानीतिनिश्चयः। स्त्रीणांसंप्रेक्षणस्पर्शनाभिःसंकथनादपि। छे
दिन्यततेयस्यब्रह्मचारीसवह्निरान। उपवासोविनश्येत्तदिवास्वापाच्चमैथुनात्। अप्सर्थजलपा

त्वा यदन्यदा महापातकेभ्यः पापं कुरुते तस्मान्मुच्यते। तृतीयं चरित्वा सर्वस्मादेनसो मुच्यते। ए
वं तान्स्त्रीन् कृच्छ्रांतिकृच्छ्रं चरित्वा सर्ववेदेषु स्नातो भवति। यश्चैवं वेद वेदम्। मार्कण्डेयः। त्र्यो
षितश्चतुर्दश्यां पंचदश्यामनन्तरम्। पंचगव्यं समश्नीयाद्धविष्यान्नं त्वनन्तरं ब्रह्मकूर्चमिदं
कुर्याद्दौर्भाग्यशमनाय वै॥ पक्षान्ते त्वथवा कार्यं मासान्ते त्वथवा पुनः। मासेन द्विर्नरः कृ
त्वा ब्रह्मकूर्चं समाहितः। सर्वपापविनिर्मुक्तो यथेष्टां गतिमाप्नुयात्। तत्र पंचगव्यम्। रक्ता
श्वेतताम्रवर्णाभा नीला कृष्णा यथाक्रमात्। गोमूत्रं गोमयं क्षीरं दध्याज्यं गोः समाहरेत्। अथै
तानि समस्तानि कपिलायाः समाहरेत्। गायत्र्यादाय मूत्रं गंधद्वारेति गोमयं। आप्यायस्वे गो
ति वै क्षीरं दधिक्राव्णेति वै दधि। तेजोसि शुक्रमित्याज्यं देवस्य त्वा कुशोदकं। अघमर्षणसूक्ते
न संयोज्यं प्रणवेन वा। सौवर्णे राजते ताम्रे पलाशे पत्र एव वा। शातातपः। गोमूत्रं स्यादेकगुणं
गोशकृद्द्विगुणं स्मृतं। क्षीरमष्टगुणं दद्याद्दधि दद्याच्चतुर्गुणं। सर्पिस्तु त्रिगुणं दद्यात्पंचगव्य
विधिस्त्वयम्। नव पत्राः शुभा दर्भाः अच्छिन्नाग्राः अदीर्घकाः। तैः समुद्धृत्य होतव्यं देवताभ्यो
न्मद्यपश्छर्दने कृते। पंचगव्यं च तस्योक्तं प्रत्यहं कायशोधनमिति॥ व्यासः। अथाङ्गिराः। महापात पा
कसंयुक्ता वर्षैः शुध्यन्ति ते त्रिभिरिति। तथा यमः। बृहस्पतिसवेनेष्ट्वा सुरापो ब्राह्मणः पुनः। सम

न्नविकारस्यैवसुरात्वम्। अतश्च। सुरावैमलमन्नानांपाप्माचमलमुच्यते। तद्ब्राह्मणराजन्यौवै
श्यश्चनसुरांपिवेत्। इतिपैष्ट्याएववर्णत्रयसंबंधित्वेननिषेधः गौड्यादीनांतुमद्यानांब्राह्मस्यै
वसंबंधित्वेननिषेधः नतुक्षत्रियवैश्ययोः। यतः यक्षःपिशाचान्नंमद्यंमांससुरासवम्। तद्ब्राह्म
णेननात्तव्यंदेवानामश्नताहविरितिमनुः। वृद्धविष्णुनापि। माधुकमैक्षवंसैरंतालंखार्जूरपा
नसम्। मध्वूत्थंचैवमाध्वीकंमैरेयंनालिकेरजम्। अमेध्यानिदशैतानिमद्यानिब्राह्मणस्यतु॥
वृद्धयाज्ञवल्क्यः कामादपिहिराजन्योवैश्योवापिकथंचनम्। मद्यमेवासुरांपीत्वानदोषंप्रतिपद्य
ते। व्यासेनापि। यतः। उभौमध्वासवक्षीवौदृष्टौमेकेशवार्जुनौ। इति। तयोः क्षत्रियवैश्यरपिमा यो
ध्वीपानमनुज्ञातम्। एवंब्राह्मणसंबंधित्वेनमद्यमात्रनिषेधेसत्यपि। गौडीमाध्वीचपैष्टीचवि
वि ज्ञेयात्रिविधासुरा। यथैवान्यातथा सर्वानपातव्याद्विजोत्तमैरितिगौडीमाध्व्योः पृथङ्निषेधव
चनंदोषगुरुत्वेनसुरासमत्वप्रतिपादनपरम्। अपंचसुरानिषेधोऽनुपनीतस्याप्यूढायाश्चक
न्यायाभवत्येव। तस्माद्ब्राह्मणराजन्यौवैश्यश्चनसुरांपिवेदितिइतिजातिमात्रावच्छेदेननिषेधात्
। तथापादोवालेषुदातव्यः सर्वपापेष्वयंविधिरितिवचनात् कामकारेपिनमरणांतिकम्। किंतु।
पादमेवद्विगुणीकृत्यषड्वार्षिकंदेयम्। विहितंयदकामानांकामात्तद्द्विगुणंचरेदित्यङ्गिरःस्म

क॰वि॰ मः। अपेयां वारुणीं पीत्वा प्रायश्चित्तं विधीयते। अग्निवर्णां सुरां कृत्वा पिबेन्निश्चितमानसः। सा
१८ तस्य निर्दहेद्दोषान्मारणेन विशुद्ध्यति। एतत्कामाद्ब्राह्मणविषयम्। मलं हि सर्वपेयानां सुराधर्मे
षु कथ्यते। तस्माद्द्विजैर्न पेयैषा न ग्राह्या च कदाचन। सकृदज्ञानतः पीत्वा वारुणीं पतति द्विजः। म
रणं स्ववं मुद्दिष्टं प्रायश्चित्तं विधीयते। आयसे भाजने तप्तां ब्राह्मणो वारुणीं पिबेत्। अग्निवर्णां
पापहरां ततः पापात्प्रमुच्यते। जीवितस्यान्तकाले तु श्मशाने विहितो विधिः। बृहस्पतिः। सुरापा
ने कामकृते ज्वलन्तीं चैव तां मुखे। दिपेत्तया विनिर्दग्धो मृतः शुद्धिमवाप्नुयात्। गोमूत्रमग्नि
नं वर्णं वा पिबेत्सलिलमेव वा। कुर्याद्वानशनं तावद्यावत्प्राणैर्विमुच्यते। किं सुराशब्दो मद्यमात्रो
रूढ उत तिसृष्वेव। गौडी। माध्वी। पैष्टीषु। आहोस्वित्त्येषामेवेति। सर्वत्र तदयुक्तं। किंच। यानस
द्राक्षमाधुकं खार्जूरं तालमैक्षवत्। मध्वृत्थं सैरमारिष्टं मैरेयं नालिकेरजम्। समानानि विजा
नीयान्मद्यान्येकादशैव तु। द्वादशं तु सुरामद्यं सर्वेषामधमं स्मृतम्। इति पुलस्त्येन मद्यविशे
षत्वेन सुरापाननिर्दिष्टत्वात्। गौडी माध्वी च विज्ञेया त्रिविधा सुरेति मनुः। यथैवैका तथैवान्या च
न पातव्या द्विजोत्तमैः। द्विजोत्तमग्रहणं ब्राह्मणस्यैवेति। पुनरयोगः गौडीमध्व्योः पैष्टी सुरास
मत्वम्। पुलस्त्यवचनाद्द्वादशं तु सुरामद्यमिति। तथा। सुरा वै मलमन्नानां पाप्मा वै मलमुच्यते। इत्य
म

हत्यापनेनरः कुर्यात्कथंचन। नतस्य शुद्धिर्निर्दिष्टा भृग्वग्निपतनादृते इति। किंच। अङ्गिराः पर्ष
द्या ब्राह्मणानामनुसाराज्ञां द्विगुणं मतम्। वैश्यानां त्रिगुणा प्रोक्ता पर्षद्यच्च व्रतं स्मृतम्। इति
लोमापवादेषु। द्विगुणा द्वित्रिगुणादमः। वर्णानामनुलोम्येन तस्मादेवार्हहानि तदिति। प्रायश्चि
त्तं यदा प्रोक्तं ब्राह्मणस्य महर्षिभिः। पादोनं क्षत्रियः कुर्यादर्द्धं वैश्यः समाचरेत्। शूद्रः समाचरे
त्पादमशेषेष्वपि पाप्मसु। गृहस्थोक्तानि पापानि कुर्वन्त्याश्रमिणो यदि। शौचवद्योधनं कुर्यु
र्वाग्ब्रह्मनिदर्शनात्। शौचन्तु यद्ब्राह्मणानां द्विगुणं ब्रह्मचारिणं। त्रिगुणं च वनस्थानां यती
नां तु चतुर्गुणमिति। प्रायश्चित्तमपि तथैव। हारीतः। प्रायश्चित्ते व्यवसिते कर्त्ता यदि विपद्यते
। पूतस्तदहरेवासाविह लोके परत्र च। व्यासः। धर्म्मार्थं यतमानस्तु न चेच्छक्नोति मानवः।
प्राप्नो भवति तत्पुण्यमत्र मे नास्ति संशयः। चरेद्व्रतमहत्वापि घाता तार्थं चेत्समागतम्। यथा
वर्णेषु यथास्थानं यथायुधि समन्वितः। यथा। सापराधं द्विजं हत्वा धर्म्मे मार्ग्गानिवर्त्तिनम्। कृच्छं
षडब्दमास्थाय तीर्थस्नानैर्विशुध्यति। किंच। आततापिनमायान्तमपि वेदान्तगं रणे। जिघांस
न्तं जिघांसीयान्न तेन ब्रह्महा भवेत्। अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः। क्षेत्रदारहर
श्चापि षडेते ह्याततायिनः॥ इति ब्रह्महत्याप्रायश्चित्तम्। अथ सुरापानप्रायश्चित्तम्। तत्र य

रिणस्तेषां प्रायश्चित्तं विनिर्द्दिशेत्। यथाशक्त्यनुरूपं च दंडं वैषां प्रकल्पयेदिति। यथा। अशीति
र्यस्य वर्षाणि बालो वाप्यून षोडशः। प्रायश्चित्तार्द्धमर्हन्ति स्त्रियो रोगिण एव च। इत्यङ्गिराः। अ
र्वाग्द्वादशवर्षाद् अशीतेर्नूर्द्धमेव च। अर्द्धमेव भवेत्पुंसां तुरीयन्तु योषिताम्। इति स्त्रीणामर्द्ध
प्रदातव्यं वृद्धानां रोगिणां तथा। पादो बालेषु दातव्यः सर्व्वपापेष्वयं विधिरिति विष्णुः। जनेक
दशवर्षस्य पंचवर्षात्परस्य च। प्रायश्चित्तं चरेन्माता पिता वायः सुहृज्जनः। इति। अतो बा
लनरस्यास्य नापराधो न पातकम्। राजदंडो न तस्यास्ति प्रायश्चित्तं न विद्यत इति। प्रायश्चि
त्तासक्त — वपुषो दानविषयम्। गवां सहस्रविधिवत्पात्रेभ्यः प्रतिपादयेत्। ब्रह्महा विप्रमु
च्येत सर्व्वपापेभ्य एव च। इति द्वादशवार्षिकव्रतचर्य्याशक्तस्य वेदितव्यम्। किंच। आनीय
विप्रसर्व्वस्वं संहृतं त्वाप्तित एव च। तन्निमित्तं हतं शस्त्रैर्जीवन्नपि विशुद्ध्यति। तथा। संग्रामो वा
हतो लक्ष्यभूतः शुद्धिमवाप्नुयात्। मृतकल्पः प्रहारार्त्तो जीवन्नपि विशुद्ध्यति। पात्रे धनं वा पर्याप्तं
दत्त्वा शुद्धिमवाप्नुयात्। आदातुश्च विशुद्ध्यर्थमिष्टिर्वैश्वानरी स्मृता। षण्ठन्तु ब्राह्मणं हत्वा शू
द्रहत्याव्रतं चरेत्। चांद्रायणं वा कुर्व्वीत पराकद्वयमेव च इति षड्त्रिंशन्मतात्। मध्यमाङ्गिराः। प्राणा
न्तिकं च यत्प्रोक्तं प्रायश्चित्तं मनीषिभिः। तत्कामकारविषयं विज्ञेयं नात्र संशयः। यः कामतो म

।दृष्ट्वापथिनिरातंकं हत्वावाब्रह्महाशुचिः॥ बृहस्पतिः।वृद्धकेशनखश्मश्रुर्भिक्षार्थीप्रविशेत्पु
रम्।कुर्यात्त्रिषवणंस्नानंस्थानासनविहारवान्।आश्रमेवृक्षमूलेवासंविशेत्कुशसंस्त
रं॥व्यासः।कामतोब्राह्मणवधेजीवतोनास्तिनिःकृतिः।यस्तुसर्वंपरित्यज्ययावज्जीवंचरेद्व
तम्।सविशुद्धःशुभाल्लोकान्नरोगच्छेन्नसंशयः।साक्षाद्धन्तुःप्रदातव्य[illegible]मेतद्द्वादशवा
र्षिकं।पादेपादोनमन्येषांप्रदातव्यंयथातथम्।मनुदेवलौ।विधेःप्राथमिकादस्माद्द्वितीयेद्वि
गुणंचरेत्।तृतीयेत्रिगुणंप्रोक्तंचतुर्थेनास्तिनिःकृतिः।सुमन्तुः।तिरस्कृतोयदाविप्रोहत्वात्मा
नंमृतोयदि।निर्गुणःसहसाक्रोधाद्गृहक्षेत्रादिकारणात्।त्रिवार्षिकंव्रतंकुर्यात्प्रतिलोमां
सरस्वतीं।गच्छेद्वापिविशुद्ध्यर्थंतस्यपापस्यनिश्चितम्।अत्यर्थंनिर्गुणोविप्रोह्यत्यर्थंनिर्गु
णोपरि।क्रोधाद्धिम्रियतेयस्तुनिर्निमित्तंतुभर्त्सितम्।वत्सरंत्रितयंकुर्यान्नरःकृच्छ्रंविशुद्ध
ये।म्रियतेचानिमित्तंयस्माद्यपितिनिर्गुणः।तदैकवर्षमेवेहब्रह्महत्याव्रतंचरेत्।केशश्म
श्रुनखादीनांकृत्वानुवपनेवनम्।ब्रह्मचर्यंचरन्वापिवर्षेणैकेनशुद्ध्यति॥पैठीनसिः।ह
न्तामन्त्रोपदेष्टाचतथाचप्रतिपादकः।प्रोत्साहकःसहायश्चतथामार्गानुदेशकः।आश्र
यःशस्त्रदानाचभक्तदातानिकर्मणां।उपेक्षकःशक्तिमांश्चदोषवक्तानुमोदकः।अकार्यका

क॰ वि॰
९६

शिघः। भोजयित्वा यथाशक्ति भुंजीत सह बंधुभिः॥ इत्यैहिकप्रायश्चित्ताधिकारे॥ अथ दा
नाधिदेवान्वक्ष्यामि दानसंमूर्त्तिसिद्धये। अभयं सर्व्वदैवत्यं भूमिर्वै विष्णुदेवता। कन्यादा
सश्च दासी च प्राजापत्यं प्रकीर्त्तितम्। तथा चैकशफं सर्व्वं कथितं यमदैवतम्। महिषश्च त
थायाम्यः कृष्णधेन्वादियद्भवेत्। उष्ट्रो नैर्ऋतदा[illegible]नं स्याद्रासभादि भवेच्चयत्। रौद्री धेनुः
समादिष्टाच्छागमाग्नेयमादिशेत्। मेषं तु वारुणं विद्याद्वाराहं वैष्णवं तथा। आरण्याः पशवः
सर्व्वे कथिता वायुदेवताः। जलाशयांस्तथा जीवा वारिधानी कमंडलुम्। कुंभं च करकं चैव वारु
णानि निबोधत। समुद्रजानि सर्व्वाणि वारुणानि तथा द्विजाः। आग्नेयं कनकं प्रोक्तं सर्व्वलोहा
नि वाप्यथ। प्राजापत्यानि सस्यानि पक्वमन्नमपि द्विजाः। विद्या ब्राह्मी विनिर्द्दिष्टा विद्योपकरणा
नि च। सारस्वतानि ज्ञेयानि न्यतमं देवं योजनानां शातं व्रजेत्। ब्रह्महत्यापनोदाय मितभुग्वि
जितेंद्रियः। सर्व्वस्वं वा वेदविदे ब्राह्मणायोपपादयेत् ब्राह्मणार्थे गवार्थे वा सम्यक्प्राणान्परि
त्यजेत्। मुच्यते ब्रह्महत्याया गोप्ता गोब्राह्मणस्य च। एवं दृढव्रतो नित्यं ब्रह्मचारी समाहितः
समाप्ते द्वादशे वर्षे ब्रह्महत्यां व्यपोहति॥ याज्ञवल्क्यः॥ शिरःकपाली ध्वजवान्भिक्षाशी कर्म्मवे
दयन्। ब्रह्महा द्वादशाब्दानि मितभुक्छुद्धिमाप्नुयात्। दीर्घतीव्रामयग्रस्तं ब्राह्मणं गामथापि वा।

कान्तु तदर्द्धार्द्धप्रमाणतः। अश्वदाने पट्टकूलमश्ववसोपस्करं दिशेत्। महिषीमहिषीदाने दद्यात्स्व
र्णवराश्वितान्। दद्यादजामजादाने सुवर्णफलसंयुताम्। लक्षमुच्चावचं पुष्पं प्रदद्याद्देवताञ्चन
म्। दद्याद्विजसहस्राय भिक्षान्नं द्विजभोजने। तुद्दजापे लक्षपुष्पैः पूजयित्वा त्रिपंचकम्। ए
कादशं जपेद्धुत्वा नृशंशं गुग्गुलेन तु। हुत्वाभिषेचनं कुर्य्यान्मंत्रैर्द्विजनु॰ णदेवतैः। शान्तिके
गणशान्तिश्च ग्रहशान्तिकपूर्व्विका। धान्यदाने शुभं धान्यं खारीषष्ठिमितं स्मृतम्। वस्त्रदाने प
ट्टकुलं द्वयं कर्पूरसंयु॰ तम् जलदाने पुरा प्रोक्तं पानीयं शतमाहिषं। इत्येवमादिदाने स्तु ब्रा
ह्मणान्परितोषयेत्। सन्तुष्टा ब्राह्मणा दद्युरनुज्ञां व्रतचारिणे। प्रशंशीतस्वयं विप्रास्तस्य दोषा
पनुत्तये। जयच्छिद्रं तप च्छिद्रं यच्छिद्रं यज्ञकर्म्मणि। सर्व्वं भवति निश्छिद्रं यस्य चेच्छन्ति ब्राह्मणाः
ब्राह्मणा यानि भाषन्ते मन्यन्ते तानि देवताः। सर्व्वदेवमया विप्रा न तद्वचनमन्यथा। उपवासो
व्रतं चैव स्नानं तीर्थं फलं तपः। विप्रैः संपादितं यस्य संपन्नं तस्य तत्फलम्। संपन्नमिति यद्वाक्यं
वदन्ति क्षिति देवताः। प्रणम्य शिरसा धार्यमग्निष्टोमफलावहम्। मनुप्रहरणा विप्राश्चक्र
प्रहरणो हरिः। चक्रात्तीव्रतरो मन्युस्तस्माद्विप्रान्न कोपयेत्। ब्राह्मणं जंगमं तीर्थं निर्ज्जलं सार्व्व
कालिकम्। तेषां वाक्योदकेनैव शुध्यन्ति मलिना जनाः। तेभ्योऽनुज्ञामिति प्राप्य प्रतिगृह्य तथा

कृ.त्रि० श्चित्तानिवक्ष्यन्ते॥ यथाहहिकान्याह।दशपंचाथचत्वारउपवेश्यद्विजोत्तमान्।तेषामनुज्ञयासर्वंप्रा
२५ यश्चित्तमुपक्रमेत् सर्वकर्मसुसंवृत्ताब्राह्मणाःस्युःसुवर्चसः।आचार्यंश्रुतसंपन्नंवैस्ववंशेचकु
टुम्बिनम्।आचारवन्तंधर्मिष्ठंद्विजशुश्रूषणेरतम् गृहस्थाद्यंविधिवद्देववत्पूजयेच्चतम्॥दि
[illegible]यवेश्मवंश्राद्धंसाकल्पनिजकर्मया।धेनुर्देयाद्विजातिभ्योदक्षिणान्यास्वशक्तितः।अलंकृत्य
भ. यथाशक्त्यावस्त्रालंकरणैर्द्विजान्।यवेहृंडप्रणामेनप्रायश्चित्तंयथोचितम्।भूमौगोमिथुनंसृ
ष्ट्वाआत्मानंवापयेच्चतैः तेषामनुज्ञयाकृत्वाप्रायश्चित्तंयथाविधि।पुनस्तान्परिपूर्णार्थमर्च
येद्विधिवद्द्विजान्।तत्कर्मान्तेद्विजातीनांसर्वदानान्निरिष्यते।दद्याद्व्रताङ्गदानानितेभ्यःश्रद्धास
मन्वितः।भूमिरत्नहिरण्यानिगावोधान्यंगृहागजम्।रथाश्ववसनयावासिद्धमन्नंफलम्।क
न्याविद्यौषधमंत्रछत्रोपानद्वरासनम्।शय्याताम्बूलमाल्यानितालवृन्तंचराजनम्।सर्वमेतत्प्र
दातव्यंलो[illegible]कद्वयजिगीषुभिः॥ अथमहापापेषुसर्वेष्वमुपपातके।दद्यात्पापेषुषट्सुश्रं
कल्प्यपापबलाबलम्।अथसाधारणोमंत्रोगोदानादिषुकथ्यते।गोदानेषुसवत्सागौःसुशीला
चपयस्विनी।वृषदानेशुभोऽनड्वान्सशुक्लावरकांचनः।निवर्तनानिभूदानेदशदद्याद्विजातये।
दशहस्तेनदंडेनत्रिंशद्दंडानिवर्तनम्।दशतान्येवगोचर्मदत्वापापैःप्रमुच्यते।सुवर्णंशतंनिः

नोद्देशः। अथ पापानि यथा। ब्रह्म हा मद्यपस्तेनस्तथैव गुरुतल्पगः। एते महापातकिनो यश्चैतैः
सह संवसेत्। इति। अथ तत्समानि। गुरूणामध्यधिक्षेपो वेदनिंदा सुहृद्वधः। ब्रह्महत्यासमं ज्ञेय
मधीतस्य च नाशनं। निषिद्धभक्षणं जैह्म्यमुत्कर्षेण [illegible] वचोऽनृतम्। रजस्वलामुखास्वादः सुरापान
समानि तु। अश्वरत्नमनुष्यस्त्रीभूधेनुहरणं तथा। निक्षेपस्य च सर्वं हि सुवर्णस्तेयसम्मितं। सख
िभार्याकुमारीषु स्वयोनिष्वन्त्यजासु च। सगोत्रासु सुतस्त्रीषु गुरुतल्पसमं विदुः। पितुःस्वसारं
मातुश्च मातुलानीं स्नुषामपि। मातुः सपत्नीं भगिनीमाचार्यत^नं तथा। आचार्याणीं दुहितरं ग यां
च्छंस्तु गुरुतल्पगः॥ इति तत्समानि। अथोपपातकानि। गोवधो व्रात्यता स्तेन्यमृणानां चानपक्रि
या। स्त्रीशूद्रविट्क्षत्रवधो निंदितार्थोपजीवनम्। नास्तिक्यं व्रतलोपश्च सुतानां चैव विक्रयः। धा
न्यकुप्यपशुस्तेयमयाज्यानां च याजनम्। पितृमातृसुतत्यागस्तडागारामविक्रयः। कन्याया दूष
णं चैव परिविन्दकयाजनम्। कन्याप्रदानं तस्यैव प्रतिश्रुत्यासमर्प्पणम्। आत्मनोऽर्थे क्रियारं
भो मद्यपस्त्रीनिषेवणं। स्वाध्यायाग्निसुतत्यागो बांधवत्याग एव च। इंधनार्थं द्रुमच्छेदः स्त्रीव
धो ओषधिजीवनम्। हिंस्रयंत्रविधानं च व्यसनान्यात्मविक्रयः। असच्छास्त्राभिगमनमाकारेष्व
धिकारिता। भार्याविक्रयणं चैषामेकैकमुपपातकम्। इत्युपपातकानि। अथ [illegible] नीकारणाय

क०चि०
१८

विह। सर्व्वे ते निरयं यान्ति यावत्पापस्य संक्षयः। कदाचिद्धि दितुं यान्ति धर्म्मात्मा नरकान्यमः
।महद्भिर्ल्प्रेणानिरौद्रेण नानाक्रंदसमाकुलम्। चतुराशीतिलक्षाणो नरकानां सनायकः। तेषां
मध्ये श्रेष्ठतमा घोरे या काह्यविंशति येषु दुःकृतकर्माणो निपतन्ति पृथक् पृथक्। तामि
स्रं लोहसंकुचं महारौरवशाल्मली। रौरवं कुड्मलं पूतिमृत्तिकं कालसूत्रकम्। तामिस्रं लो
हसंकुचे सङ्घातं लोहतोदं च अग्निज्वालप्रतापनम्। महानिरयकं काकोलं कुंभीपाकं सबो
जनम्। अवीचिरंधतामिस्रं तप्तवालुककर्त्तरी। असिपत्रवनं चैव भ्रमणं वैतरण्यपि। एक
विंशतिरेवं हि नरकासुखदा तो गताः। अन्ये च बहुशो राजन्मोहदुर्गंधिजिह्वकः। क्रकचः क्र
कराकष्टचकर्णः शंकुर्द्विजिह्वकः। दुर्गंधसारो वलिभिदस्थिभिद्यात्र भित्तया। मुद्गरो वज्रबा
नश्च संदंशः पाशिकः क्रूरः। यन्त्रनिःपीडको रौद्रो यन्त्रनिःकर्षकस्तथा। स्नायूच्छाकर्षकस्त
द्वत्कपालभिदुरस्तथा। दन्तनिःपाटको नाम जिह्वाकर्षश्च शूलिकः। वृकगृध्राशनो नाम श्व
शृगाला शनस्तथा। शेषनकाकादनो रौद्रः पावनोदाहकस्तथा। छेदको भेदकश्चैव कंडूकः पो
षणस्तथा। इत्येवमाद्याख्याता श्चतुराशीतिलक्षकाः। तान्व्रजन्ति नराः पापा नानाभावैः प्रदू
षिताः। महापातकजैर्घोरैरुपपातकजैस्तथा। स्वस्त्रिनायामसंचरित्तनराधमाः। इति नरककीर्त्ते

षमुक्तेषु परंतः। प्रायश्चित्तं विशोधनम्। प्रायश्चित्तेन हीयेत कृतं कर्म सुदुःसहम्। दृस्वा
स्वस्थानु सिंहं चकरिवृंदमिवाकुलम्। यद्वद्भानुप्रभाभिन्नं तमः प्रायो विलीयते। प्रायश्चित्तप्र
भावेन तद्दुःकृतलक्षणम्। स्वर्णादि ध्मातवायौ तं क्षारदाहाम्लसीसकैः। सोध्यन्ते धातवस्तद्वत् ६३
प्रायश्चित्तैर्हि देहजाः। प्रायश्चित्तैर्विहीनानां महापातकिनामपि। नरकान्ते भवेज्जन्म चिन्हां
कितशरीरिणाम्। प्रतिजन्म भवेत्तेषां चिह्नं तत्पापसूचकम्। प्रायश्चित्तमकुर्वाणाः पापेषु
निरता नराः। अपश्चात्तापिनो कष्टान्नरकान्यान्ति दारुणान्॥ तत्र श्रीभारते। कौतूहलसमा
विष्टः पप्रच्छेदं युधिष्ठिरम्। यमलोकस्य चाध्वानमन्तरं मानुषस्य च। कीदृशं किं प्रमाणं च
कथं वा तं जनार्द्दनम्। तरन्ति पुरुषा सम्यक्केनोपायेन संप्रमे। श्रीभगवानुवाच। साधु पृष्टं म
हाभाग शृणु तन्मे युधिष्ठिर। षडशीतिसहस्राणि योजनानां नराधिप। यमलोकस्य चान
ध्वनन्तरं मानुषस्य च। ताम्रकुंभमिवातप्तं शूलव्याप्तिमिश्रकंटकम्। द्वादशादित्यसंतप्तं भै
रवं दुरतिक्रमं। न तत्र वृक्षच्छाया पानीयं केतनानि च। यत्र विश्रमते पापः पुरुषो ध्वा
न कर्शितः। धाम्यं हि तेन्वीयमानो यमस्याज्ञाकरैर्बलात्। अवश्यं च महाराज सर्वान्त्याम
हापथः। नरैः स्त्रीभिश्च गंतव्यं वैः स्थावरजीवसंज्ञकैः। विकर्मणः प्रभावेन वंशच्छेदे दित्ता

क॰वि॰ केचिन्मिष्टान्नभोक्तारो दिव्यभूषणभूषिताः। क्षुधार्दिताः। बुभुक्षिता व्रजन्त्यन्ये ह्यपरे कौपीनव
९३ र्जिताः। विहितस्याननुष्ठानान्निन्दितस्य च सेवनात्। अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छ
ति॥ इति श्रीगर्हितकर्मप्रापककुजन्मानुकीर्त्तनम्॥ अथ प्रायश्चित्तलक्षणम्। तस्मात्पाप
स्य दुःखबीजत्वात्पापजन्यदुःखपरिहारार्थमेतत्प्रायश्चित्तं कर्त्तव्यम्। चीर्णप्रायश्चित्तः प
रिशुद्धलक्षः संजायतेऽयतः। गुरुरात्मवतां शास्ता शास्ता राजा दुरात्मनाम्। इह प्रच्छन्नपापानां
शास्ता वैवस्वतो यमः। गुरोः कृतापवर्ता चेन्न जातं राजशासनम् ततो दुःकर्मशुद्ध्यर्थं प्रायश्चित्तं
समाचरेत्। अचीर्णप्रायश्चित्तानां यमलोके घनेकधा। यातनाभिर्विमुक्तानामनेकां जीवस
न्तति गत्वा मानुषभावेषु पापचिन्हा भवन्ति ते। सहित्वा यातनाः सर्वा गत्वा वैवस्वतक्षयम्। नि
स्तीर्णयातनानां स्तेतु लोकमायान्ति निन्दितताम्। तस्मादेतेन कर्त्तव्यं प्रायश्चित्तं विशुद्धये। एवम
स्यान्तरात्मा च लोकश्चैव प्रसीदति प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत्। ——— व्यवहार्यो
वचनादिह जायते। इति बौधायनः॥ अथ शातातपः। प्रायश्चित्तं प्रकर्त्तव्यं कृत्वा कर्मानुव
त्सरम्। संसारे चावचीर्णस्य यतः कर्म प्रबाधते। कर्माणि विविधान्यत्र जायन्ते वै नृणां किल॥
किंपाकफलसाराणि विपाके दुःसहानि हि। भोगाहिना प्राः सर्वे यावत्कर्माणि तानि निष्क्रयः ते

पः कूर्ब्बहीनः प्रजायन्ते। नरमैथुनकृन्नूनं कियत्कालमपुंस्त्वभाक्। इत्यादि बहुशः प्रोक्तं पुराणागमतत्पे
नच। बौधायनेन मुनिना अन्यैश्च ऋषिभिः पुरा। तस्मात्तद्दोषशान्त्यर्थं शास्त्रोक्तं विधिमाचरेत्॥ इ
ति ज्ञानमंडले पुरुषकर्म्मविपाकोद्देशः॥ अथ तत्रापि ब्रह्महा क्षयरोगी स्यादित्यादिलक्षणैर्व्याधिम
न्तश्चैव जायन्ते प्राणिनः। तस्मान्नरेण नाचारपरेण न भाव्यम्। सतामाचारवतां नित्यमन्तं कृतान्तभय
मपि दूरे यतः। आचारः प्रथमो धर्म्मः श्रुत्युक्तः स्मार्त एव च। तस्मादस्मिन्समायुक्तो नित्यं स्यादात्मवा
न्नरः। आचाराच्च्युतो मर्त्यो न धर्म्मफलमश्नुते। आचारेण तु संयुक्तः संपूर्णफलभाग्भवेत्। ए
वमाचारतो दृष्ट्वा धर्म्मस्य मुनयो गतिम्। सर्व्वस्य तपसो मूलमाचारं जगृहुः परम्। सर्व्वलक्षणहीनो
ऽपि समुदाचारवान्नरः। श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति। लोभान्मोहात्प्रमादाद्वा भया
द्वा दृष्टमत्यजन्। ऊर्द्ध्वलोकेषु सर्व्वेषु सुरैः सर्व्वैः प्रपूज्यते। लोभमोहभयैर्व्वापि ज्ञानदौ ज्ञानतोपि ती
वा। अनाचारसमायुक्तः कुकर्म्म यदि सेवते। तेन पापेन पापात्मा पूर्व्वोक्तं चिन्हमाप्नुयात्। रौरवा
दीन्स निरयाननुभूय महीं गतः। प्रदर्शनं श्रीमता तत्तु मयोक्तं पापकर्म्मणि। इत्यप्रकाराणि यथा
तथैव प्राणिजातयः। यथा कर्म्मफलं प्राप्य तिर्य्यक्त्वं यान्ति पर्य्ययात्। जायन्ते लक्षणभ्रष्टा दरिद्राः
पुरुषाधमाः। प्रत्यक्षमिह दृश्यन्ते तत्तत्कर्म्मफलं जनैः। एके गजाश्वयानेषु धावन्त्यन्ये पदातयः। ए

क०वि० ते। नरकान्ते भवन्ती ह दीनाश्च सुखवर्जिताः। पितुर्भार्य्यां गुरोः पत्नी ------ येनराः कामतो
१२ ह्यभिगच्छन्ति ते भवन्ति ब्राह्मणेस्तथा। ते भवन्ति नराः लोके दंभमोहसमातुराः। वैडालव्रति
नो ये च मार्जारास्ते भवन्ति तु। बकव्रता बकाश्चैव वञ्चधिकेघास्क दर्दुराः। यत्र तत्राशनाः श्वानाः से
नाश्च कलहप्रदाः। पर‾ सोहरायेव मृतभार्याभवन्ति ते। दुष्टभार्या भवन्ती ह सर्वीनामपवाद
काः। गोविप्रमार्गे न्तुध ह्वैपाणंपघ्रि विकलो भवेत्। गोयासमुपजीवन्तः शुष्काङ्गाः स्मृतिवर्जि
ताः। ब्राह्मणानामृणं मूढा नार्पयन्ती ह येक्कचित्। ग्रामस्कस्मुखास्तेयो ----------
--- प्राप्नुवन्ति हि। नरकान्ते भवन्ती ह तया मस्तकरोगिनः। संभाव्य विभवान्ते च सर्वे सौख्यवि
वर्जिताः मातरं पितरं वंधून्तोषयन्ति न सर्वथा। अदत्तदानाश्च नरा देही ति भाषिणः ये सर्वे सं दरि
पत्प्राप्य विप्राग्निगुरुदेवताः। न तर्पयन्ति च पितॄन्नाश्च ते दुःखभागिनः। येषां मतिर्न्नह कलौ च
न हरे पापकारिणाम्। कथं गतिर्भवेत्तेषां कुलेवं शधरः सुतैः। भार्यावियोगसन्तपस्यान्तापसीयो
भिगच्छति। -- नियतं भूमौ सन्ति सौख्येन सौख्यभाक्। अनिवृत्तिपरो नित्यं वालघाती मृतप्रजाः
। गोहन्ता गर्भिणीका पुत्रो जायते ना ... जन्म पंचकम्। विप्रहन्ता च नरकाज्जायते कुष्ठरोगवान्।
सदा ज्वरी भवेन्नित्यं देवविप्रावमानकः। परोपतापी पापात्मा हृद्रोगी जायते भुवि सुखमेथुनकृत्वा

वलेः प्रलिप्तं गोरसादिभिः। त्रिगवं पंचमहिषं सप्ताश्वं नवगो वृषम्। एकादशगजं यच्च क
लहोरावसंयुतम्। वंधुभिर्जामिभिर्हीनं महोत्सवविवर्जितम्। केशभस्मतुषाङ्गारपेत
वृदैरलंकृतम्। कपालास्थिसमाकीर्णं श्ववापदैः परिवेष्टितम्। मार्जारनकुलारावसंघुष्टं
कलहादिभिः। देवकार्येश्च पार्वणैर्देवद्रव्येण हृरित्तम्। विलयं याति तन्नह्यौघमामपात्रमि
वांभसि। अतः सुबुद्धिमास्थाय मन्त्रदोषापशान्तिदम्। मंगलाचारसंयुक्ता भर्त्तुः प्रियहिते
रता। वैधव्यादिषु दोषेषु वंध्यादिषु तथैव च। गुरूणां च सतां वाक्याच्छास्त्रोक्तं विधिमाच
रेत्। साध्यते परतो कोपं यास्यामाचारलक्षणैः। साध्यः साध्याः स्त्रियस्तस्मात्साध्यः स्नानसं त
पर्यैः।। इति ज्ञानमंडलोक्तः स्त्रीकर्म्मविपाकः।। अतः परं प्रवक्ष्यामि नृणां कर्म्मफलं मुने। ऐ
हिकामुष्मिकं चिह्नं शुभाशुभविवेचनम्। प्राप्नोति पुरुषो येन कर्मणा प्राक्तनेन तत्। काणाः
कुब्जास्तथा पङ्गा निर्ज्जना दुःखजीविनः। षंढा पाखंडिनो नित्यं जायन्ते हीनयोनिषु। नृशंसा
नास्तिकाः पापाः परद्रव्यापहारिणः। धूर्त्तकर्म्मरता मूर्खाः सदा पापरता नराः। हिंसकाः सर्व्व
सत्वानां येन रात्व्यर्थजीविनः। ते सर्वे क्रमशो राजन्नेवंभूता स्थिरं भुवि। अनृतं ये वदन्ती ह लोभान्मो
हाच्च विस्मरात्। ते सर्वे दासतां यान्ति नीचे नारसंभवनः। साध्वीयेधर्षयन्ती ह कल्यायुक्तभंनि

यामि२

क. वि० नी सर्व्वे रजकी चर्म्मकारिका। नदी च वरटा चैव मेदी कैवर्त्त मागधी। नैवैताः पापयोषिच्च भु
११ क्त्वा च दरिद्रताम्। वैधव्यं दासत्वं चैव याति जन्मक्रमेण तु। अतिथींश्च यतीन् पूज्यान् अन्यानपि
च भिक्षुकान्। न पूजयेद्यथाशक्त्यादीनानि र्द्धनतो लभेत्। पुंश्चली सा भवेन्नित्यं वैधव्ये
ह विवर्जिता। गृहीत्वा नियमं सर्व्वं लोल्यात् लोपयते तथा। उदिते तु दिवानाथे गृहं मार्जयते
न या। नश्यन्ति पशवस्तस्याः कुलकीर्त्तिश्च हीयते। सूर्य्याजिनानि धान्यानि पात्राणि विवि-
धानि च। नश्यन्ति यथा स्थानं गृहं तस्याश्च हीयते। गृहागतमनुष्याणां प्रतिपत्तिपराङ्मु
खी। आयुषो यशसः सौख्यात् महत्त्वात् हीयते च सा। मार्जनी च यथा भर्त्ता दीपस्त्रैव पशुपति
। न दायाति गृहाल्लक्ष्मी रलक्ष्मी रमते किल। अमार्जितानि भांडानि भाजनानि विशंपते।
। दृश्यन्ते तु गृहे यस्याः सा स्त्री कल्याणवर्जिता। नायान्ति सुहृदो यत्र बान्धवा अतिथिं क्वचित्
। तद्गृहं मलिनं ज्ञेयं हव्यकव्यविवर्जितम्। हव्यानि देवा नाश्नन्ति कव्यानि पितरस्तथा। मनुष्या
न पश्यन्तो नागास्तु वासिनो न रमन्ति वै। ऊर्णजाला समाकीर्णं गृहं संस्कारवर्जितम्। वेदशास्त्रवि
हीनेन नास्तिकाक्रान्तमद्विजम्। मर्य्यादादिविहीनं च पूज्यपूजाविवर्जितम्। आचाररहितं नि
त्यं निष्ठुरं परुषभाषणम्। स्त्रीजितं स्वामिहीनं च लिङ्गिभिः परिवारितम्। सेवा[illegible]न्नोच्छिष्ट

सूतिर्भवेद्ध्रुवम्। व्रतदानक्रियाहीना काकवंध्यात्वमाप्नुयात्। अन्यासामनपत्यत्वमिष्ट
तां वै ध्रुवतां लभेत्। परापत्यानि या द्वेष्टि सा सन्तानं लभेच्चिरात्। दंपत्योः स्नेहभङ्गेन विधवा
च दरिद्रिणी। कलत्रयोर्वियोगं च सर्वसाधारणी भवेत्। काकवंध्या भवेत्सा तु गर्भपातं
करोति या। निवारयति या गर्भं न पुंस्त्री सा भवेद्भुवि। स्त्रीणां दुर्बुद्धिदा या च भर्तृसौख्यं न सा
लभेत्। गृहोपस्करपत्राणि रात्रौ यस्याः पृथक् पृथक्। दारिद्र्यं प्राप्नुयात्सा वै बहुजन्मानुगं भु
वि। परवेश्मरता या च परवादरता तथा। प्रथमं मिष्टमश्नाति दुःशीला शाकलिप्रिया। आक्रुश्य
गुरुबंधूंश्च श्वश्रू श्वशुरदेव ताम्। शृगाली सा भवेद्राजन्निर्बंधुर्विधवा क्रमात्। अग्निदा गर
दा या च भर्तृकारुगुघातिका। स्नेहघ्नी च यशोघ्नी च सा हिंस्या दभिसारिका। पतिद्वेषकरी दु
ष्टा क्रुद्धा वाप्रियवादिनी। शुश्रूषयेन्न भर्तारं दीना प्रव्राजना भवेत्। सोदरे च सुते पत्यौ सततं न
म्रतवर्जिता। व्रतोपवासनियमतीर्थसेवाकरी यदि। आत्मबुद्धिरता या च पालापप्रियवत्स
ला। स्वकुलाचारहीना सा बालवैधव्यमाप्नुयात्। ऋतुस्नाता च या नारी भर्तृतल्पं न गच्छति
। यौवनेन तु गर्वेण विधवा कामचारिणी। अनाश्रये भवेन्नित्यं भर्तुरुद्वेगकारिणी। अपवा
दं पत्या बूनेत्र त्राणां सुहृदां मृषा। अन्यायोनिमवाप्नोति क्रमशो गुरुगामिनी। सूकरी च स्यु

क॰वि॰ ह्रियान्नारीक्रमात्तेहसत्तेयदि। हीयत्ते धस्य हंसात्तु सपुत्रपशुभांधवैः। देवतानांपितृणांचदानक
१० र्म्मणिमैथुने। केशान्संगोपयेद्दत्ताभिरपत्यान्यथाभवेत् ॥ अंसौकेशाग्रभागांश्चयदिपश्येत्सुमा
न्स्त्रियाः। वैधव्यंपुत्रशोकंचसाप्नुयाज्जन्मजन्मनि। स्वैरिणीवाभवेत्साहिभर्त्तुस्नेहविवर्जितास्व
वकुर्भाभवेयुस्ता वाल्यान्हिंसन्तिशायिनः। वंध्याभवतिवावाल्येद्वियोजयतिमातरम्। मृतप्र।
जाभवेन्नारीफलंदत्वाहरत्सुत। फलस्तेन्यंचकुरुत्तेसापिस्यान्मृतवत्सका। मंदप्रजाभवेन्नारी
अभिचारप्रयोजिका। गर्भघ्नापापदास्त्रीणांवंध्याभवतिनिश्चितम्। वैधव्यमाप्नुयाद्दोस्येवेश्या
चापिभवेद्ध्रुवम्। वल्गुलीदुर्भगासास्याद्भर्त्तुःकपटकारिणी। वहुभृत्तिगृहान्यापियाश्वश्रूश्व
सुराहिता। दुष्टस्त्रीनिरतायाचसाभवेद्गृहगोधिका। चित्तेदुष्टावहिःसौम्यास्वकुटुंवविरोधि।
नी। सानारीदुःखितादीनाभवेद्बांधववर्जिता। भर्त्तृघातकरीनारीनरकान्तेचशूकरी। शुनकी
चखरीदुष्टीपितृभ्यांवर्जिताक्रमात्। सेवसंतापकारीस्यात्पित्रोःस्वजनवंधुषु। वंचयित्वा
चभर्त्तारंयापुमांसंपरंरमेत्। वालवैधव्यमाप्नोतिकौमार्येचवहुस्थितिम्। खसुरवायोद्यत्ता।
नारीभर्त्तुश्चाप्रियवादिनी। मार्ज्जारीशुनकीभूत्वासाभवेद्दुर्भर्त्तृका। देवद्विजगुरूंश्चेषशान्ति
तॄन्श्वामर्षिताभजेत्। यासादौभोगमाप्नोतिजनमध्येप्रियाभवेत्। पुरुषद्वेषिणीनारीस्त्रीज

51000 स

त्तिमातरम्।पानेन चौषधादीनां सपत्न्यारक्तशूलिनी। भोजने विघ्नकर्त्री च मनुष्यः स्यादरोचकी॥
न्या सह त्वं त्वभिन्यासी पादकीली च पादहा। असृग्दरी भवति यो वृत्तान्तरयत्यपि। इत्याद्युद्देशः। यतः।
अनन्तपारं किल शब्दशास्त्रं स्वल्पं तथायुर्बहवश्च विघ्नाः। सारं ततो ग्राह्यमपास्य फल्गु हंसो यथा क्षीर
मिवाम्बुमध्यात्। अथ च विपाकलक्षणप्रसंगेन स्त्रीणामप्याचारविपाकं वक्ष्यामो यथाज्ञानमंडला
त्। स्त्रीणामाचारवाक्यानि प्रोच्यन्ते ज्ञानभास्करात्। येषां श्रवणमात्रेण दृष्टादृष्टफलं महत्। ज्ञाय
ते प्राकृतं कर्म्म विपाकात्कर्म्मणामिह। उद्धृत्य सर्वशास्त्रेभ्यः पुराणेभ्यः पृथक् पृथक्। इति निगमे हो सा
भ्यश्च सामुद्रेभ्यो विशेषतः। स्त्रीणां चैव हितार्थाय भास्करेण प्रभाषितम्। बाल्ये या वा सुवत्या वा
वृद्धया वापि योषिता। न स्वातंत्र्येण कर्त्तव्यं किंचित्कार्यं गृहेष्वपि। पिता रक्षति कौमारे भर्त्ता र
क्षति यौवने वार्द्धके च तथा पुत्रा न स्त्री स्वातंत्र्यमर्हति। याज्ञवल्क्यः रक्षेत्कन्यां पिता विन्नां पतिः पु
त्रास्तु वार्द्धके। अभावे ज्ञातयस्तेषां न स्वातंत्र्यं क्वचित्स्त्रियाः। पूर्वोक्तानामभावे तु राजा रक्षेच्च तां
स्त्रियम्। तस्याश्च भावमासाद्य स्वयं रक्षेत्कुलाङ्कुरौ इति। प्राप्य तेमां तु षं जन्म प्राक्तनैः पुण्यसंचयैः
पौरुषं वा बलं वा त्वं कर्म्मणा रक्तः पृथक्फलम्। जना जानि वयो वीर्य्यं कर्म्माधीनं सुखासुखम्। वै
धव्यं पुत्रशोकं च दारिद्र्यं चैव दास्यताम्। पाप्मानि कर्म्मभिर्यैस्तु जालितानि वदाम्यहम्। तुल्ककेण

क॰वि॰ यः। वालकः इतिच धर्म्मीगणस्त्वपि। वातव्याधि श्मरी। कुष्ठमहोदरभगंदराः। अर्शांसि ग्रहणी पैशेमस्त
५५ रोगाः प्रकीर्त्तिताः। अचिकित्स्याऽपिये प्रोक्तास्तेषां मुक्तिरनिक्रिया न्यथा। ब्रह्मस्व हृद्द्रोगीरोगं च गुल्मांश्याद
न्यजागमे। श्वासकाशयुतो मर्त्त्यो वेदाग्रहणतो भवेत्। अतीसारी सभवति यस्त्वेताग्निविनाशकः। त्रेता
ग्नितु शमनाग्नेनित्सुपलत्तणम्। अपि चान्यसृङ्गरी सभवति। यस्तु हिंस्याद्दयापश्चून्। तथावैधा
यनकः। धान्यचौरो व्रणी हस्तच्छेत्ता नाडीव्रणी भवेत्। सवर्णागमने रक्तपित्तवान् पांडुरोगपथ। अन्त्य
जागमने मर्त्त्यः कामली भज्ञहारकः। शेफी भवति भोक्तृणां योन्तरं प्रति पद्यते। गलगंडी गणद्रव्य
हर्त्ता भवति मानवः। विद्रुधिः फलहर्त्ता स्यात्स्व वृद्धाकर ग्रहात्। लोलुपो जायते पापः प्रपा
दीनां विनाशकः। विश्वासघातकश्चैव छर्द्दियुक्तः प्रजायते। मर्म्मोद्घाटन सेवस्तु हृद्रोगी संप्रजा
यते। स्वरूपघातनवांश्चैव हर्त्ता चैवावमेदनात्। निवारयन्त ष्वानं विप्राणां धर्म्म तिष्ठताम्। प्र उ
त्तिष्णायी शीतकरो हेमन्ते शिशिरेऽपि च। शूलेन शूली भवति मनुष्याणां च हिंसकः। कर्णछेत्ता
कर्णरोगी कुष्ठरोग्योस्त्रनाशनः। द न्तशातनकर्त्ता च दन्तरोगी भवेत्सदा। करूस्तम्भूरु संस्तंभा
दनिरोगपाद्विनाशकः। सर्प्पं दृष्टश्चयः खादयन्ति विसर्प्पी सभवेन्नरः। खिलाखिली खिलकर्त्ता च धनु
र्व्याधिर्द्धनुषहान्। स्ववधूभी भवेत्सात्ववाँन्हिंसातिशायिनः। वंध्या भवति या वाला द्वियेमध्य
लो

ला पच्छघातो त्तनाशनः। इत्येवमाद्दयोरोगामहापापसमुद्भवाः। जलोदरयकृत्प्लीहशूल
शोफव्रणानिच। श्वासाजीर्णज्वरछर्द्दिभ्रममोहगलग्रहाः। रक्तार्बुदविसर्पाद्याउपपातोद्भवास्मृ
ताः। दंडापतानकश्चित्रंवपुःकंपविचर्च्चिका। वाल्मीकःपुंडरीकाद्यारोगाःपापसमुद्भवाः। शिरोर्त्ति
श्चरोगाये अभिशापाद्भवंतिते। अन्येचवहुधारोगाजायन्तेरोगसंभवाः। आदिशब्दानुतान्संदे
पतोवदे। जठरागुदजाउन्मादा। अपस्मृति। अस्रकस्नुति। कर्णवाविर्य्यावुद्बुदप्रमेहकीलका
। अपानकीलकः। चंतुर्विधभगंदराः। सदारक्तस्नुतिः स्त्रीणांप्रदरः। पवनव्याधिः श्चित्ररूप
म्। वाल्मिकःकाणकः। पङ्गुता। श्रुतिकेवल्यं। अष्टादशप्रमेहाः। भगंदराः। प्रदरः। अशीति
वातव्याधयः। अष्टादशकुष्टाः। रात्र्यंधता। षट्षष्टिमुखजाविकाराः। श्वपथुः। अपचीराविणि। प्रा
णस्फोटकः। वाल्मिकः। काणकः। पङ्गुता। श्रुतिकेवल्यम्। अष्टादशप्रमेहाः। भगंदराः। प्रदरः। प
वनव्याधिः। श्चित्ररूपम्। तिमिरम। वर्द्धनाशीर्षि। व्रणः। कोकसीसकः। वपुषिश्वेतरक्तानिमंड
लानिपुंडरीकानि। रक्तार्बुदंमूत्रिः। गंडव्रणः। विणकणः। प्रांरवकः। गुल्मवाता। स्फोटवाता। वर्त्म
वातः। नेत्रवातः। शिरोवातः। कंपवातः। प्रसावातः। एकांङ्गहरणम्। कंठमाला। शूलंसप्तविधम्।
त्रयोदशकंठरोगम्। देहभग्नानकोचिसर्प्पः। गलगंडः। वातपित्तम। वातरक्तम। कफः। शोणितेग्रंथ

रोगी स्याद्भ्रमकोश्मरीरोगवान्। मूर्खोपस्माररोगीस्याद्ग्निमंदः ... दस्युदः। यत्कृतघ्नी होभवेद्रोगीस्मृतवा
तेनपातकान्। शिरःशूलेपरतापो मोपदना ——— त्। अपेयपानंकृ नेनरक्तपित्तंप्रजायते। दा
वाग्निदायको यस्तु जायतेसविसर्पवान्। छेदको वक्तुर्दृष्टाणांजायतेसमहाव्रणी। परद्रव्यापहा
राच्च जायते ग्रहणीगदः। स्वर्णस्तेयात्खकुनखी प्रसूतिरपि जायते। रूपस्तेयाच्चित्रकुष्टंताम्रचौ
रे विपादकः। त्रपुचौरः सिध्मलश्च वर्चलोहचोरकः। रसचौरोतिमूत्रः स्याद्राज्यहन्तेत्र रोगवान्॥
तैलचोरोतुकंडूकृद्दोषवाग्दीर्घदस्तुरः। हृद्रोगी दुष्टकृद्दीर्घरोगी दद्रुगदोयवा। स्याद्दुष्कृत् स्थू
लजिह्वः स्याज्जोत्र ह्रागोत्तिकी भवेत्। सेतुभत्तीयपानीय दुःखदोर्जत्यमाप्नुयात्। दुष्टदोषास्त्विमे
प्रोक्ताः प्रतीकारस्तथोच्यते॥ अनुचा परनिंदाकृतघ्नत्वंपरमर्मावघाटनम्। नैष्ठुर्यंनिर्घृणत्वं
चपरदारोपसेवनम्। परस्वहरणाशौचं देवतानांचकुत्सनम्। निकृत्यावंचनंनृणांकार्पण्यं
प्राणहिंसनम्। दुश्चरित्रमधर्मेच्छानास्तिक्यंवेदनिंदनम्। मित्रस्वामिगुरुद्रोहोद्विपद्वेषः कुसंग
तिः। यानिचप्रतिषिद्धानितत्प्रवृत्तिश्चसत्तता। लिङ्गानितानिजानीयान्मुक्तानां नरकादनु। अयो
द्देशेनव्याधयः पूर्वजन्मकृतंपापंनरकस्यपरिक्षये। बाध्यतेव्याधिरूपेणसंसारेसर्वजन्तुषु। कु
ष्टंचराजयक्ष्मा चप्रमेहोग्रहणीत्रयः। मूत्रकृच्छ्रमश्मरी कासश्चातिसारभगंदरौ। कुष्टव्रणगंडस्य

श्री

नरः। यतस्ततोऽश्नन्मार्जारः। कच्छूवनदाही खद्योतः। दारकाचार्यो मुखविगंधिः। पर्युषितभोजी कृ
मिः। अदत्तादायी बलीवर्दः। मत्सरी भ्रमरः। अग्न्युच्छादी मंडलकुष्ठी। शूद्राचार्यः श्वपाकः। गोर
त्नोऽस्तर्प्पः। स्नेहापहारी क्षयी। अन्नापहार्यजीर्णी। ज्ञानापहारी मूकः। चंडालीपुल्कसीगामी अजगरः
प्रव्रजितागमने मरुपिशाचः। शूद्रीगामी दीर्घकीटः। सवर्णागामी दरिद्रः। जालहारी मत्स्यः। क्षीर
हारी बलाकः। वार्द्धुषिकोऽङ्गहीनः। अविक्रेयविक्रयी गृध्रः। राजमहिषीगामी नपुंसकः। राजाक्रोश
कोगर्दभः। गोगामी मंडूकः। अनध्यायेऽध्ययने शृगालः। परद्रव्यापहारी परप्रेष्यः। मेध्यवधे गर्भ
वासी इत्येतेऽव्वर्थगमनाः यथा मनुः। स्त्रियोऽप्येतेन कल्पेन हृत्वा दोषमवाप्नुयुः। एतेषामेव जंतूनां शे
भार्यात्वमुपयान्ति ताः। इति याज्ञवल्क्योक्तेनुद्देशः। अथ कश्चिदायुर्वेदे। ब्रह्मघ्नो जायते पांडुः कु
ष्ठी कोवधकारकः। राजघ्नो राजयक्ष्मी स्यात् दन्तोसारी वनान्तकृत्। स्वाम्यङ्गःनाभिगमनादिहरोगा
नी भवेत्यपि। गुरुदाराभिगमने मूत्ररोधेऽश्मरी गदः। कुलजाताप्रसङ्गेन जायते वा भगंदरम्। शूलीपरो
पतापी स्यात्पैशुन्याद्धूसकासवान्। मार्गजविघ्नकरो यस्तु जायते पादरोगवान्। अभिशापाद्व्रणो
त्सत्तिर्य्यक्त्वापि प्रजायते। सुरान् येजनेवापि शक्तो हृष्टिकरोति यः। गुदरोगा भवन्त्यस्य पापरूपा
निदारुणाः। परोपतापान् यार्थिनः सम्मद्य्वरः। परान्नविघ्नकरणाद्दजीर्णं चापि जायते। गरद ग्रहि

४० त्वा लोभेन मानवः। वि[illegible]निचरत्नानि[illegible]त हेमत्तेषु। [illegible] धान्यहारी स्या ग्राम्यमुष्ट्रः फलके[illegible]
।जले प्लवः प्लवः काको गृहहारी ह्युपस्करम्। मधु दंशः फलं गृध्रो गां गोधा ग्नि बकस्तथा। चित्री
वस्त्रं श्ववारसं चचीरी लवणहारकः। यथा वा। कांस्यहारी हंसः। अश्वहर्त्ता पंगुः। तेजसापहारी।
मंडलम्। देवविप्राक्रोशकः स्वलङ्की। गरग्निदावुन्मत्तौ। गुरुप्रतिहन्तास्मारी। गोघ्नश्चांधः। धर्म
पत्नीमुक्त्वान्यत्र प्रवृत्तः शब्दवेधी। कुंडाशी भङ्गी भवतः। देवब्राह्मणस्वापहारी पांडुरोगी। न्यासापहा
रीकाणः स्त्रीपण्योपजीवी षण्ढः। कौमारदार[illegible]त्यागी दुर्भगः। मिष्टैकाशी वातगुल्मी। अभक्ष
को गंडमाली। तापसीब्राह्मणीगामी निर्बीजी। क्रूरकर्मा वामनः। वस्त्रापहारी पतंगः। शय्यापहा
रीश्वपाकः। पारव[illegible]पहारी कलापी। दीपापहारी कौशिकः। मित्रध्रुक्तपी। मातापित्रोराक्रो
शकः खंडकारः। इति प्रारवः। अथ गौतमः। अनृतवागुल्वलः। जलोदरो दारत्यागी। कूटसाक्षी
श्लीपदी। विवाहविघ्नकृच्छिन्नौष्ठः। अवगूरणच्छिन्नहस्तः। मान्दघ्नोऽन्यः। स्नुषागामी वातवृ
वृषणः। चत्वरे विण्मूत्रकृत्कुष्ठी। कन्यादूषकः षण्ढः। दुर्बाल्तुर्म्मशकः। पित्रा विवदमानोऽपस्मा
री। न्यासापहारी अनपत्यः। रत्नापहारी अत्यन्तदरिद्रः। विद्याविक्रयी पुरुषमृगः। वेदविक्रयी द्वी
पी। बहुयाजको जलप्लवः। अयाज्ययाजको वराहः। अनिमंत्रितभोजी वायसः। मृष्टैकभोजी वा[illegible]

घाः एवहारिणां वो योनिः कयभ्रंशिनां गुरोः। जायां चान्यस्य पुरुषः पारक्यां प्रतिपादयेत्। प्राप्नोति षे
ढतां मूढो यात्तनाभ्यः परिच्युतः यः करोति नरो होमं मसमिद्धे हुताशने। सोऽजीर्णवाधादुःखार्त्तो
मंदाग्निरभिजायते अथ याज्ञवल्क्यः मृगश्वशूकरोष्ट्राणां ब्रह्महा योनिमृच्छति। खरपुल्कस
वेणानां सुरापो नात्र संशयः। कृमिकीटपतंगत्वं स्वर्णहारी समाप्नुयात्। तृणगुल्मलतात्वं च क्र
मशो गुरुतल्पगः। अथ मनुः श्वशूकरखरोष्ट्राणां गोजाविमृगपक्षिणाम्। चांडालपुल्कसानां
च ब्रह्महा योनिमृच्छति। कृमिकीटपतंगानां विड्भुजां चैव पक्षिणाम्। हिंस्राणां च पिशाचानां स्ते
नो विप्रः सहस्रशः। तृणगुल्मलतानां च क्रव्यादां पक्षिणामपि। क्रूरकर्मकृतां चैव शतशो गुरुत
ल्पगः। विपाकः ब्रह्महा क्षयरोगी स्यात्सुरापः श्यावदन्तकः। हेमहारी च कुनखी दुश्चर्मा गुरु
तल्पगः। यो जनेः संवत्सरेणासत्तलिङ्गोऽभिजायते। अन्नहर्त्ताऽमरोगी स्यान्मूको वागपहारकः। धा
न्यहर्त्तातिरिक्ताङ्गः पिशुनः पूतिनासिकः। तैलहृत्तैलपायी स्यात्पूतिवक्त्रः सूचकः। तथाय
ह्यानद्वाप्ररड व्यमपहृत्य बलान्नरः। अवश्यं याति तिर्यक्त्वं जग्ध्वा चैवाहुतं हविः॥ इति मनुः। पर
स्य योषितं हृत्वा ब्रह्मस्वमपहृत्य च। अरण्ये निर्जले देशे भवति ब्रह्मराक्षसः। हीनजातौ प्रजाये
त परत्नापहारकः। ...णाकं शिखिं हृत्वा गंधांश्छुच्छुन्दरी शुभान्। मणिमुक्ताप्रवालानि हृ

भ. १४० भद्यमश्नाति स्वन पत्तो भवेन्नरः। हरन्वस्त्रं तथा गंधा गव्यं पवनाशनः। नाप संगमनाच्च वि
भवेन्मनुपिशाचकः। अशास्त्रयोवनांते वन्भवेत्सर्प्य इति श्रुतिः। पुन्यजायामथाकांतन्कक
लो सो भवेद्कृवम्। जलप्रश्रवणं भित्वा भवेत्स्यो हि मानवः। अविक्रेयान्विक्रयवै [illegible] विक
टा तो भवेन्नरः। अयोनिगो वृकादिः स्यादुलूकः क्रयवंचनात्। मृगस्त्वेकादशाहे तु भुंजानस्त्वा
भिजायते। प्रतिश्रुत्य द्विजेभ्यो र्थमदद्जंबुको भवेत्। राज्ञांगामी भवेद्दुष्टस्तस्करोविद्गराहकः
परिवादाद्द्विजातीनां लभते काछपीं तनुम्। लभेद्देवलको वश्यं योनिं चांडालसंज्ञिताम्। दुर्भगः फ
लविक्रेता वृको ऽपि वृषलीपतिः। मार्जारोग्निपदास्पृश्या रोगवान्पर मांसभुक्। सोदर्यागमनात्वं
दो दुर्गंधश्च वस्तु गंध हृत्। पतितान्प्रतिगृह्यापि खरयोनिं तथा व्रजेत्। नरकान्प्रतिमुक्तस्तु कृमिः
पतितयाजकः। उपाध्याय व्यलीकं तु कृत्वा श्वा भवति द्विजः। तज्जायां मनसा वांछंस्तद्द्रव्यं वा पसं
शयम् गर्द्दभो जायते जन्तुः पित्रोश्चैव वावमानकः। मातापितरमाक्रुश्य सारिका संप्रजायते। ता
वैपीडयित्वा तु कच्छपत्वं प्रपद्यते। भर्तृपिण्डं वृथाशित्वा तौ द्विष्टां श्च निषेवते। सो पि मासे हि ग्राम
पत्नो जायते वानरो मृतः। न्यासस्यापहर्त्ता नरकाद्विमुक्तो जायते कृमिः। असूयकश्च नरकान्मुक्तो न
भवति राक्षसः। विश्वासहन्ता च नरो मीनयोनौ प्रजायते। ग्राम्यारण्यानि शस्यानि हृत्वा जन्तुरचे

भवत्याखुः कांस्यं हंसो जलं प्लवः। मधुदंशः पयः काको रसं श्वा नकुलो घृतम्। मांसं गृध्रोव
सां ---- नीरि गाद्स्कलवणं वलाकाशकुनिर्दधि। कौशेयं तित्तिरो हृत्वा क्षौमं हृत्वा तु दर्दु
रः। कार्पासतन्तुकं क्रौंचो गोधा गां वाल्गुलो गुडकं। छुछुंदरिः शुभानां धान्यं च शाकान्न वर्हि
णः। वको भवति हृत्वाग्निं गृहहारी ह्युपस्करी। रक्तानि हृत्वा वासांसि जायते जीवजीवकः। वृ
को मृगेभं व्याघ्रोऽश्वः फलपुष्पं तु मर्कटः। स्त्रीमृक्षः स्तोककोवारि ज्ञातान्यथपशूनजः यद्वा तद्वा
परद्रव्यमपहृत्य बलान्नरः। अवश्यं जाति वीर्यत्वं जग्ध्वा चैवाहुतं हविः। स्त्रियोप्येतेन कल्केन.
हृत्वा दोषमवाप्नुयुः ॥ एतेषामेव जन्तूनां भार्यात्वमुपयान्ति ताः। श्वित्री वस्त्रप्रस्तारसंचचीरील
वणहारकः। अथातो मिश्रत्वेन मनुष्याणामपि कर्म्म चिन्हं कथ्यते। गद्गदोऽनृतवादी स्या
न्मूकश्चैव गवानृते। ब्रह्महा जायते कुष्टी श्यावदंतस्तु मद्यपः। कुनखी स्वर्णहरणाद्दुश्च
र्म्मा गुरुतल्पगः। संयोगी हीनयोनिः स्याद्दरिद्रोऽदत्तदानतः। ग्रामशूकरयोनौ स्यादयाज्यया
जको द्विजः। वहुनर्जको मार्जारः खद्योतः कक्षदाहकः। अविद्यां यः प्रयच्छेत वलीवर्दो भवे
त्स सः। अन्नं पर्युषितं विप्रे प्रदद्यात्कुब्जतां व्रजेत्। मात्सर्यादतिरान्धो जन्मांधः पुस्तकं हरन्।
फलान्याहरतोऽपत्यं नजीवे [illegible] संशयः। मृतो वानरतां याति तन्मुक्तो गलगंडवान्। अदत्वा

वि॰ शुभाशुभं कर्म्मसततथाऽनुभुज्यते। अथ नरकेषु नराः पापकर्म्मणा यातनाभुक्त्वा ताननुभूय तां
८ भूमिमागच्छन्तस्तस्मात्पशेषेणात् तृणगुल्मादिनरकाननुभूय च ततः कीटपक्षिमृगपशुजातिल
क्षणेषु प्रत्यक्षनरकेषु पुनर्दुःखान्यनुभूय च तदनुत्तीर्णावशेषपापात्तद्वासनावशादेतल्लक्ष
णैः सहिता मनुष्यजातौ जायन्ते। तत्र कृतकर्म्मवशात्कीटकपक्षिमृगादिकाः समासतो वक्ष
ते महापातकजान्घोरान्नरकान्प्राप्य दारुणान्। कर्मक्षयात्प्रजायन्ते महापातकिनो नराः ख
सूकरखरोष्ट्राणां गोऽजाविमृगपक्षिणाम्। चंडालपुक्कसानां च ब्रह्महा योनिमृच्छति। कृमि
कीटपतंगानां विड्भुजां चापि पक्षिणाम्। हिंस्राणां चापि सत्त्वानां सुरापो योनिमाप्नुयात्। भूता
दि सरटानां च तिरश्चां चाम्बुचारिणाम्। [illegible]
[illegible] योनिमाप्नुयात्। भूतादि [illegible]। हिंस्राणां च पिशाचानां स्तेनो या
ति सहस्रशः। तृणगुल्मलतानां च क्रव्यादपक्षिणां। क्रूरकर्मकृतानां च शतशो गुरुतल्प
गः। हिंस्रा भवन्ति क्रव्यादाः शतशोऽभक्ष्यभक्षिणाम्। परस्परादिनः स्तेनाः प्रेतीत्यस्त्रीनिषेवि
णः। संयोगं पतितैः गत्वा परस्यापि च योषितम्। अपहृत्य च ब्रह्मस्वं भवति ब्रह्मराक्षसः। म
णिमुक्ताप्रवालानि हृत्वा लोभेन मानवाः। विविधानि च रत्नानि जायन्ते हेमकर्तृषु। धान्यं हृत्वा

शादेत्ति वदन्मीश किंग्रसाद्वाड्वान्नुग्रणानान्तु निर्जपराधजनितं दंडं विधायाधुनाश्रीमान्मोत्तु
गिन्भूपतिः स्वविहितं धर्म्मं प्रजापालनं सम्पक्कर्त्तुमघुग्णरोगशमनं ब्रूते विधिं शास्त्रतः शास्त्रइति
तदाह पुराण न्याय मीमांसा धर्म्म शास्त्राङ्ग मिश्रिताः वेदाः स्थानानि विद्यानां धर्म्मस्य च चतुर्द्दश
आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः अर्थशास्त्रं च विज्ञेया विद्याह्यष्टादशैवताः तत्र पुराण
नि ब्राह्म्यादीनि वेदा ऋग्वेदादयः धर्म्मशास्त्राण्याह यथा मन्वत्रिविष्णुहारीतयाज्ञवल्क्यो
शनोङ्गिराः यमापस्तम्बसंवर्त्ताः कात्यायनवृहस्पती पराशरव्यासशंखलिखिता दक्षगौतमौ शा
तातपोवसिष्टश्च धर्म्मशास्त्रप्रयोजका इति अष्टादशपुराणानां स्मृतीनां सारसंचयम् कर्म्मणां प
रिपाको यमाख्यः क्रियते मया इत्यत्रेयं विषयासुद्धिः देवद्रव्यविनाशेन गुरुद्रोहादिभिस्तथा उ
पपातकिनः सर्व्वे पच्यन्ते नरकेष्विति आचंद्रतारकं यावत्पीड्यन्ते विविधैर्वधैः तथा महापात
किनः सर्व्वे निरयाणां तु कोटिषु चतुर्द्दशसु पच्यन्ते कल्पार्द्धं विविधैर्वधैरिति उपपातकिनश्चा
पि तदर्द्धमपि मानवः शेषैः पापैस्तदर्द्धं च कलयापि तथाविधः । अथाधः पतनात्तु साधर्म्मज्ञः
परिकीर्त्तितः । नरकाद्धोमहाघोरे पातनात्पापमुच्यते । तस्मात्पापेन ती[illegible]दुःखानि सवहून्य
पि । तस्मात्पापं न कर्त्तव्यमत्पीडाकरं हितं । यस्मिन्देशे यदा काले वयसा वा हृशेन च न । कृतं

क॰ वि॰ याचतत्त्वतावद्धतत्त्वकृतान्तवशादुपेति २५ स्व शशिदिवाकरयोर्ग्रहपीडनं गजभुजंगमयोरपि
२ बंधनम् मतिमतांचसमीक्ष्यदरिद्रतांविधिरहोबलवानितिमेमतिः ३ मातावशगयमरुणाजननन्या
पृष्ठमहोरगाः क्षीराब्धेर्विषमुत्पन्नंदैवादन्यत्किमुच्यते ४ अतोदैवमेवप्रमाणम् इतिसारग्रहेक
र्मविपाकेदैवकल्पनाकरणंनाम अथप्रकरणाधिकारसंख्या मोलुगिनृपतिविरचितंकर्म
विपाकेयतः पुरस्कृत्यरचितोग्रंथस्तस्माद्धादित्यनामतस्यापि ग्रंथेप्रकरणान्यत्र पंचाशदेवहि अ
धिकाराः पंचयुक्ताश्चत्वारिंशत्समन्विताः शतत्रयंपरिख्यातंदानानांशान्तिकर्मणाम् पंचाशद्धि
दुपेतानिअष्टौचैवशतानिच चत्वार्येवसहस्राणिग्रंथसंख्याप्रकीर्तिताम् एवमंगाधिकाराणांसं
ख्याग्रंथस्यचस्फुटा नसंशयोत्रकर्तव्योनन्यूनमधिकंभवेत् अथसारग्रहणम् षड्गुणतिसमायु
क्तंविज्ञानेषांडशतद्वयम् पंचबौधायनीयानिगृहीतानिशतानिच शातातपोक्ताविंशतंदानखं
डाछतत्रयम् आचारदीपाद्विज्ञानंसार्द्धैकंज्ञानमंडलात् शतमेकंसपंचाशदायुर्वेदात्समु
द्धृतम् सहस्रंमोल्लुगेशेनसर्वसमुदायप्रयोजितम् तथावालचिकित्सायाः सार्द्धंचैवशतद्वयम्
समुद्धृत्यपुराणेभ्यः सहस्रंशतपंचकम् शतमेकंतथासाग्रंसारप्राज्ञमितस्ततः एवमेकोनपं
चाशत्संख्यातानिशतानिच सारग्रहाभिधेग्रंथेनव्यर्थंपदमत्रतु अथमोल्लुगिः नत्वाश्रीशमुमे

मम्मुदितमपि शाखागणमात्तुश्चानविश्वसितमपि शानपेशी विकलशरीरमं पालयति सर्व्वथाकिंबहू
क्तेनकदाचिदुम्भिनडवकिंचिन्नकरोति तत्तथाचास्मिन्प्रतिकूलवर्त्तिनि अमृतमपिविषम् रज्जुरपि
दुष्टसर्प्पः।गोष्पदमपिसागरः।तृणमपिशस्त्रम् अणुमपिगिरिः आखुविवरमपिरसातल
म् जायापिभुजंगी स्वसुतोपिव्याधिः प्रकाशमपितमः तथ्यमपिमाया सत्यमप्यलीकम् प्रिय
मपिपुरुषम् क्षमापिक्रोधः तथाचास्मिन्ननुकूलवर्त्तिनि कठिनकालपाशोपिमृणालकोमल
लता गरलमप्यौषधम् [illegible]ध्यानमोपिज्योत्स्ना दोषोपिगुणाः रिपवोपिसहायाः पङ्गुरपिक्र
मपादः एवंविधस्यास्यसरभसमवगणितकुंभस्थलांकुशस्य गजपतेरिवोद्दामचारिणः शिशो
रिवप्रभवतोगुरोरिस्वेच्छयाव्यवहारतः पुत्रस्येवप्रतिकूलव्यवहारतः कोवाउपदेशःकोवा
नयिता सर्व्वयदस्मैरोचतेतत्करोति तस्मादात्मसरवेनपुरुषेणाक्षिणीनिमील्यसर्व्वसोढ
व्यम् यतः नकोपिकस्यचित्कर्त्ताशुभेवाप्यशुभेपिवा पूर्व्वजन्मार्जितंकर्म्मफलंभुंक्तेनरोव
शः तस्माद्दैवंप्रधानंपुरुषइतिवाक्यम् तच्च विधिर्व्विधातानियतिःस्वभावःकालोग्रहो
ईश्वरकर्म्मदैवम् भागधेयानिपुण्यानिकृतान्तयोगाः पर्य्यायनामानिपुराकृतस्य १ तथा य
[illegible]येनचयदाचयथाचयत्र यावच्चयत्रचशुभाशुभमात्मकर्म्म तस्माच्चतेनचतदा[illegible]तत्

[illegible]मपि चि[illegible]ते नाभियुक्ते [illegible] नते [illegible] र हियते न[illegible] नेहाचि[illegible]न[illegible]ति कृत्य[illegible] ५

[illegible]रूपे हि न ज्ञायते किंस्वतन्त्र[illegible] आहोस्वित्तदपि प[illegible]धीनम् उत्काल[illegible]ते ज्ञा कालाख्य[illegible]।
[illegible]दृष्टयं वा भावप्रधानपरिणतिरीश्वरो वा कर्म्म वा स्वार्थप्रतिष्ठानि धर्म्माधर्म्मसंस्कारो वा ति
ष्ठा नैवा किं प्रमुच्यते सर्वथा यत्तदेतन्मायेन्द्रजालकल्पम् कलितमदानेककरिभटानूढभट
कृष्टधनुर्म्मण्डलीकृतरक्षैरपि न निवार्य्यते न प्रसादेन गृह्यते न प्रस्तवेण मार्द्दवमुपनीयते
नास्नेहेनात्मा क्रियते न वलवता निरुध्यते पुरुषकारेणालंघ्यते न सेवयाराध्यते न काले
न त्वयमुपनीयते न देशान्तरगमनेन विछिद्यते तत्कदाचिन्मित्रमिवानुकम्प्यते कदाचि
द्विप्रलंभक इव व्यामोहयति कदाचिदरातिरिव विषमेषु प्रहरति कदाचित्पितेव परिपाल
यति कदाचिद्दायाद इव पीडयति कदाचिन्मार्ज्जप्रवृत्तमप्यमार्ज्जेण नयति अपात्रमपि सं
पदां पात्रीकरोति अनुचितमपि गुणैरारोपयति गुणाधिष्ठानमपि दोषास्पदयति विगतध
नमपि धनदीकरोति धनदमपि निर्द्धनयति करतलगतमपि वलात्स[illegible]हरति दूरस्थमप्यर्प ६
यति रणमुखगतमिषीनिस्त्रिंशधाराजर्जरीकृतमपि जीवयति कठिनपाशग्र[illegible] थितनिपीडि
तकंठनालनिगुं[illegible]मपि रञ्जयति। प्रणयकुपितचरविलासिनीकरकिशलयकलितवालकम
लनालताडितमपि मारयति पञ्चषपवनजंघिजलोर्म्मिदंडभिन्नपोतमपुत्तारयति। शयैश्शय

व

द्वानलजलधिविधिहृदितो ६ ३२ हेचयोषेकाश्रीतश्वानिनायस्कृतमुकुटमणिंकर्म्मपूर्वविपाक
मू ७ तद्यथा यद्यपि वसिद्धयेति भर्तृहरिवाक्यम् नमः स्यामो देवान्ननु हतविधेस्तेपि वशगा
विधिर्वन्द्यः सोपि प्रतिनियतकर्म्मैकफलदः फलंकर्मायत्तंयदिकिममरैः किंचिविधिना नमस्त
त्कर्म्मभ्यो विधिरपि न येभ्यः प्रभवति। यदैहिकामुष्मिकभावसिद्धं बुद्ध्या वियुक्तं हितबुद्धि
हृद्यम् यत्कर्म्मदेवाख्यमिहप्रसिद्धं शुभाशुभं नौमितमीशनद्धम् ८ तत्राप्यरंदुःखकरं नराणांशु
भेतरत्कर्म्मसमीक्ष्यपाके यद्वत्पुरार्यामुनयो विचार्य्य निर्जीर्य्यबुद्ध्याविविधप्रकारम् ९ गर्गो
मनुर्गौतमयाज्ञवल्क्यौ वौधायनः सुश्रुतशालिहोत्रौ। शातातपः प्राणिगणानुकम्पाप्रगुणाक
र्त्तो यदुवाच वेधाः १० नानाभेदेषु वेदेषु यद्युक्तं मनीषिभिः धर्म्मशास्त्रपुराणेषु कर्म्मकिंपाक
लक्षणम् ११ किंचिद्गर्गाङ्गौतमाच्चापि किंचित्किंचिन्नीत्वा सुश्रुताच्छालिहोत्रात्। मन्वादिभ्यः
सत्यवत्याः सुताच्च पौराणेभ्यः सारमादाय किंचित् १२ विद्वज्जनविनोदाय हिताय भविनां भु
वि सारग्राहसिद्धं नाम्नासामुद्रायं शास्त्रमुद्धृतो १३ तत्र च दैवं कर्म्म चेति किम् दैवं प्राग्जन्मजं
यत्पात्कर्म्मैतज्जन्मजं कृतम् तत्र दैवमादायाह दैवं हि नाम तदभियुक्तत्त्वैरपि न शक्यते प
[illegible]यन समधिगन्तुम् नैता[illegible] कालेन कस्यचित्[illegible] [illegible]णचरतामु[illegible]म [illegible]परिछिद्य[illegible]ण

कु॰ लि॰ ।। श्रीगणेशाय नमः ।। योदेवः किल पूर्वसर्गसमये संस्मर्यते ब्रह्मणाद्यैस्तोरसुरसिद्धदेवप्रम
१ नुजैरभ्यर्च्यते कर्मणाम् । विघ्नध्वानविध्वानजातकठिनांकुशं कुंजरं करे विभ्रत्पातु मुखास्महेरं
जमुखं सिद्धेः परं कारणम् १ वंदे विश्वनुतां पितामहसुतां वाग्देवतामेव तां यस्याः पुण्यपद
प्रसाददलिताशेषोग्रजाड्यो जनः । उद्यत्पार्वणचंद्रसांद्रितसुधापाथोधिवीचिछटानिर्मि
क्तानन्नबसंवाक्यनिकरैर्विद्वत्सु संदीव्यति २ नमामि देवं जगतामधीशं चतुर्मुखं ध्यानजुषं
प्रपद्ये चराचरं यत्स्मरणाद्बभूव विद्यास्तथाष्टादश यन्मुखेभ्यः ३ विश्वलोचोरमीशं दलित
दनुसुतं मुक्तिदं भक्तिभाजां विश्वरूपं विशुद्धं विबुधजनवनश्रीनिदं योगिगम्यम् । विष्णुं का
लग्रासिस्मुकरकलितगदाशंखचक्राब्जचापं पापं विद्रावयन्तं भवभयहरं ब्रह्ममूर्तिं प्रपद्ये ४ दे ।।
वं सुधाकरकलाकलितोत्तमांगं त्र्यक्षं त्रिशूलधरमद्रिसुतावृतांगम् । कोपं प्रसादमिति वर्जि
तमुग्रवीर्यं वंदे सुरर्षिगणसिद्धनुतं वृषांकम् ५ राजा यत्र पुरे सुर..श्वरसमः श्रीदुर्गसिं
होमहानर्द्धोक्तेनतयस्यपदमहिषीध्यन्या विकाराजते यत्साचिव्यधुरां च संकलयति श्रीकर्णकं
ठीरवः कस्तद्वर्णयितुं क्षमः क्षितितले श्रीनंदभद्रं पुरम् ६ तद्भूम्भृन्मान्यो निखिलनिग
मवित्सर्वतीर्थावगाही व्यासः श्रीपद्मनाभांगज इह विदितः कामदेवः सुधीशः । जन्तुब्रातोपकृत्यै

Acc. No: → 51000.

कर्मविपाक ग्रन्थ।

कर्मविपाकः।